A-PDF Page Crop DEMO: Purchase from www.A-PDF.com to remove the watermark


स्वकं राज्यं प्रयाहि त्वं भवसि प्रियकृत् पितुः ॥७४॥

पितृसिंहासनं प्राप्य भोक्ष्यसे सकलां महीम् ॥ तदन्ते मत्पदं लब्ध्वा सुखमेष्यस्यसंशयम् ॥७५॥

कार्तिके शुक्लपञ्चम्यां तीर्थे तव नृपात्मज ॥ स्नानं कुर्वन्ति ये मर्त्याः पूजयन्ति च मामपि ॥
७६॥

तेषां त्रिजन्मचरितं पापं नश्यत्यसंशयः ॥ इति दत्वा वरं तस्मै तत्रैवान्तर्दधे शिवः ॥७७॥

ततः स कनको राजन् स्वं राज्यं प्राप्य सुस्थितः ॥

---

## कर्षाश्रमं

सूत उवाच ॥

तस्मात् प्रतीच्यां क्रोशार्धमध्ये चातीवपावनम् ॥७८॥

कर्षाख्यस्य नृपस्यास्ते ह्याश्रमं श्रमनाशनम् ॥ कर्षाह्वयो महाराजो वङ्गदेशाधिपः पुरा ॥७९॥

पुत्रे राज्यभरं न्यस्य पत्न्या साकं स्वयं नृप ॥ गोकर्णं क्षेत्रमासाद्य तीर्थं कृत्वा मनोहरम् ॥८०॥

ब्रह्मध्यानपरो भूत्वा निष्ठावानभवत्तदा ॥ तपस्तप्त्वा निराहारो ब्रह्मसायुज्यमाप्तवान् ॥८१॥

तत्तीर्थं सुमहत्पुण्यं ब्रह्मज्ञानप्रदं शुभम् ॥ तत्र स्नात्वा नरो भक्त्या सर्वदुःखैर्विमुच्यते ॥८२॥

---

## रोमशाश्रमं

तस्माद्दक्षिणदिग्भागे शरपाते शुभे स्थले ॥ रोमशस्याश्रमं पुण्यं सर्वकिल्बिषनाशनम् ॥८३॥

तीर्थं शुभजलं कृत्वा रोमशस्तत्र पार्थिव ॥ सिद्धिकामस्तपस्तप्त्वा परां सिद्धिमुपागमत् ॥८४॥

तत्र स्नात्वा नरो भक्त्या सर्वसिद्धिमवाप्नुयात् ॥ सर्वं तव मयाऽऽख्यातं किमन्यच्छ्रोतुमिच्छसि ॥
८५॥

इतिश्रीस्कान्देसनत्कुमारसंहितायांगोकर्णखण्डे दिगाश्रमादितीर्थवर्णनंनाम पञ्चनवतितमोऽध्यायः ॥
९५॥

अध्यायाः अकारादि <<BACK ॥ अध्यायः ९६ ॥ NEXT>> श्लोक संख्या–७७

## ॥ शाल्मलीमाहात्म्ये– शाल्मलीगंगायाः उत्पत्तिः ॥

## जाह्नवीकथा

शतानीक उवाच ॥

सूत सर्वार्थतत्वज्ञ पुराणार्थविशारद ॥ त्वन्मुखाद्गलितं पीत्वा कथामृतरसायनम् ॥१॥

न तृप्तिमधिगच्छामि भूयो मे ब्रूहि शाङ्करीम् ॥ कथां पापौघशमनीं व्यासशिष्य महामते ॥२॥

शालूकिन्याश्च माहात्म्यं त्वत्तः संक्षेपतः पुरा ॥ श्रुतं मया मुनिश्रेष्ठ सर्वाघौघहरं परम् {॥३॥

इदानीं श्रोतुमिच्छामि विस्तरेण महामते ॥

सूत उवाच ॥

शृणु राजन् प्रवक्ष्यामि शालूकिन्याः कथां शुभाम् ॥४॥

विस्तरेण कुरुश्रेष्ठ सहैभिर्मुनिपुङ्गवैः ॥ पुरा भगीरथो राजा सूर्यवंशसमुद्भवः ॥५॥

तपः कृत्वा तु सुचिरं गङ्गां सन्तोष्य यत्नतः ॥ पितृनुद्धारणार्थाय गङ्गामानीतवान् दिवः {॥६॥

जह्नोराश्रममासाद्य गङ्गया सह पार्थिव ॥ तत्रापश्यत् कुरुश्रेष्ठ तपस्यन्तं महामुनिम् ॥७॥

इदमाह तदा राजा वचनं विनयान्वितः ॥ मुने चायाति गङ्गाऽत्र वेगेन महता शुभा ॥८॥

तस्मात् स्थानमिदं त्यक्त्वा याहि चान्यत्र वै द्रुतम् ॥ एवमुक्तो नृपतिना प्राहेदं वचनं मुनिः ॥९॥

राजानं भरतश्रेष्ठ किञ्चिन्मोहेन संयुतः ॥ गमनेऽन्यत्र मे शक्तिर्न हि किं करवाण्यहम् ॥१०॥

यथा भवेत् तथा राजन् ध्रुवं भवति नान्यथा ॥ एवमुक्त्वा नृपं जह्नुर्गङ्गां दृष्ट्वा पपौ क्षणात् ॥११॥

ततः प्रोवाच राजानं क्व याता स्वर्नदी तव ॥ इत्युक्त्वा पार्थिवं जह्नुस्तूष्णीमासीत् तदा नृप ॥
१२॥

ततो भगीरथो राजा पृष्ठतो वीक्ष्य सत्वरम् ॥ तत्र गङ्गामदृष्ट्वैव ज्ञात्वा तन्मुनिचेष्टितम् ॥१३॥

चिन्तामवाप महतीं दुःखेन महता युतः ॥ ततस्तन्निकटे स्थित्वा कृतवान् परमं तपः ॥१४॥

एवं तपस्यतस्तस्य सुचिरं भरतर्षभ ॥ तुष्टो वर्षसहस्रान्ते गङ्गां त्रिपथगां पुनः ॥१५॥

जानुं भित्वा ददौ जह्नुस्तदा तस्मै कुरूद्वह ॥ तदा भगीरथो गङ्गां दृष्ट्वा तं तुष्टमानसः ॥१६॥

मुनेरनुज्ञां सङ्गृह्य गङ्गया सह तत्क्षणात् ॥ गत्वा भगीरथो राजा पातालं पन्नगालयम् ॥१७॥

भस्मीभूतान् पितृन् सर्वान् पावनं कृतवानसौ ॥ जह्नुः स्वस्याश्रमे राजन् यथापूर्वमतिष्ठत {॥१८॥

## सत्यतपेन जह्नोः उपदेशः

ततः कालेन महता जह्नोराश्रममागमत् ॥ मुनिः सत्यतपो नाम सत्यवाग्विजितेन्द्रियः ॥१९॥

तमागतमभिप्रेक्ष्य जह्नुः सत्यतपाह्वयम् ॥ अभ्युत्थायासनं दत्वा पूजां चक्रे यथाविधि ॥२०॥

कुशलं परिपृष्ट्वा तु जह्नुः प्रोवाच तं मुनिम् ॥ कुत आगम्यते विद्वान् दुर्लभं तव दर्शनम् ॥२१॥
ब्रूहि मे मुनिशार्दूल अत्रागमनकारणम् ॥

सत्यतप उवाच ॥

पुष्पभद्रानदीतीरे स्थितोऽहं सुचिरं मुने ॥२२॥
ततश्चाहं गतो गङ्गां स्नानार्थं मुनिपुङ्गव ॥ तत्र स्नात्वा तु गङ्गायां विश्वेशं परिपूज्य च ॥२३॥
ततो विमुक्तो ब्रह्मर्षे आगतोऽहं तवान्तिकम् ॥ दर्शनार्थं मुनिश्रेष्ठ शृणुष्वेदं वचो मम ॥२४॥
श्रुत्वा भगीरथेनोक्तं वचस्तथ्यं मुनीश्वर ॥ मिषेण तं तिरस्कृत्य हास्ययुक्तेन वै मुने ॥२५॥
पीता सुरनदी नूनं त्वया काश्यां श्रुतं त्विदम् ॥ काश्यपाद्यैर्मुनिवरैर्गदितं तत्र वै मुने ॥२६॥
तत्प्राप्तदोषशान्त्यर्थं क्षिप्रं सिद्धिकरं व्रज ॥ पश्चिमाम्बुधितीरस्थं क्षेत्रं गोकर्णनामकम् ॥२७॥
तत्र शालूकिनी नाम नदी सर्वमलापहा ॥ आस्ते वै रुद्रयोन्यास्तु उदीच्यां दिशि वै मुने ॥२८॥
क्रोशद्वये महापुण्या तत्तीरे त्वं समाहितः ॥ गङ्गामूर्तिं प्रतिष्ठाप्य पूजयस्व यथाविधि ॥२९॥
नित्यं त्रिषवणं स्नायन् शालूकिन्यां मुनीश्वर ॥ एवं त्वया कृते तत्र लोकवादो गतो भवेत् ॥३०॥
दोषः क्षिप्रं लयं याति गङ्गया सुप्रसादतः ॥

---

## सत्यतपादीनां कूटसाक्ष्यपापपरिहारार्थं शिवेन शाल्मल्याः उत्पादनम्

तत्र स्नात्वा पुरा विप्र ब्राह्मणौ कूटसाक्षिणौ ॥३१॥
रोमपादपृथुग्रीवौ मुक्तौ स्वकृतपातकात् ॥ एवं सत्यतपेनोक्तं वचः श्रुत्वाऽब्रवीदिदम् ॥३२॥
जह्नुः सत्यतपं भूयः सादरं विनयान्वितः ॥ किं कारणं कूटसाक्षीमूचतुस्तौ महामुने ॥३३॥
रोमपादपृथुग्रीवौ ब्राह्मणौ कुत्रसंस्थितौ ॥ शालूकिन्यां कथं स्नात्वा विमुक्तौ स्वकृतादघात् ॥३४॥
शालूकिन्यास्तथोत्पत्तिं नामधेयं च सर्वशः ॥ वक्तुमर्हसि मे ब्रह्मन् विस्तरेण महामुने ॥३५॥

सत्यतप उवाच ॥

रोमपादपृथुग्रीवौ विद्याभ्यासरतौ सदा ॥ मत्सेवातत्परौ नित्यं ब्रह्मचर्यपरायणौ ॥३६॥
वेदाभ्यासं प्रकुर्वन्तौ मद्गृहे तस्थतुश्चिरम् ॥ भृगुवंशे समुत्पन्नो ग्रामे शार्वरिसंज्ञके ॥३७॥
ब्रह्मचर्यव्रतधरः कण्डुरु तत्रास्थितो मुने ॥ एकदा पितरं कण्डुर्नत्वा प्रोवाच बुद्धिमान् ॥३८॥
ब्रूहि मे सकलां विद्यां वेदशास्त्रदिकां पितः ॥ पिता पुत्रवचः श्रुत्वा प्रीतिमानब्रवीत् सुतम् ॥३९॥
यस्मात्त्वेदृशी बुद्धिर्जाता विद्यार्जने सुत ॥ तस्मात् सुपुत्रवानस्मि पूर्णकामो न संशयः ॥४०॥

पुष्पभद्रानदीतीरे आस्ते सत्यतपो मुनिः ॥ तत्र त्वं गच्छ भद्रन्ते शासनान्मम सुव्रत ॥४१॥
स च वक्ष्यति ते सर्वं वेदशास्त्रादिकं च यत् ॥ इति पित्रोदितं श्रुत्वा तदाज्ञां प्राप्य वेगवान् ॥
४२॥
मत्समीपागतः कण्डुर्दण्डवत् प्रणिपत्य माम् ॥ पित्रोक्तं सर्वमाचष्टे सन्निधौ मम सुव्रत ॥४३॥
ततोऽहं वेदशास्त्राणि तस्मै सर्वाण्यनुक्रमात् ॥ अब्रुवं परया प्रीत्या तेनाधीतं क्रमान्मुने ॥४४॥
रोमपादपृथुग्रीवौ तथाऽन्ये मुनिपुत्रकाः ॥ मत्सेवातत्पराः सर्वे विद्याभ्यसनतत्पराः ॥४५॥
एकदा मां समभ्येत्य पृथुग्रीवोऽब्रवीद्वचः ॥ गुरो शृणुष्व मद्वाक्यं कण्डुना यत्कृतं ध्रुवम् ॥४६॥
सुरा पीता प्रभाते तु पापेन कृतबुद्धिना ॥ दृष्टं तद्रोमपादेन मया च मुनिपुङ्गव ॥४७॥
मया ते ज्ञापितं सर्वं भवान् युक्तं करोतु यत् ॥ इत्युदीरितमाकर्ण्य पृथुग्रीवेण वै मुने ॥४८॥
रोमपादमथाहूय पृष्टवान् तद्वचो ह्यहम् ॥ तत्सत्यमिति तेनोक्तं कण्डुं दृष्ट्वाऽतिकोपवान् ॥४९॥
विनिन्द्य कण्डुं बहुशो मोहात्तं ब्राह्मणोत्तमम् ॥ यस्मात्त्वमीदृशं कर्म कृतवान् विप्रगर्हितम् ॥५०॥
याहि मद्भवनाच्छीघ्रं यस्मात्त्वं ब्राह्मणाधमः ॥ इत्युदीरितमाकर्ण्य मद्वाक्यं ब्रह्मणोत्तमः ॥५१॥
साष्टाङ्गं प्रणिपत्योर्व्यां मां कृताञ्जलिरब्रवीत् ॥ स्वामिन् मद्वचनं सत्यं शृणु सम्यङ्महामुने ॥ ५२॥
दूर्वारसं फेनयुतं पिबामि पितृशासनात् ॥ नित्यं प्रातः समुत्थाय तज्ज्ञात्वा ब्राह्मणोत्तमौ ॥५३॥
मद्द्वेषादूचतुस्त्वेवं भवान् युक्तं करोतु यत् ॥ इत्युक्ते कण्डुना सम्यक् मयापि न विचारितम् ॥
५४॥
कुलाद्बहिष्कृतः सोपि ततः कण्डुः सुदुःखितः ॥ एतस्मिन्नन्तरे काले वागुवाचाशरीरिणी ॥५५॥
निष्पापोऽयं सत्यतप शिष्यस्ते भृगुनन्दन ॥ पृथुग्रीवेण मात्सर्यात् कूटमुक्तं तथोदितम् ॥५६॥
रोमपादेन तत्स्नेहात् तथैवोक्तं महामुने ॥ न विचार्य त्वया सम्यक् त्यक्तः स तु कुलाद्बहिः ॥
५७॥
तस्मात् त्वमपि विप्रर्षे किञ्चिद्दुष्कृतवानभूः ॥ एतत्पापविशुद्ध्यर्थं गच्छ गोकर्णमद्य वै ॥५८॥
तत्राश्रमपदं कृत्वा तपश्चर महामते ॥ महादेवप्रसादेन तव दोषो विनश्यति ॥५९॥
रोमपादस्य कण्डोश्च पृथुग्रीवस्य वै तथा ॥ इत्युक्त्वा मां तथा वाणी विरराम च तत्र वै ॥६०॥
ततः शिष्यैः समं गत्वा गोकर्णं क्षेत्रमुत्तमम् ॥ उदीच्यां रुद्रयोन्यास्तु अर्धक्रोशे मुनीश्वर ॥६१॥
गोकर्णक्षेत्रसीमायां स्थित्वा तु ह्यचरं तपः ॥ एवं बहुदिनेऽतीते शङ्करः शिवयान्वितः ॥६२॥
आविर्बभूव पुरतो मुनीनां भावितात्मनाम् ॥ तुष्टुवुः परमेशानं मुनयो वीतकल्मषाः ॥६३॥

नमो नमः कारणकारणाय त्रिशूलहस्ताय शिवान्विताय ॥

अघौघहन्त्रे प्रणतां जनानां त्रिलोचनायामिततेजसे नमः ॥६४॥

नमस्त्रिपुरसंहर्त्रे भक्तार्तिशमनाय ते ॥ नमः कालान्तक विभो पाहि नस्त्वं महेश्वर ॥६५॥

इति स्तुतो महादेवः स्वकपर्दाज्जहौ तदा ॥ गंङ्गां त्रैलोक्यजननीं सर्वलोकमनोहराम् ॥६६॥

समुद्रं प्रविवेशाथ गङ्गा त्रैलोक्यपावनी ॥ ततः प्रोवाच भगवान् शङ्करो भक्तवत्सलः ॥६७॥

एषा नदी पुण्यतमा शाल्मली नाम नामतः ॥ महापातकिनो ये च कूटसाक्षिणि संस्थिताः ॥६८॥

तेषां पुत्रा यदि स्नायुः पितॄनुद्दिश्य भक्तितः ॥ सर्वपापविनिर्मुक्ताः प्राप्नुयुः परमां गतिम् ॥६९॥

तस्माच्च छालूकिनी नाम्ना वदिष्यन्ति जना भुवि ॥ गोकर्णक्षेत्रसीमेयं भवेदेवं मुनीश्वराः ॥७०॥

अत्र स्नात्वा तु मुनयो यूयमत्र समाहिताः ॥ गोकर्णं क्षेत्रमासाद्य स्नात्वा तीर्थेषु सर्वशः ॥७१॥

महाबलं पूजयित्वा स्वस्थानं प्रति यास्यथ ॥ इत्युक्त्वा भगवान् शम्भुस्तत्रैवान्तरधीयत ॥७२॥

ततोऽहं शिष्यसहितः स्नात्वा नद्यां समाहितः ॥ गोकर्णं क्षेत्रमासाद्य स्नात्वा तीर्थेषु सर्वशः ॥७३॥

महाबलं पूजयित्वा स्वस्थानं प्रतिजग्मिवान् ॥ तस्मात् त्वं गच्छ भद्रन्ते गोकर्णं क्षेत्रमुत्तमम् ॥
७४॥

तत्र शालूकिनीतीरे जह्नो कृत्वाश्रमं शुभम् ॥ स्नानं कृत्वा तत्र नद्यां गङ्गमूर्तिं प्रपूजय ॥ ७५॥

एवमुक्त्वा सत्यतपो जह्नुं स्वैरगतिर्ययौ ॥

सूत उवाच ॥

पूर्वं गङ्गनदी ह्यासीत् कूटसाक्ष्याघनाशनात् ॥७६॥

पश्चाच्च छाल्मलीगङ्गा ऽभूत् सेयं पुण्यतमा नदी ॥ त्रिषु लोकेषु राजेन्द्र स्नातानां सर्वकामदा ॥७७॥

इतिश्रीस्कान्देसनत्कुमारंसंहितायां गोकर्णखण्डे शाल्मलिमहिमानुवर्णनंनाम षण्णवतितमोऽध्यायः ॥९६॥

सूत उवाच ॥

जह्नुः सत्यतपेनोक्तं वचः श्रुत्वा ततः परम् ॥ गोकर्णं क्षेत्रमासाद्य शाल्मल्याश्च तटे शुभे ॥१॥
कृत्वाश्रमपदं तत्र गङ्गामूर्तिं निधाय च ॥ स्नानं कुर्वन् कुरुश्रेष्ठ शाल्मल्यामरुणोदये ॥२॥
गङ्गाया विग्रहं नित्यं पूजयामास भक्तितः ॥ तुलासंस्थे दिनकरे कार्तिके तु विशेषतः ॥३॥
नृत्तगीतैश्च नैवेद्यैर्नमस्कारप्रदक्षिणैः ॥ स्तोत्रैरुपनिषद्भिश्च गङ्गानामसहस्रकैः ॥४॥
एवं पूजयतस्तस्य गङ्गा तुष्टा ह्यभून्नृप ॥ आश्वयुज्यसिते पक्षे अष्टम्यामरुणोदये ॥५॥
आविर्बभूव शाल्मल्यां नद्यां गङ्गा शिवैषिणी ॥ दिव्याम्बरधरा देवी दिव्यस्रगनुलेपना ॥६॥
सर्वाभरणदीप्ताङ्गी मन्दस्मितमुखाम्बुजा ॥ मत्तमातङ्गगमना ईषत्कुञ्चितमूर्धजा ॥७॥
एवंविधाकृतिर्गङ्गा जह्नुं प्राह मुदान्विता ॥ वरं वरय भद्रन्ते तुष्टाऽस्मि नितरां मुने ॥८॥
भक्त्या च नियमेनाद्य तपसा च दमेन च ॥ इत्युदीरितमाकर्ण्य गङ्गाया वचनं मुनिः ॥९॥
प्रणम्य दण्डवद्भूम्यां कृताञ्जलिरभाषत ॥

जह्नुरुवाच ॥

मातर्नमामि भजतां भवरोगवैद्ये भक्तार्तिभञ्जनपरे भवमौलिवासे ॥
भोगीशकल्पपदजे जनजीवरूपे गङ्गे प्रसीद सततं नमतां शरण्ये ॥१०॥
इन्द्रादिदेवनमिते जनसेविताङ्घ्रे कुन्देन्दुशङ्खरवधवले सुतरङ्गलोले ॥
स्वाभीष्टदाननिरतेऽभयदानशीले गङ्गे प्रसीद सततं नमतां शरण्ये ॥११॥
तापत्रयार्तिशमने तपनीयभूषे ताराधिपाभलपने तमसोऽपहन्त्रि ॥
तारावलीसदृशरत्नविभूषिताङ्गे गङ्गे प्रसीद सततं नमतां शरण्ये ॥१२॥
त्रय्यात्मिके त्रिपथगे त्रिगुणाभिरामे मायातिगे मकरकच्छपमत्स्यरूपे ॥
तीरद्वये ऋषिगणैश्च सुरैर्निषेव्ये गङ्गे प्रसीद सततं नमतां शरण्ये ॥१३॥
विश्वातिगे विमलरम्यजलाभिपूर्णे विश्वैकवन्दितपदे विलसत्कलापे ॥
ब्रह्मादिदेवपरिपूजितपादपद्मे गङ्गे प्रसीद सततं नमतां शरण्ये ॥१४॥
भुक्तिप्रदे त्रिभुवनैकशरण्यदेहे शक्त्यात्मिके सुरनरादिषु भक्तिलभ्ये ॥
भाग्यप्रदे भयहरे भजनीयरूपे गङ्गे प्रसीद सततं नमतां शरण्ये ॥१५॥
शम्भुप्रिये जननुते करुणावलोके लोलार्चिकुण्डलधरे त्रिजगत्पवित्रे ॥
मुक्तिप्रदे त्वयि निमग्नकलेवराणां गङ्गे प्रसीद सततं नमतां शरण्ये ॥१६॥

एवं परिस्तुत्य सुरापगां मुनिः पुनः प्रणम्याथ हिमाद्रिनन्दिनीम् ॥
श्लक्ष्णं तथा च मधुरं वचनं बभाषे प्रीत्या शनैश्च भवमोक्षविलोलजह्नुः ॥१७॥
वरं ददासि चेन्मह्यं वरार्हो यदि चाप्यहम् ॥ कृतो मयाऽपराधस्ते गङ्गेऽज्ञानाच्च मोहतः ॥१८॥
भगीरथं तिरस्कृत्य मया पीतासि भामिनि ॥ तत्पापं शमयाद्य त्वं वरमेतद्वृणोम्यहम् ॥१९॥
मया कृतमिदं स्तोत्रं स्नानकाले तु यः पठेत् ॥ त्वयि स्नानफलं दत्वा तस्मै देहि मनोरथान् ॥२०॥
अस्यां मूर्तौ सदा स्थित्वा पाहि लोकत्रयं शुभे ॥ अस्मिन् कालेऽत्र यः स्नात्वा तव मूर्तिं समर्चति ॥२१॥
भुक्तिं मुक्तिं स लभतु प्रसन्ना यदि मे शुभे ॥ इत्युक्त्वा स्वर्नदीं जह्नुस्तूष्णीमासीत्तदा नृप ॥२२॥
ततो गङ्गा मुदा युक्ता जह्नुं प्राह वचस्तदा ॥

गङ्गोवाच ॥

मोहेनैव त्वया जह्नो पीता चाहं द्विजोत्तम ॥२३॥
महामाया भगवती मोहयत्यनिशं जनान् ॥ बलात्कारेण विप्रर्षे सा चेतो ज्ञानिनामपि ॥२४॥
तस्मान्नास्ति त्वयि द्रोहो मत्प्रसादान्न संशयः ॥ यद्यदिच्छसि तत्सर्वं तुभ्यं दत्तं मया मुने ॥२५॥
आश्वयुज्यसिते पक्षे ह्यष्टम्यामरुणोदये ॥ नदीनदाः सर्वतीर्थैः सिद्धैः सुरगणैः सह ॥२६॥
आविर्भवन्त्यत्र नद्यां सर्वपापहरा नृणाम् ॥ तस्माद्गङ्गावली नाम्ना नदी ख्याता भविष्यति ॥२७॥
तस्मिन् कालेऽत्र यः स्नात्वा मन्मूर्तिं पूजयेन्मुने ॥ स्तोत्रेण त्वत्कृतेनैव मम नामसहस्रकैः ॥२८॥
इह दत्वा सर्वभोगान् तस्मै दास्यामि तत्पदम् ॥ त्वया कृतमिदं स्तोत्रं स्नानकाले तु यः पठेत् ॥२९॥
नद्यां तीर्थे गृहे वापि तस्याभीष्टं ददाम्यहम् ॥ तुलासंस्थे दिनकरे आश्विने मासि यो नरः ॥३०॥
स्नात्वाऽरुणोदये चात्र देवर्षिपितृतर्पणम् ॥ कृत्वा मत्पूजनं पश्चाद्गन्धपुष्पाक्षतादिभिः ॥३१॥
धूपदीपैश्च नैवेद्यैस्ताम्बूलैर्नृत्तगायनैः ॥ शक्त्या दानानि कुर्वीत ब्राह्मणान् भोजयेत् परम् ॥३२॥
स्वयं भुञ्जीत यतवाक् ब्रह्मचर्यपरायणः ॥ एवं मासं व्रतं कुर्वन् गङ्गाष्टम्यां विशेषतः ॥३३॥
पश्चाद्व्रतं समाप्याथ कुर्याद्ब्राह्मणतर्पणम् ॥ भक्त्या च नियमेनैव वित्तशाठ्यविवर्जितः ॥३४॥
एवं यः कुरुते तत्र तस्य पुण्यफलं शृणु ॥ आजन्मचरितं पापं स्वल्पं वा यदि वा बहु ॥३५॥
ब्रह्महत्यादिकं यच्च तत्सर्वं विलयं व्रजेत् ॥ इह भुक्त्वा सुविपुलान् भोगानभिमतान् परान् ॥३६॥

पुत्रपौत्रैः सह मुने अन्ते तत्परमं पदम् ॥ व्रजत्येव न सन्देहो मत्प्रसादान्महामुने ॥३७॥
एवं दत्वा वरं तस्मै जह्नवे भरतर्षभ ॥ तत्रैवान्तर्दधे मूर्तौ गङ्गा त्रिपथगामिनी ॥३८॥
एवं लब्ध्वा वरं जह्नुर्गोकर्णे वाञ्छितं परम् ॥ स्नात्वा तत्रत्यतीर्थेषु सम्पूज्य च महाबलम् ॥३९॥
स्वस्याश्रमं जगामाशु यथापूर्वमतिष्ठत ॥

## हिडिंबाश्रमोपक्रमः

सूत उवाच ॥

हिडिम्बायास्तथा पुण्यमाश्रमं श्रमनाशनम् ॥४०॥
पुरा हिडिम्बभगिनी राक्षसी कामरूपिणी ॥ भ्रातृद्रोहोद्भवेनैव पापेन महता युता ॥४१॥
पश्चात्तापेन संयुक्ता सख्या सह निशाचरी ॥ व्यासवाक्यात् समागम्य गोकर्णं क्षेत्रमुत्तमम् ॥४२॥
कृत्वाश्रमं पुण्यतीर्थं तपस्तप्त्वा सुदारुणम् ॥ अचिरात् पापमोक्षञ्च लब्ध्वा शम्भोरनुग्रहात्
॥४३॥
ततो धर्मानुजस्याऽभूद्भार्या सा कामरूपिणी ॥ तस्मादवाप्य तनयं यथाकाममतिष्ठत ॥४४॥
एतत्ते सर्वमाख्यातं किमन्यच्छ्रोतुमिच्छसि ॥

इतिश्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे शाल्मलीमहिमानुवर्णनं नाम सप्तनवतितमोऽध्यायाय: ॥९७॥

अध्यायाः अकारादि <<BACK ॥ अध्यायः ९८ ॥ NEXT>> श्लोक संख्या–८३

॥ हिडिम्बाश्रम वर्णनम् – नहुषश्रमवर्णनं–उपक्रमः ॥

## हिडिम्बाश्रम वर्णनम्

शतानीक उवाच ॥

भ्रातृद्रोहं कथं प्राप हिडिम्बा नाम राक्षसी ॥ कथं तया तपस्तप्तं गोकर्णे कुत्र चाश्रमम् ॥१॥
भ्रातृद्रोहात् कथं मुक्ता तन्मे वद महामते ॥

सूत उवाच ॥

शृणु राजन् प्रवक्ष्यामि रक्षस्याश्चरितं महत् ॥२॥

पुरा पाण्डुसुता राजन् तव पूर्वपितामहाः ॥ लाक्षागृहे वसन्ति स्म मात्रा सह परन्तप ॥३॥

राज्ञा दुर्योधनेनैव कारिते कपटेन हि ॥ एकदा निशि पर्यङ्के सुप्ते मातरि भ्रातृभिः ॥४॥

तदार्धरात्रसमये गृहे दत्वा हुताशनम् ॥ भीमो धृत्वाथ तन्मञ्चं शिरसा भरतर्षभ ॥५॥

पाण्डवाधिष्ठितं वेगाद्विश्वकर्मकृते बिले ॥ ययौ भरतशार्दूलो भीमो भीमपराक्रमः ॥६॥

क्षणान्निर्गम्य च बिलाद्विपिनं प्रविवेश ह ॥ भगिन्या सह तत्रस्थो हिडिम्बो नाम राक्षसः ॥७॥

मानुषं गन्धमाघ्राय भगिनीं प्राह तत्क्षणात् ॥

हिडिम्ब उवाच ॥

भगिनि शृणु मद्वाक्यं मानवोऽत्र समागतः ॥८॥

त्वं गत्वा मार्गयित्वा तु तं समानय माऽचिरम् ॥ इति भ्रातृवचः श्रुत्वा हिडिम्बा कामरूपिणी ॥९॥

मुदा परमया युक्ता ययौ मार्गयितुं नरम् ॥ मृगयित्वा वनं सर्वं क्रमेण परितस्तदा ॥१०॥

ददर्श पाण्डवान् सुप्तान् पर्यङ्के सा निशाचरी ॥ मात्रा कुन्त्या समं राजन् तेषां निकटमागता ॥११॥

तत्रापश्यद्भीमसेनं रूपे मदनसम्मतम् ॥ तं दृष्ट्वा राक्षसी भीमं कन्दर्पवशगाऽभवत् ॥१२॥

मानुषं रूपमास्थाय तदा भीममुवाच ह ॥

हिडिम्बोवाच ॥

कस्त्वं भवान् महाकाय वनेऽस्मिन्नकुतोभयः ॥१३॥

कस्माद्वने तिष्ठसि त्वं हिडिम्बस्य भयङ्करे ॥ क इमे शयिता मञ्चे पुरुषा देवरूपिणः ॥१४॥

केयं रूपवती रीत्या मे च सर्वाङ्गसुन्दरी ॥ हिडिम्बो नाम दैत्येन्द्रो ह्यत्र तिष्ठति पापधीः ॥१५॥

तस्यानुजाऽहं सम्प्राप्ता तस्य वाक्येन चात्र वै ॥ पिशितं भोक्तुकामस्य युष्माकं पुरुषर्षभ ॥१६॥

दृष्ट्वाऽहं त्वां दिव्यरूपं कन्दर्पवशमागता ॥ भार्या तव भविष्यामि अद्यप्रभृति शोभना ॥१७॥

नेच्छामि चान्यं पुरुषं सत्यमेतद्ब्रवीमि ते ॥ तस्माद्गृहाण मत्पाणिं रमयस्व यथासुखम् ॥१८॥

भयाद्राक्षसराजस्य मोचयिष्याम्यहं क्षणात् ॥

भीम उवाच ॥

भ्राताऽस्ति मम धर्मात्मा तस्य भार्यापरिग्रहः ॥१९॥

नाभूत् तस्मादहं त्वां वै नेच्छामि पिशिताशिनि ॥ नास्ति रक्षोभयं मेद्य तथा गान्धर्वदैवतम् ॥२०॥

तस्माद्गच्छ यथाकामं राक्षसि भ्रातृसन्निधिम् ॥

सूत उवाच ॥

एतस्मिन्नन्तरे काले हिडिम्बो नाम राक्षसः ॥२१॥
क्रोधेन महता युक्तः स्वयमेवाययौ नृप ॥ स दृष्ट्वा पाण्डुतनयान् भगिनीं स्वां च भामिनीम् ॥
२२॥
उद्वृत्तनयनः क्रूरो दन्तान् दन्तैश्च सन्दशन् ॥ तेषां समीपमागत्य तस्थौ सिंहो यथा नृप ॥२३॥
दृष्ट्वा भ्रातरमत्युग्रं हिडिम्बा भयविह्वला ॥ भीमसेनमिदं प्राह वचनं सा वराङ्गना ॥२४॥

हिडिम्बोवाच ॥

भ्राता मम समायातः कोपेनातिभयङ्करः ॥ कुरु मद्वचनं सौम्य महद्भयमुपस्थितम् ॥२५॥
अहं कामचरी नाथ नेष्यामि त्वां सबान्धवम् ॥ विहायसाऽद्य वेगेन तस्मादारुह मद्वपुः ॥२६॥

भीमोवाच ॥

मयि स्थितेऽनवद्याङ्गि देवेभ्योऽपि भयं न हि ॥ किमु रक्षोगणाद्धोरान्मा भैस्त्वं वरवर्णिनि ॥२७॥
मद्बलं त्वं न जानासि रणे पश्याद्य मद्बलम् ॥

सूत उवाच ॥

श्रुत्वा भीमस्य वचनं भगिन्या वचनं तथा ॥२८॥
रक्षो दृष्ट्वा तु भगिनीं मानुषं वपुरास्थिताम् ॥ इदमाह दुराचारे हिडिम्बे च कुलाधमे ॥२९॥
रक्षोदैत्यकुलानां वै सर्वेषामयशस्करि ॥ त्वामद्य हत्वा मनुजैः साकं भोक्ष्ये यथासुखम् ॥३०॥
इत्युक्त्वा भगिनीं सोऽपि कोपात् संरक्तलोचनः ॥ उत्पाट्य वृक्षं तरसा भगिनीं हन्तुमुद्यतः ॥३१॥
तं दृष्ट्वा भीमसेनोऽथ हिडिम्बं प्राह भारत ॥ हन्तुं नार्हसि दैत्येन्द्र भगिनीं त्वमनागसीम् ॥३२॥
भीमेन कलहो माऽस्तु यदि त्वं सुखमिच्छसि ॥ भवेद्यदि रतिर्युद्धे कुरु युद्धं मया सह ॥३३॥
भगिन्या किं कृतं तेऽद्य मन्मथेन कृतं त्विदम् ॥ तस्मान्मा कुरु दुर्बुद्धे मतिं स्त्रीहनने खल ॥३४॥
मयि तिष्ठति दुर्बुद्धे कथं स्त्रीवधमिच्छसि ॥ त्वां निहत्य रणे दैत्य नेष्येऽद्य च यमालयम् ॥३५॥
इत्युक्तो भीमसेनेन हिडिम्बो राक्षसाधमः ॥ कोपेन महताऽऽविष्टो भीमं वचनमब्रवीत् ॥३६॥
वृथा विकत्थसे मूढ मम दर्शय विक्रमम् ॥ इत्युक्त्वा क्रोधताम्राक्षो भीममभ्यद्रवत्तदा ॥३७॥
करेण वृक्षमुत्पाट्य जघनोपरि भारत ॥ भीमोऽच्छिनत्तं वृक्षं वै लीलया भरतर्षभ ॥३८॥
ततस्तं भीमसेनोपि जघानोरसि मुष्टिना ॥ समौ तौ भीमकर्माणौ युयुधाते परस्परम् ॥३९॥
ततस्तु भीमसेनस्तु वज्रनिष्ठुरमुष्टिना ॥ जघान शिरसि क्रुद्धो स गतासुः पपात च ॥४०॥
भ्रातरं निहतं दृष्ट्वा हिडिम्बा भरतर्षभ ॥ मुदा परमया युक्ता भीमं वचनमब्रवीत् ॥४१॥

दिष्ट्या समाहतः पापो भ्राता मम महामते ॥ त्रैलोक्ये त्वत्समो नास्ति विक्रमे पुरुषर्षभ ॥४२॥

रमयस्व यथाकामं मामद्यात्र न संशयः ॥ इत्युदीरितमाकर्ण्य भीमस्तां प्रत्युवाच ह ॥४३॥

हिडिम्बे शृणु मद्वाक्यं भ्राता मे परमो गुरुः ॥ तस्याज्ञां न विना चाहं वर्तयामि कथञ्चन ॥४४॥

याहि त्वं तस्य निकटे तं प्रार्थय युधिष्ठिरम् ॥ इति भाषितमाकर्ण्य पाण्डवेन निशाचरी ॥४५॥

युधिष्ठिरस्य निकटे गत्वा सर्वान् ददर्श सा ॥ युधिष्ठिरं तथा कुन्तिं अर्जुनं यमलौ तथा ॥४६॥

युधिष्ठिरं प्रणम्याथ हिडिम्बा वाक्यमब्रवीत् ॥

हिडिम्बोवाच ॥

युधिष्ठिर महाराज शृणु मेऽद्य मनोगतम् ॥४७॥

हिडिम्बभगिनी चाहं भ्रात्राज्ञप्ता समागता ॥ युष्मद्वधार्थं वेगेन दृष्ट्वा भीमं तवानुजम् ॥४८॥

मन्मथाविष्टहृदया ह्यभवं तत्क्षणाद्वशम् ॥ ततोऽहं दिव्यरूपेण मानुषेण तमब्रुवम् ॥४९॥

भ्रातुराज्ञां मद्गतं सर्वं विज्ञाप्य तस्य वै ॥ स्थिता तस्य समीपेऽहं हिडिम्बस्तत्र चागतः ॥५०॥

मां दृष्ट्वा हन्तुमुद्युक्तं ततो भीमः प्रकोपवान् ॥ हिडिम्बं तु जघानाशु भ्रातरं मम मानद ॥५१॥

भीमस्य च बलं दृष्ट्वा तुष्टाऽहमभवं नृप ॥ पतिर्भव ममेत्युक्तं मया शत्रुनिबर्हण ॥५२॥

मामुवाच स भीमोऽथ भ्राता मे वर्ततेऽनघे ॥ तं विनाहं न वोढास्मि तस्माद्गच्छ युधिष्ठिरम् ॥५३॥

इत्युक्ते भीमसेनेन आगताऽहं तवान्तिकम् ॥ गृहाण मां धर्मराज तव सन्निधिमागताम् ॥५४॥

एतस्मिन्नन्तरे काले प्राप्तः सत्यवतीसुतः ॥ अभ्युत्थायासनं दत्वा भ्रातृभिः सह धर्मजः ॥५५॥

कुशलं परिपप्रच्छ पूजयामास तं मुदा ॥ उपविष्टस्तदा तत्र व्यासः पाण्डुसुतैः सह ॥५६॥

द्वैपायनं तदा दृष्ट्वा हिडिम्बा भरतर्षभ ॥ प्रणम्य दण्डवद्भूमौ कृताञ्जलिरभाषत ॥५७॥

मुने शृणुष्व मद्वाक्यं हिडिम्बभगिनी ह्यहम् ॥ मद्वाक्याद् भीमसेनस्तु भ्रातरं हतवान् मम ॥५८॥

पतिर्भव ममेत्युक्ते भीमसेनोऽप्युवाच ह ॥ भ्राता मे वर्तते तन्वि तं विनाऽहं न कामये ॥५९॥

इत्युक्ता भीमसेनेन युधिष्ठिरमुपागता ॥ तव सन्दर्शनं जातं भवान् युक्तं करोतु यत् ॥६०॥

व्यास उवाच ॥

शृणु राक्षसि मद्वाक्यं भ्रातृद्रोहस्त्वया कृतः ॥ तद्दोषपरिहारार्थं गच्छ गोकर्णमद्य वै ॥६१॥

आस्ते ममाश्रमं तत्र कोटितीर्थस्य पूर्वतः ॥ तस्मात् प्राच्यां दिशि शुभे स्थलं कृत्वाश्रमं शुभम् ॥
६२॥

तपश्चर महाभागे ततः शम्भुप्रसादतः ॥ भ्रातृद्रोहोद्भवो दोषो लयमेष्यति चाचिरम् ॥६३॥

भीमसेनस्ततः सुभ्रु भविष्यति पतिस्तव ॥ तस्मात् पुत्रमवाप्याथ यथाकामं चरिष्यसि ॥६४॥

इति व्यासवचः श्रुत्वा हिडिम्बा भरतर्षभ ॥ गोकर्णं क्षेत्रमासाद्य व्यासाश्रमसमीपतः ॥६५॥

शरपातद्वयमिते देशे प्राच्यां कुरूद्वह ॥ तीर्थं कृत्वा सुविमलं नियताऽनन्यमानसा ॥६६॥

अपूजयत् सदा भक्त्या उमासहितमीश्वरम् ॥ मासमेकं निराहारा चचार परमं तपः ॥६७॥

ततस्तत्तपसा तुष्टः पार्वत्या सहितः शिवः ॥ वरं वरय तन्वङ्गी यत्तेऽभिलषितं हृदि ॥५८॥

तद्दाम्यविलम्बेन यद्यपि स्यात् सुदुर्लभम् ॥

हिडिबोवाच ॥

भ्रातृद्रोहोद्भवो दोषो लयमेतु महेश्वर ॥६९॥

भीमसेनं पतिं प्राप्य रमिष्येऽहं यथासुखम् ॥ तीर्थमेतन्महादेव सर्वपापहरं भवेत् ॥७०॥

इति तद्वचनं श्रुत्वा उवाच परमेश्वरः ॥ तव दोषो लयं प्राप्तो दर्शनान्मम मानदे ॥ ७१॥

भीमसेनं पतिं प्राप्य तस्मात् पुत्रमवाप्स्यसि ॥ तीर्थमेतन्महाभागे सर्वपापहरं भवेत् ॥७२॥

वैशाखे मासि शुक्ले तु दशम्या मत्र चागतः ॥ तव तीर्थे वरारोहे स्नानं कुर्यान्नरोत्तमः ॥७३॥

तस्य पापानि सर्वाणि लयं यान्ति क्षणार्धतः ॥ इति दत्वा वरं तस्यै तत्रैवान्तर्दधे शिवः ॥७४॥

ततो हिडिम्बा नृपते वरं प्राप्य महेश्वरात् ॥ भीमसेनं पतिं प्राप्य तस्मात् पुत्रमवाप्य च ॥७५॥

घटोत्कचं नाम नृप सर्वलक्षणलक्षितम् ॥ यथाकामं सा चचार हिडिम्बा कामरूपिणी ॥७६॥

---

## नहुषश्रमवर्णनं–उपक्रमः

सूत उवाच ॥

अथान्यदस्ति राजेन्द्र नहुषस्याश्रमं शुभम् ॥ सर्वपापप्रशमनं साम्राज्यफलदं नृणाम् ॥ ७७॥

अश्वमेधशतं कृत्वा नहुषो राजसत्तमः ॥ प्राप्य शक्रपदं राजा अगस्त्यस्यावमानतः ॥ ७८॥

च्युतः शक्रपदाद्राजा भूलोकं प्राप्तवान् क्षणात् ॥ दुःखेन महता युक्तो मुनिशापान्नृपस्तदा ॥७९॥

व्यालो भूत्वा तु सुचिरं ततः स्वं रूपमाप्तवान् ॥ ततः स्वगुरुवाक्येन गोकर्णं क्षेत्रमागमत् ॥८०॥

प्राच्यां वैवाहिकगिरेः शरपातद्वयावधि ॥ कृत्वाश्रमपदं तत्र तीर्थं कृत्वा सुनिर्मलम् ॥ ८१ ॥

तपश्चचार सुचिरं वातपर्णाम्बुभुक् सदा ॥ ततः शिवप्रसादेन पुनः स्वर्गमवाप्तवान् ॥ ८२ ॥

एतत्ते सर्वमख्यातं किमन्यच्छ्रोतुमिच्छसि ॥

इतिश्री स्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे हिडिम्बाश्रम वर्णनं नाम अष्टनवतितमोऽध्यायः

।।९८।।

 अध्यायाः अकारादि <<BACK  ॥ अध्यायः ९९ ॥  NEXT>>  श्लोक संख्या–४८

॥ नहुषश्रमवर्णने–नहुषेन्द्रपदप्राप्तिः ॥

## नहुषकथोपक्रमः

॥ शतानीक उवाच ॥

सूत प्राज्ञ माहाभाग पुराणार्थविशारद ॥ कस्य वंशेऽभवच्छ्रीमान् नहुषो राजसत्तमः ॥ १ ॥
अश्वमेध शतं कृत्वा प्राप्य चैन्द्रपदं महत् ॥ चकार मुनिवर्यस्य किमर्थं चावमाननम् ॥ २॥
तस्य शापेन नृपतिर्व्यालत्वं प्राप्तवान् कथम् ॥ एतत्सर्वं च मे शंस विस्तरात् सूतनन्दन ॥३ ॥

सूत उवाच ॥

चन्द्रवंशोद्भवः श्रीमान् राजा परमधार्मिकः ॥ पुरूरव इति ख्यातः सर्वज्ञः सर्वसङ्गरः ॥४॥
तस्य पुत्रो महाभाग आयुर्नामातिवीर्यवान् ॥ पितर्युपरते सोऽपि पालयामास मेदिनीम् ॥५॥
दानधर्मरतो नित्यं भक्तः शिवमुकुन्दयोः ॥ ईजे च बहुभिर्यज्ञैरश्वमेधादिभिर्नृपः ॥६ ॥
ततः कालेन महता तस्य जज्ञे कुमारकः ॥ नहुषो नाम तेजस्वी सोमवंशविवर्धनः ॥७॥
पुत्रं दृष्ट्वाऽतिहर्षेण आयुर्नाम महीपतिः ॥ चकार जातकर्मादि द्वादशेऽहनि नाम च ॥८॥
पोषयामास हर्षेण लालयन् सह भार्यया ॥ एवं कालेषु गच्छत्सु मौञ्जीबन्धं चकार सः ॥९॥
ततो गुरुकुले नीतस्तत्र विद्यामवाप सः ॥ आयुर्वेदं धनुर्वेदं सर्वविद्यामधीतवान् ॥१०॥
ततो विवाहमकरोत् एवं तं च नृपोत्तमः ॥ समर्थं तनयं ज्ञात्वा राज्यभारं प्रदत्तवान् ॥११॥
भार्यया सह धर्मात्मा कालधर्ममुपेयिवान् ॥ ततो भरतशार्दूल नहुषस्तस्य चात्मजः ॥१२॥
शशास सकलां पृथ्वीं सामात्यः सपुरोहितः ॥ सप्तद्वीपान् वशे कृत्वा राजसूयं चकार सः ॥ १३॥
एवं प्रशासति नृपे जना आसन् स्वधर्मिणः ॥ ततः कतिपयाहःसु गतेषु नृपसत्तमः ॥१४॥
प्राप्तमैन्द्रपदं राजा शशास गुरुवाक्यतः ॥ अश्वमेधशतं राजा निर्विघ्नेन चकार ह ॥१५ ॥
तदा देवपुरे शक्रो देवर्षिभिरभिष्टुतः ॥ सम्प्रार्थितो वृत्रवधे लोकस्य सुखकारणात् ॥१६॥
ततो वज्रेण तं हत्वा हते वृत्रासुरे हरिः ॥ स तद्वधेन च ब्रह्महत्यया पीडितो ह्यभूत् ॥१७॥
दुःखेन महता युक्तः स्वपुरान्निर्ययौ क्षणात् ॥ भूलोकं प्राप्य मघवा बभ्राम पृथिवीतले ॥१८॥

नाना तीर्थाश्रमान् देशान्नाना क्षेत्राणि भूरिशः ॥ उचथ्याश्रममासाद्य ऋषिपत्नीं च दृष्टवान् ॥१९॥
तद्रूपमोहितस्तत्र ऋषिपत्नीं च पश्यतः ॥ ततो रेतः प्रचस्कन्द शक्रस्य नृपसत्तम ॥२०॥
स्वरेतःपतनं दृष्ट्वा भीतो ऋषिभयाद्धरिः ॥ ययौ तस्याश्रमाद्राजन् ब्रह्महत्या प्रपीडितः ॥२१॥
मेरोरुत्तरदिग्भागे दुःखेन महता युतः ॥ रम्यकं खण्डमासाद्य स्थितस्तत्र पुरन्दरः ॥२२॥
तत्रापि शर्म नावाप ब्रह्महत्यावृतो भृशम् ॥ ततो हिरण्मयं प्राप खण्डं सिद्धनिषेवितम् ॥२३॥
तत्र स्थित्वा कियत्कालं मघवा भरतर्षभ ॥ ततः प्रापोत्तरकुरुखण्डं मुनिनिषेवितम् ॥२४॥
तत्र दृष्ट्वा कुरुश्रेष्ठ मानसं सर उत्तमम् ॥ शोभितं स्वर्णकमलैः सुगन्धैः कुमुदोत्पलैः ॥२५॥
तथा हंसैश्चक्रवाकैर्नाना पक्षिभिरावृतम् ॥ तत्रापि शर्म नावाप किङ्करोमीत्यचिन्तयत् ॥२६ ॥
ततः सूक्ष्मतनुर्भूत्वा पुष्करान्तः प्रविष्टवान् ॥ तस्य नालं प्रविश्याथ उवास भरतर्षभ ॥२७॥
सहस्रवर्षपर्यन्तं निर्भयेन पुरन्दरः ॥ ततो देवगणाः सर्वे दुःखेन महता युताः ॥२८॥
मृगयित्वा सहस्राक्षं न दृष्ट्वा क्वापि भारत ॥ गुरोः समीपं गत्वा ते नत्वा प्रोचुर्गुरुं नृप ॥२९॥
मृगयित्वा वयं सर्वे सहस्राक्षं बृहस्पते ॥ न दृष्ट्वा क्वापि राजानं त्वत्पादकमलं गताः ॥३०॥
अराजको ह्ययं स्वर्गो ह्यभूत् त्रिभुवनं तथा ॥ किं कर्तव्यमितोऽस्माभिरुपायं वद साम्प्रतम् ॥३१॥
इत्युक्तो देवतावृन्दैर्बृहस्पतिरुदारधीः ॥ ध्यात्वा मुहूर्तं राजेन्द ,हृदि तत्कारणं द्विजः ॥३२॥
ज्ञात्वोपायं तदा जीवो त्रिदशानिदमब्रवीत् ॥ शृणुध्वं देवताः सर्वे तदुपायं वदाम्यहम् ॥३३॥
चन्द्रवंशोद्भवः श्रीमान्नहुषो राजसत्तमः ॥ भूलोकं स्ववशे कृत्वा इन्द्रत्वं प्राप्तुमैच्छत ॥३४॥
अपृच्छत् स गुरुं राजा पदमैन्द्रं कथं लभेत् ॥ तच्छ्रुत्वा राजवचनं गर्गो राजानमब्रवीत् ॥३५॥
वाञ्छा ते चेच्छक्रपदे अश्वमेधशतं कुरु ॥ इत्युक्तो गुरुणा राजा अश्वमेधशतं व्यधात् ॥३६॥
निर्विघ्नेन नृपश्रेष्ठो गुरुणा सह मन्त्रिभिः ॥ सर्वे यूयं तत्समीपं गत्वा राजानमञ्जसा ॥३७॥
पूजयित्वा यथान्यायं दिव्यस्रगनुलेपनैः ॥ विमाने तं समारोप्य नानावाद्यरवैः सह ॥३८॥
समानयन्तु खर्लोकं नहुषं त्रिदशा द्रुतम् ॥ इत्युक्ता देवताः सर्वा गुरूणा भरतर्षभ ॥३९॥
मुदा परमया युक्ता भूलोकं प्रययुः क्षणात् ॥ नहुषस्य पुरं प्राप्य ददृशुस्तं नृपासने ॥४०॥
सभायां सेव्यमानं च नानादेशाधिपैर्नृपैः ॥ नत्वा ते दण्डवद्भूमौ पुष्पवृष्टिं ववर्षिरे ॥४१॥
राज्ञोपरि कुरुश्रेष्ठ वचनं चेदमब्रुवन् ॥ स्वर्गं गच्छ महाभाग पत्न्या सह नृपोत्तम ॥४२॥
प्राप्येन्द्रपदवीं चाद्य त्रैलोक्यं पालयस्व भो ॥ इत्युक्त्वा नहुषं देवास्तस्मै दिव्यतनुं ददुः ॥४३॥
दिव्याम्बरैर्दिव्यरत्नैर्दिव्यस्रगनुलेपनैः ॥ किरीटहारकेयूरैर्भूषयित्वा नृपं सुराः ॥४४॥

दिव्यं विमानमारोप्य नानावाद्यरवैः सह ॥ नृत्तगीतैर्बहुविधैर्व्यजनैरप्यवीजयन् ॥४५॥
त्रिविष्टपं ययुर्देवा राज्ञा तेन समन्विताः ॥ स्थापयित्वा पदे चैन्द्रे गुरुणा सह भारत ॥४६॥
अभिषिच्य यथान्यायं नहुषं समपूजयन् ॥ सम्प्राप्य राजा नहुषो ऐन्द्रं पदमनुत्तमम् ॥४७॥
पालयामास धर्मेण तदा त्रिभुवनं नृप ॥
इतिश्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे नहुषेन्द्रपदप्राप्तिर्नाम एकोनशततमोऽध्यायः ॥९९॥

 अध्यायाः अकारादि <<BACK  ॥ अध्यायः १०० ॥  NEXT>>  श्लोक संख्या–७४

॥ नहुषाश्रम वर्णनं –उपसंहारः॥

## नहुषकथा–उपसंहारः

सूत उवाच ॥
इन्द्रत्वं प्राप्य नहुषः प्रशशास दिवौकसान् ॥ उवास सुचिरं कालं सुखेन भरतर्षभ ॥१॥
ततः कतिपयाहःसु गतेषु नृपपुङ्गवः ॥ कदाचिद्दृष्टवान्राजा इन्द्राणीं वरवर्णिनीम् ॥२॥
तस्या रूपं समीक्ष्यैव मोहितो नृपपुङ्गवः ॥ तां भोक्तुकामो नृपतिरिन्द्राणीं काममोहितः ॥३॥
उवाच तां शचीं राजा एहि मत्सन्निधिं प्रिये ॥ भर्ताहं तव चार्वङ्गि भोगो मे सम्प्रदीयताम् ॥४॥
इत्युक्त्वा तां समादातुमुद्यमं कृतवन्नृपः ॥ शची तन्मतमाज्ञाय भयात् तस्माद्ययौ क्षणात् ॥५॥
गुरोर्गेहं कुरुश्रेष्ठ तमेव शरणं गता ॥ न शशाक तदा राजा तां भोक्तुं भरतर्षभ ॥६॥
तदा देवान् समाहूय इदं वचनमब्रवीत् ॥ देवाः शृणुत मद्वाक्यं इन्द्राणी महिषी मम ॥७॥
तामानयध्वं त्रिदशा मृगयित्वा ममान्तिकम् ॥ शीघ्रं नो चेद्दण्डयामि युष्मान् समुचितं सुराः ॥८॥
तच्छ्रुत्वा नृपतेर्वाक्यं त्रिदशा विह्वला भृशम् ॥ इन्द्राणीं मार्गयिष्यामो शासनात् तव साम्प्रतम्
॥९॥
इत्युक्त्वा नहुषं सर्वे ययुर्गेहं बृहस्पतेः ॥ गुरोः सकाशे तिष्ठन्तीं ददृशुस्ते शचीं सुराः ॥१०॥
दण्डवत् प्रणिपत्योचुर्गुरुं देवीं च भारत ॥
देवा ऊचुः ॥
आङ्गिरस महाभाग त्वामद्य शरणं गताः ॥११॥
नहुषेण समादिष्टाः कामान्धेन बलीयसा ॥ इन्द्राणीं मृगयित्वाशु आनयन्तु ममान्तिकम् ॥१२॥

इति राज्ञोदितं श्रुत्वा वयं सर्वे भयार्दिताः ॥ किं कर्तव्यमितोऽस्माभिर् गुरो तद्ब्रूहि साम्प्रतम् ॥१३॥
इत्युक्तो देवतासङ्घैर्बृहस्पतिरुदारधीः ॥ इन्द्राण्या सह सम्मन्त्र्य ज्ञात्वा तस्य प्रतिक्रियाम् ॥१४॥
देवान् सर्वान् समाहूय इदं वचनमब्रवीत् ॥ गत्वाद्य नहुषं ब्रूत यूयं मद्वाक्यगौरवात् ॥१५॥
राजन् व्रतस्था चेन्द्राणी दृष्टाऽस्माभिर्गुरोर्गृहे ॥ त्वया यदुक्तं तत्सर्वं तस्यै सम्यङ्निवेदितम् ॥१६॥
शासनं तव राजेन्द्र श्रुत्वा देवी मुदान्विता ॥ तदाऽब्रवीच्छचीदेवी अस्मान् सुहृदया गिरा ॥ १७॥
व्रतस्था किञ्चरोम्यद्य तस्माद्यूयं गमिष्यथ ॥ गत्वा राजान्तिकं देवा इदं ब्रूत नृपं सुराः ॥ १८ ॥
गुरूपदिष्टविधिना व्रतस्था नियमान्विता ॥ षण्मासान्ते व्रतं पूर्णं मम राजन् भविष्यति ॥१९॥
तदा त्वं यानमारुह्य ईड्यमानो महर्षिभिः ॥ मत्सकाशं समायाहि तदा सङ्गो भवेन्मयि ॥२०॥
युष्माभिरेवं सम्प्रोक्ते राजा प्रीतो भविष्यति ॥ एवं गुरोर्वचः श्रुत्वा देवास्तत्सन्निधिं ययुः ॥२१॥
प्रणिपत्य नृपं प्रोचुर्यदुक्तं गुरुणा वचः ॥ तच्छ्रुत्वा राजशार्दूलो देवैराभाषितं वचः ॥२२॥
मुदा परमया युक्तो आस कालं प्रतीक्षयन् ॥ कदाऽहं रमयिष्यामि इन्द्राणीमिति चिन्तयन् ॥२३॥
एवं चिन्तयतो राज्ञः समायात् समयश्च सः ॥ तदाहूय ऋषीन् सप्त अगस्त्येन समन्वितान् ॥२४॥
दिव्यगन्धानुलिप्ताङ्गो दिव्याभरणभूषितः ॥ कोटिसूर्यप्रतीकाशं विमानं च समारुहत् ॥२५॥
ईड्यमानो मुनीन्द्रैस्तु कामेन कलुषीकृतः ॥ संस्तूयमानो मुनिभिर्गन्धर्वाणां च गायनैः ॥२६॥
नृत्तैरप्सरसां चैव व्यजनैरभिवीजितः ॥ अग्न्यादिभिर्देवगणैः सेव्यमानो मुदान्वितः ॥२७॥
नानावाद्यरवैः सार्धं निर्ययौ देवमन्दिरात् ॥ ऋषयोऽपि महात्मानो यानं धृत्वा शनैर्ययुः ॥२८॥
तदा राजा ऋषीन् प्राह वचनं चातिमोहतः ॥ ऋषयो गम्यतां वेगादिन्द्राण्याश्च निवेशनम् ॥२९॥
नहुषेणेरितं वाक्यं श्रुत्वा गर्वसमन्वितम् ॥ क्रोधेन महताविष्टा बभूवुर्ऋषयो नृप ॥३०॥
अगस्त्यश्च शशापैनं क्रोधरक्तान्तलोचनः ॥ राजानं गर्वसंयुक्तं कामोपहतचेतसम् ॥३१॥
यस्मात्त्वमद्य नहुष कामार्तो ह्यतिगर्वितः ॥ तस्माद्गृहाण मच्छापं दारुणं चातिगर्हितम् ॥३२॥
पदादैन्द्राच्च्युतो भूत्वा पृथिव्यां त्वं नृपाधम ॥ दीर्घकायो ह्यजगरो भव त्वं मम शापतः ॥३३॥
अगस्त्येनेरितं वाक्यं श्रुत्वा राजाऽतिविह्वलः ॥ विमानादवरुह्याशु दण्डवत् प्रणनाम तम् ॥३४॥
उवाच चापराधो मे क्षन्तव्यो मुनिपुङ्गव ॥ दीनान्धकृपणेष्वेव दयां कुर्वन्ति साधवः ॥३५॥
मोहान्मया मुनिश्रेष्ठ यूयमद्यावमानिताः ॥ शरणं वः प्रपन्नोऽहं प्रसन्ना भवथाधुना ॥३६॥
इति कारुण्यवचनं शुश्रुवुर्मुनिपुङ्गवाः ॥ राजानमब्रवीद् वाक्यं कुम्भयोनिर्दयायुतः ॥३७॥
मच्छापो नान्यथा भूयात् कदाचिदपि पार्थिव ॥ तथापि त्वयि कारुण्यात् करिष्ये ह्यवधिं नृप ॥३८॥

मेरोरुत्तरदिग्भागे कदलीवनपृष्ठतः ॥ दीर्घदेहो ह्यजगरो भव त्वं सुचिरं नृप ॥३९॥
अवतारयेद्यदा वंशे तव राजन् महेश्वरः ॥ पञ्चरूपेण चांशेन कौरवाणां वधाय च ॥४०॥
वायोरंशसमुद्भूतो भीमनामा तवान्तिकम् ॥ यदाऽऽयाति तदा राजन् त्वं गिलिष्यसि पाण्डवम् ॥४१॥

ततः पापविमोक्षस्ते मत्प्रसादाद्भविष्यति ॥ ततः स्वं रूपमास्थाय गमिष्यसि गुरोर्गृहम् ॥४२॥
पूजयित्वा गुरुं सम्यक् तस्य वाक्यात्ततो नृप ॥ गोकर्णं क्षेत्रमासाद्य कृत्वाश्रमपदं शुभम् ॥४३॥
लिङ्गं संस्थाप्य विधिवच्चरिष्यसि तपो नृप ॥ ततः शिवप्रसादेन देवलोको भवेत्तव ॥४४॥
देवलोके चिरं स्थित्वा इन्द्रवद्भोगमाप्स्यति ॥ इत्युक्त्वा नहुषं राजन्नगस्त्यो भगवान् ऋषिः ॥४५॥

तत्रैवादर्शनं यातो ऋषिभिः सह तत्क्षणात् ॥ ततश्च्युतः शक्रपदान्नहुषो भरतर्षभ ॥४६॥
मेरोरुत्तरदिग्भागे अभूदजगरो महान् ॥ ततो बहुतिथे काले वायोरंशसमुद्भवः ॥४७॥
धर्मराजानुजो भीमो द्रौपद्याः प्रियकाम्यया ॥ स्वर्णपङ्कजमानेतुं मेरोरुत्तरमाविशत् ॥४८॥
ततो ह्यजगरो भीमं समीपस्थं समग्रसत् ॥ गदया भीमसेनोऽपि दारयामास तत्क्षणात् ॥४९॥
तद्गदास्पर्शमात्रेण मुक्तशापो नृपो ह्यभूत् ॥ जातिस्मरत्वं सम्प्राप्य नत्वा भीमं ययौ क्षणात् ॥५०॥

---

## नहुषाश्रमम्

स्वगुरोर्निकटे गत्वा गुरुं दृष्ट्वाऽभ्यवादयत् ॥ पूजयित्वा यथान्यायं स्ववृत्तान्तं न्यवेदयत् ॥५१॥
शापानुग्रहणं चैव अगस्त्यस्य कुरूद्वह ॥ तच्छ्रुत्वा राजवचनं प्रसन्नोऽभूत् तदा द्विजः ॥५२॥
तस्मै ज्ञानोपदेशं च कृत्वा वचनमब्रवीत् ॥ गच्छ गोकर्णमद्यैव शासनान्मम सुव्रत ॥५३॥
तत्राश्रमपदं कृत्वा लिङ्गं संस्थाप्य शाम्भवम् ॥ तपश्चर महाबुद्धे ध्यायन् शम्भुं हृदम्बुजे ॥५४॥
ततः शिवप्रासादेन तवाभीष्टं भविष्यति ॥ एवं गुरोर्वचः श्रुत्वा नहुषो राजसत्तमः ॥५५॥
गोकर्णं क्षेत्रमासाद्य कृत्वाश्रमपदं शुभम् ॥ लिङ्गं संस्थाप्य विधिवत्तीर्थं कृत्वा सुनिर्मलम् ॥५६॥
गुरूपदिष्टविधिना चचार तप उत्तमम् ॥ अचिरेणैव कालेन प्रत्यक्षत्वमगाच्छिवः ॥५७॥
स्पृशन् करेण राजानं शङ्करो वाक्यमब्रवीत् ॥ तपसा तव राजेन्द्र भक्त्या च नियमेन च ॥५८॥
प्रीतोऽस्मि तव राजेन्द्र ब्रूहि यत्तेऽभिलाषितम् ॥ तद्ददाम्यविलम्बेन यदि चात्यन्तदुर्लभम् ॥५९॥

तच्छ्रुत्वा वचनं शम्भोर्नहुषो भरतर्षभः ॥ उत्थाय सहसा शम्भुं दृष्ट्वा राजा ननाम च ॥६०॥
स्तुत्वा च विविधैस्तोत्रैर्जगाद वचनं तदा ॥ यदि तुष्टोऽसि देवेश देहि मे भक्तवत्सल ॥६१॥
त्वत्पादकमले भक्तिं देवलोकं च शाश्वतम् ॥ मया कृतमिदं लिङ्गं तीर्थं च सुरसत्तम ॥६२॥
भुक्तिमुक्तिप्रदं चास्तु ख्यातं मन्नामतो भवेत् ॥ तच्छ्रुत्वा राजवचनं शङ्करो वाक्यमब्रवीत् ॥६३॥
अत्रागत्य नरो यस्तु कार्तिक्यामिन्दुवासरे ॥ चतुर्दश्यां तथा कृष्णे स्नात्वा तीर्थे तवामले ॥६४॥
पूजयित्वा यथान्यायं लिङ्गं त्वद्भक्तिसंयुतः ॥ जपेत् पञ्चाक्षरीं विद्यामयुतं विधिपूर्वकम् ॥६५॥
सर्वपापविनिर्मुक्तो मम लोके वसेद्ध्रुवम् ॥ मत्प्रसादात्तव नृप स्वर्गवासो भविष्यति ॥६६॥
सहस्रयुगपर्यन्तं भोगान् भुक्त्वा यथेप्सितान् ॥ तदन्ते मम सालोक्यं भविष्यति तवानघ ॥६७॥
इति दत्वा वरं तस्मै नहुषाय तदा नृप ॥ तत्रैवान्तर्दधे लिङ्गे शङ्करो भक्तवत्सलः ॥६८॥
ततः स राजा नहुषो देवलोकं ययौ क्षणात् ॥ सहस्रयुगपर्यन्तं स्थित्वा देवपुरे नृपः ॥६९॥
इन्द्रस्य सदृशं भोगं भुक्त्वा भरतसत्तम ॥ तदन्ते शिवलोकं च प्राप्तवान् राजसत्तमः ॥७०॥

सूत उवाच ॥

तदेतदाश्रमं पुण्यं सर्वपापहरं शुभम् ॥ प्राच्यां वैवाहिकगिरेः किञ्चिदीशान्यतः स्थितम् ॥७१॥
शरपातद्वयमिते देशे पापहरं नृणाम् ॥ अम्बरीषाश्रमात् पुण्यात् किञ्चिदुत्तरतो दिशि ॥७२॥
नहुषस्याश्रमं पुण्यं सर्वपापप्रणाशनम् ॥ एषा तेऽभिहिता राजन्नहुषस्य कथा शुभा ॥७३॥
सर्वपापप्रशमनी किमन्यच्छ्रोतुमिच्छसि ॥ ॥

इति श्रीस्कान्देसनत्कुमारसंहितायां गोकर्णखण्डे नहुषाश्रमवर्णनंनाम शततमोऽध्यायः ॥१००॥

अध्यायाः अकारादि <<BACK ॥ अध्यायः १०१ ॥ NEXT>> श्लोक संख्या–४८

॥ अंबरीष– नल,– निमि,– नाभाग,– इक्ष्वाकु,– ययातीनां आश्रमादिवर्णनम् ॥

## अंबरीष

शतानीक उवाच ॥

सूत सर्वार्थतत्वज्ञ ब्रूहि मे परिपृच्छतः ॥ अम्बरीषस्य राजर्षेः कथां पापप्रणाशिनीम् ॥१॥

सूत उवाच ॥

शृणु राजन् प्रवक्ष्यामि यत्पृष्टं भवताऽनघ ॥ सूर्यवंशसमुत्पन्नो अम्बरीषो महीपतिः ॥२॥
सप्तद्वीपान्तपृथिवीं धर्मेण परिपालयन् ॥ आस्ते साकेतनगरे मन्त्रिभिः सह तत्ववित् ॥३॥
तर्पयामास ऋतुभिर्देवानिन्द्रपुरोगमान् ॥ एकादशीव्रतपरो भक्तः शिवमुकुन्दयोः ॥४॥
भुक्त्वा भोगान् बहुविधान् पुत्रपौत्रादिभिर्युतः ॥ ऋषिभिः सह धर्मात्मा शृण्वन् विष्णुकथां शुभाम् ॥५॥
एवं बहुतिथे काले पुत्रं दृष्ट्वाऽतिहर्षितः ॥ युवानं नीतिसंयुक्तं तस्मै राज्यधुरं ददौ ॥६॥
स्वयं विरक्तो भोगेषु सर्ववस्तुषु भारत ॥ मोक्षोपायं चिन्तयानो आस्ते ऋषिगणैः सह ॥७॥
एतस्मिन्नन्तरे काले नारदस्तत्र चागमत् ॥ दृष्ट्वा राजानमासीनं ऋषिभिः सह भारत ॥८॥
आशीर्भिरभिनन्द्याथ राजानं वाक्यमब्रवीत् ॥ कच्चित्ते कुशलं राजन् राज्यं कोशं बलं तव ॥९॥
नारदेनैवमुक्तस्तु राजा वचनमब्रवीत् ॥ कुशलं मम सर्वत्र प्रसादात्ते मुनीश्वर ॥१०॥
अवारितगतिस्त्वं हि सर्वलोकेषु वै मुने ॥ सार्वभौमत्वमासाद्य भोगा भुक्ता मया बहु ॥११॥
इदानीं मुक्तिकामोऽहं तदुपायं वदस्व मे ॥ इति पृष्टस्तदा राज्ञा नारदो वाक्यमब्रवीत् ॥१२॥
यदीच्छसि महाराज निर्वाणं याहि साम्प्रतम् ॥ क्षेत्रं सिद्धिप्रदं पुण्यं गोकर्णं सुरपूजितम् ॥१३॥
पश्चिमाम्बुधितीरस्थं तत्र गत्वा नृपोत्तम ॥ तत्र वैवाहिको नाम गिरिरास्ते शिवप्रियः ॥१४॥
तस्मादाग्नेयदिग्भागे इक्ष्वाकुस्तव पूर्वजः ॥ पुत्रे राज्यधुरं न्यस्य विरक्तः सर्ववस्तुषु ॥१५॥
गुरूपदिष्टविधिना तत्र गत्वाऽऽश्रमं शुभम् ॥ कृत्वा लिङ्गञ्च संस्थाप्य तीर्थं कृत्वा महत्तरम् ॥१६॥
तपश्चचार सुचिरं वाय्वम्बुकृतभोजनः ॥ ततः शिवप्रसादेन सिद्धिमाप महत्तराम् ॥१७॥
तदेतद्दृश्यते राजन् तटे वैवाहिकस्य वै ॥ रम्यं चाग्नेयदिग्भागे शरपाते नृपोत्तम ॥१८॥
इक्ष्वाकोराश्रमं पुण्यं नलस्याश्रममेव च ॥ नाभागस्य निमेश्चैव आश्रमाणि वसन्ति हि ॥१९॥
तत्र गत्वा त्वमपि वै कृत्वाश्रमपदं शुभम् ॥ लिङ्गं तत्र प्रतिष्ठाप्य तीर्थं कृत्वा सुनिर्मलम् ॥२०॥
ध्यायन् विष्णुपदाम्भोजं जपन्नष्टाक्षरं मनुम् ॥ तपश्चर महाराज क्षिप्रं सिद्धिमवाप्स्यसि ॥२१॥
इत्युक्तो मुनिना राजा तमनुज्ञाप्य भारत ॥ मन्त्रिवर्गैः पौरजनैर्गोकर्णं प्रययौ क्षणात् ॥२२॥
गिरेराग्नेयदिग्भागे राज्ञामाश्रमसन्निधौ ॥ तत्र कृत्वाश्रमं तीर्थं ध्यायन् विष्णुपदाम्बुजम् ॥२३॥
तपश्चचार राजर्षिर् मौनव्रतपरायणः ॥ एवं तपस्यतस्तस्य आविरासीद्धरिः स्वयम् ॥२४॥
उवाच वचनं प्रीतो राजानं भक्तवत्सलः ॥ प्रीतोऽस्मि तव राजेन्द्र तपसा च दमेन च ॥२५॥

वरं वरय भद्रन्ते यत्तेऽभिलषितं हृदि ॥ विष्णुना चैवमुक्तः सन्नम्बरीषो महाद्युतिः ॥२६॥
उन्मील्य नयने विष्णुं दृष्ट्वा पार्श्वस्थितं तदा ॥ प्रणम्य दण्डवद्भूम्यां स्तुत्वा च विविधैः स्तवैः ॥२७॥
वरान् वव्रे यथाकामं प्रबद्धकरसम्पुटः ॥ यदि तुष्टोऽसि मे देव देहि निर्वाणमुत्तमम् ॥२८॥
मया कृतमिदं तीर्थं लिङ्गं च सुरसत्तम ॥ त्रैलोक्योत्तमतामेतु प्रसादात्ते जनार्दन ॥२९॥
इत्युक्तो राजसिंहेन ततो विष्णुस्तमब्रवीत् ॥ त्वया कृतमिदं तीर्थं लिङ्गं च नृपपुङ्गव ॥३०॥
त्वन्नाम्ना ख्यातिमायातु त्रैलोक्यतिलकं भवेत् ॥ अत्रागत्य नरो यस्तु तुलामासे रवेर्दिने ॥३१॥
स्नात्वा तीर्थे तव नृप त्वल्लिङ्गं पूजयिष्यति ॥ जपेदष्टाक्षरीमन्त्रं सहस्रं विधिपूर्वकम् ॥३२॥
स सर्वपापनिर्मुक्तो भुक्त्वा भोगाननेकशः ॥ अन्ते मम पदं गच्छेन्मत्प्रसादान्नृपोत्तम ॥३३॥
इति दत्वा वरान् विष्णुरम्बरीषाय भारत ॥ पश्यतस्तस्य राजर्षेरन्तर्धानमगाद्धरिः ॥३४॥
ततो राजा कुरुश्रेष्ठ पौरैर्मन्त्रिभिरावृतः ॥ साकेतनगरं प्राप्य स्थितवान्नियमेन सः ॥३५॥
ध्यायन् हृदि हरिं नित्यमचिरात् सिद्धिमाप सः ॥

---

## नलाश्रमं

सूत उवाच ॥

द्यूतं कृत्वा नलो राजा पुष्करेण कुरूद्वह ॥३६॥
पराजितो राज्यकोशं त्यक्त्वा वनमुपाविशत् ॥ कलिनाऽऽक्रान्तदेहश्च गोकर्णे सिद्धिमागतः ॥३७॥

---

## निमेः आश्रमं तीर्थं च

निमिश्च राजशार्दूलो नलाश्रमसमीपतः ॥ कृत्वाश्रमपदं पुण्यं तीर्थं कृत्वाऽतिनिर्मलम् ॥३८॥
ब्रह्माणं तपसाराध्य सिद्धिं प्राप महत्तराम् ॥ नराणां लोचनस्थानं प्राप्तो ब्रह्मप्रसादतः ॥३९॥
नलतीर्थाद्दक्षिणत आस्ते निमिकृतं शुभम् ॥ तीर्थं सर्वाघशमनं सर्वसिद्धिप्रदं नृणाम् ॥४०॥

---

## नाभागाश्रमं तीर्थं च

निमेराश्रमतः किञ्चिद्दक्षिणे कुरुसत्तम ॥ नाभागस्याश्रमं पुण्यं सर्वसिद्धनिषेवितम् ॥४१॥
नाभागो राजशार्दूलो तीर्थं कृत्वा महत्तरम् ॥ ध्यायन् शिवपदाम्भोजमचिराच्छूलपाणिनः ॥४२॥
अनुग्रहात् परां सिद्धिं प्राप्तः कुरुकुलोद्भव ॥ तत्तीर्थस्नानमात्रेण विमुक्तः सर्वपातकैः ॥४३॥

वैराग्यं ज्ञानसिद्धिं च प्राप्नोत्येव न संशयः ॥

---

### इक्ष्वाकोराश्रमं तीर्थं च

नाभागतीर्थसविधे किञ्चिद्दक्षिणतः स्थितम् ॥४४॥
इक्ष्वाकु तीर्थं राजेन्द्र पुण्यं पापविनाशनम् ॥ भुक्तिमुक्तिप्रदं नृणां देवर्षिगणसेवितम् ॥४५॥

---

### ययात्याश्रमवर्णनोपक्रमः

तस्मात् प्रतीचीदिग्भागे शरपातद्वये स्थले ॥ ययातितीर्थं विमलं आस्ते सिद्धिप्रदं नृणाम् ॥४६॥
स्वर्गभोगमवापासौ ययातिश्चन्द्रवंशजः ॥ नहुषस्यौरसो राजन्नात्मनः पुण्यकीर्तनात् ॥४७॥
च्युतस्त्रिविष्टपाद्राजन् गोकर्णे सिद्धिमागतः ॥ एतत्ते सर्वमाख्यातं किमन्यच्छ्रोतुमिच्छसि ॥४८॥
इतिश्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे नहुषादि तीर्थवर्णनंनाम एकोत्तरशततमोऽध्यायः ॥
१०१ ॥

 अध्यायाः अकारादि <<BACK  ॥ अध्यायः १०२ ॥  NEXT>>  श्लोक संख्या–५३

### ॥ बाणाश्रमवर्णनम् ॥

ययात्याश्रमम्

शतानीक उवाच ॥

सूत सर्वार्थतत्वज्ञ श्रुतं तव मुखाम्बुजात् ॥ देवर्षीणां च राज्ञां च तीर्थं लिङ्गं पृथक् पृथक् ॥१॥
तथापि तृप्तिर्मे सूत न जाता श्रवणान्मुने ॥ इदानीं श्रोतुमिच्छामि ययातेश्चरितं शुभम् ॥२॥
तीर्थञ्च तस्य मे शंस प्रीतिर्मयि तवास्ति चेत् ॥

सूत उवाच ॥

शृणु राजन् प्रक्ष्यामि ययातेश्चरितं शुभम् ॥३॥
राजेन्द्रो नहुषपुत्रो ययाति श्च महायशाः ॥ धर्मेण पालयामास ससप्तद्वीपमेदिनीम् ॥४॥
भुक्त्वा भोगान् यथाकामं सुचिरं भरतर्षभ ॥ ततो विरक्तिमापन्नः पुत्रे राज्यधुरं ददौ ॥५॥
वानप्रस्थाश्रमं कृत्वा यथाविधि नृपोत्तमः ॥ नाना व्रतोपवासैश्च चचार तप उत्तमम् ॥६॥
ततो बहुतिथे काले स्वर्गतिं प्राप्तवान्नृपः ॥ तत्र देवपुरे रम्ये देवैः सार्धं कुरूद्वह ॥७॥

देवेन्द्रस्य सभां रम्यां गतवान् राजपुङ्गवः ॥ इन्द्रेण पृष्टोऽकथयत् स्वपुण्यं देवभूभुजे ॥८॥
स्वपुण्यकथनाद्राजा क्षीणपुण्योऽभवत् क्षणात् ॥ च्युतो देवपुराद्राजा भूलोकं प्राप्तवान्नृप ॥९॥
तत्र सत्सङ्गतिं प्राप्य इन्द्रवाक्यान्नृपोत्तमः ॥ अष्टकं च शिबिं राजन् तथा वसुमनं नृपम् ॥१०॥
प्रतर्दनं च राजेन्द्र तैः साकं नृपपुङ्गवः ॥ नाना कथानुवादेन किञ्चित्कालं निनाय सः ॥११॥
स्ववृत्तान्तमशेषेण तेभ्यः प्राह नृपोत्तमः ॥ तैश्चोदितः कुरुश्रेष्ठ गोकर्णं प्राप्य पार्थिवः ॥१२॥
तीर्थद्वैश्रवणात् प्राच्यां शरपाते शुभे स्थले ॥ कृतवाश्रमपद ॑ रम्यं तीर्थं कृत्वा महत्तरम् ॥१३॥
शङ्करं मनसि ध्यायन् चचार परमं तपः ॥ अचिरेणैव कालेन तस्य प्रत्यक्षतां गतः ॥१४॥
शङ्करो भरतश्रेष्ठ वृषारूढः प्रियान्वितः ॥ मेघगम्भीरया वाचा राजानं वाक्यमब्रवीत् ॥१५॥
उत्तिष्ठ राजशार्दूल तपसा तव तोषितः ॥ वरं वरय भद्रन्ते मनसा यद्यदिच्छसि ॥१६॥
इति शम्भोर्वचः श्रुत्वा प्रोन्मील्य नयने तदा ॥ कोटिसूर्यप्रतीकाशं दृष्ट्वा शम्भुं पुरःस्थितम् ॥१७॥
दण्डवत् प्रणिपत्याथ शङ्करं राजसत्तमः ॥ कृताञ्जलिपुटो भूत्वा स्तोतुं समुपचक्रमे ॥१८॥
नमस्ते करुणासिन्धो नमस्ते भक्तवत्सल ॥ नमस्ते पार्वतीकान्त लोकाध्यक्ष नमोस्तु ते ॥१९॥
इति स्तुत्वा मुदा शम्भुं राजा वचनमब्रवीत् ॥ तव सन्दर्शनादेव सन्तुष्टो नितरामहम् ॥२०॥
त्वद्दर्शनमपुण्यानां दुर्लभं पार्वतीपते ॥ त्वत्पादकमले भक्तिं देहि मे शाश्वतीं प्रभो ॥२१॥
लिङ्गं तीर्थ‌ꣳ च मे देव त्रैलोक्ये विश्रुतं भवेत् ॥ स्वर्गभोगं ततो मोक्षं देहि मे भक्तवत्सल ॥२२॥
इत्युक्त्वा शङ्करं राजा दण्डवत् प्रणनाम तम् ॥ तथास्त्विति वरं तस्मै दत्वा राजन् पिनाकधृक् ॥
२३॥
तत्रैवान्तर्दधे देवः पार्वत्या सह शङ्करः ॥ ततः शिवप्रसादेन ययातिः स्वर्गतिं गतः ॥२४॥
तत्र देवपतेर्लोके भुक्त्वा भोगान् यथेप्सितान् ॥ सुचिरं भरतश्रेष्ठ तदन्ते मोक्षमाप्तवान् ॥२५॥
नैर्ऋत्यां नाहुषात् तीर्थादविदूरे कुरूद्वह ॥ ययातितीर्थं च शुभं सर्वकिल्बिषनाशनम् ॥२६॥
भुक्तिमुक्तिप्रदं नृणां पापिनामपि भारत ॥

---

## बाणाश्रमवर्णनम्

तत्तीर्थात् पश्चिमे भागे शरावधि कुरूद्वह ॥२७॥
आस्ते बाणाश्रमं नाम सर्वकिल्बिषनाशनम् ॥ बाणो नाम बलेः पुत्रो शिवभक्तो महाऽसुरः ॥२८॥
बालोपि ज्ञानसम्पन्नो गुरुसेवापरायणः ॥ एवं कतिपयाहःसु गतेषु भरतर्षभ ॥२९॥

समभ्यर्च्य गुरुं भक्त्या बाणः शुक्रमथाब्रवीत् ॥ गुरो भार्गव पृच्छामि मोक्षोपायं वदस्व मे ॥३०॥
व्रतेन वाऽथ दानेन अथ वा तीर्थसेवया ॥ कथं सिद्धिर्भवेन्मेद्य तद्वदस्व कृपानिधे ॥३१॥
इत्येवमुक्तो बाणेन भार्गवस्तमथाब्रवीत् ॥ शृणु दैत्यपते वक्ष्ये तदुपायं समाहितः ॥३२॥
क्षिप्रं सिद्धिप्रदं क्षेत्रं शैवं गोकर्णनामकम् ॥ पश्चिमाब्धितटे रम्ये आस्ते तत्र व्रज प्रभो ॥३३॥
वैवाहिकगिरेः पार्श्वे दक्षिणे दैत्यपुङ्गव ॥ तीर्थं कृत्वा सुविमलं शङ्करं मनसि स्मरन् ॥३४॥
मनसा निश्चलेनैव तपश्चर महामते ॥ एवं कृते तत्र विभो क्षिप्रं सिद्धिमवाप्स्यसि ॥३५॥
इति श्रुत्वा गुरोर्वाक्यं नत्वा तस्य पदद्वयम् ॥ तदाज्ञया दैत्यपतिस्तदा गोकर्णमागमत् ॥३६॥
वैवाहिकगिरेः पार्श्वे प्राच्यां कौबेरतीर्थतः ॥ कृत्व ाश्रमपदं रम्यं तीर्थं कृत्वाऽतिनिर्मलम् ॥३७॥
सन्नियम्येन्द्रियग्रामं ध्यायन् शिवपदाम्बुजम् ॥ पञ्चाग्निमध्यगो भूत्वा वाय्वम्बुकृतभोजनः ॥३८॥
पादाङ्गुष्ठेन पृथिवीं स्पृशन् पञ्चाक्षरीं जपन् ॥ एवं वर्षत्रयं दैत्यो तताप परमं तपः ॥३९॥
ततः प्रत्यक्षतां प्राप्तः पार्वत्या सह शङ्करः ॥ वृषारूढो भूतनाथैः सेव्यमानः कुरूद्वह ॥४०॥
बाणस्य निकटे स्थित्वा इदं वचनमब्रवीत् ॥ बाणासुर महाभाग वरं वरय सुव्रत ॥४१॥
तपसा तोषितोस्म्यद्य भक्त्या च नियमेन च ॥ तस्माद्दास्यामि ते दैत्य यद्यपि स्यात् सुदुर्लभम् ॥
४२॥
शङ्करेणैवमुक्तस्तु प्रोन्मील्य नयने ततः ॥ अग्रे दृष्ट्वा महादेवं सहसोत्थाय चासनात् ॥४३॥
ननाम दण्डवद्भूमौ शङ्करं भरतर्षभ ॥ कृताञ्जलिपुटो भूत्वा स्तोतुं समुपचक्रमे ॥४४॥
नमो देवदेवाय कालान्तकाय नमः कालरूपाय कामारये ते ॥
नमः कालकण्ठाय पञ्चाननाय नमः कामरूपाय तुभ्यं नमस्ते ॥४५॥
नमः कैलासपतये नमस्ते भक्तवत्सल ॥ लोकाध्यक्ष नमस्तेस्तु पशूनां पतये नमः ॥४६॥
वरं ददासि चेन्मह्यं वरार्हो यदि चाप्यहम् ॥ त्वत्सामीप्यं वृणोम्यद्य वरमन्यन्न कामये ॥४७॥
तीर्थमेतत् सुरश्रेष्ठ शङ्कर त्वदनुग्रहात् ॥ सर्वपापाहरं नृणां भुक्तिमुक्तिफलप्रदम् ॥४८॥
यथा भविष्यति तथा कुरुष्व सुरसत्तम ॥ इत्युक्तो दैत्यपतिना शङ्करस्तमथाब्रवीत् ॥४९॥
यदुक्तं भवता दैत्य तत्सर्वं सम्भविष्यति ॥ तीर्थे तव महाभाग तुलासंस्थे दिवाकरे ॥५०॥
आश्वयुज्यसिते पक्षे अमायां यो नरोत्तमः ॥ स्नात्वा मां पूजयेद्भक्त्या सर्वपापाद्विमुच्यते ॥५१॥
देहान्ते परमं स्थानं स यास्यति न संशयः ॥ इत्युक्त्वा तं समादाय कैलासं पर्वतोत्तमम् ॥५२॥
गत्वा तु तत्क्षणाद्राजन् पार्षदत्वं च दत्तवान् ॥ ततो बाणोपि कैलासे निकटे शङ्करस्य वै ॥५३॥

पार्षदत्वं च सम्प्राप्य स्थितवान् भरतर्षभ ॥

इतिश्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे बाणाश्रमवर्णनंनाम द्व्युत्तरशततमोऽध्यायः ॥१०२॥



## ॥ योगविचारः ॥

### ध्यानयोगः

शतानीक उवाच ॥

कर्म कृत्वेह भूतानि क्व भुज्यन्ते फलानि भो ॥ शुभस्य कर्मणः पाकमशुभस्य च शंस मे ॥१॥
कर्मबन्धाद् विमुच्यन्ते जन्तवः केन कर्मणा ॥ कर्मक्षये हि भूतानां मुक्तिर्भवति नान्यथा ॥२॥
इत्याहुर्मुनयः शान्ताः कथं कर्मक्षयो भवेत् ॥

सूत उवाच ॥

इह कृत्वा शुभं कर्म अशुभं वा कुरूत्तम ॥३॥
फलान्यन्यत्र भुज्यन्ते स्वकृतस्येह कर्मणः ॥ कृतस्य कर्मणः पाकः शुभस्यैव शुभप्रदः ॥४॥
तथाऽशुभस्य सुचिरं पापं कर्म भविष्यति ॥ यदा कर्मक्षयं याति तदा सिद्धिर्भविष्यति ॥५॥
तस्मात् कर्मक्षये यत्नः कर्तव्यः स्वहितेषुणा ॥
सत्यं दानं दमः शौचमहिंसा संयमः क्षमा ॥६॥
दया तपो ब्रह्मचर्यं देवताद्विजपूजनम् ॥ ह्रीरनालस्यमपि च अनसूया ततः क्रिया ॥७॥
एतानि शुभकर्माणि अशुभानि शृणुष्व मे ॥ असत्यमक्षमा चेर्ष्या क्रोधामर्षौ च भारत ॥८॥
अदाक्षिण्यमदानं च इन्द्रियाणामवश्यता ॥ हिंसा त्वसत्यं निभृतं अघृणा चाक्रिया तथा ॥९॥
निःशौचमतिकामित्वमविवेकश्च भारत ॥ एतान्यशुभकर्माणि कर्तुर्दुःखप्रदानि वै ॥१०॥

शतानीक उवाच ॥

तेषां च लक्षणं ब्रूहि सत्यादीनां महामते ॥ अशुभानां च मे शंस लक्षणं सूतनन्दन ॥११॥

सूत उवाच ॥

सत्यं भूतहितं प्रोक्तं त्रिविधं दानमुच्यते ॥ सात्विकं राजसं चैव तामसं च त्रिधा भवेत् ॥१२॥
देशं कालं च सम्प्रेक्ष्य पात्रं च भरतर्षभ ॥ स्वतोऽभिगम्य यद्दत्तं तद्दानं सात्विकं स्मृतम् ॥१३॥

याचमानः परैर्दद्याद्धेतुवादेन वा पुनः ॥ कीर्तिसंरक्षणार्थं च तद्राजसमुदाहृतम् ॥१४॥

अनादरेण यद्दद्यात् क्रोधेन कलुषीकृतः ॥ अन्यायेनार्जितं द्रव्यं तत्तामसमुदाहृतम् ॥१५॥

विषयेष्वनपेक्षा च सौशील्यं दम उच्यते ॥ द्विविधं शौचमाहुर्हि शारीरं मानसं नृप ॥१६॥

अहिंसा सर्वभूतानां रक्षणं समुदाहृतम् ॥ क्षमा पञ्चविधा ज्ञेया शृणुष्व गदतो मम ॥१७॥

अहिंसा सत्यमस्तेयं ब्रह्मचर्यपरिग्रहः॥ निःस्पृहा चेन्द्रियार्थेषु क्षमां तां परिचक्षते ॥१८॥

समः सर्वेषु भूतेषु यथात्मनि तथा परे ॥ दया सा प्रोच्यते तज्ज्ञैस्तप इन्द्रिय निग्रहः ॥१९॥

गुरुशुश्रूषणं राजन् ब्रह्मचर्यमुदाहृताम् ॥ अद्वैतभावनं पूजा देवानां नात्र संशयः ॥२०॥

वेदाभ्यासरतो यस्तु द्विजस्तं पूजयेत् सदा ॥ ह्रीरकार्यनिवृत्तिः स्यादास्तिक्यं चानसूयता ॥२१॥

बुधा वैदिकमाहुर्हि क्रियां सा चोदना स्मृता ॥ एतेषां विपरीतानि अकार्याणि विदुर्बुधाः ॥२२॥

साक्षिणश्चात्र निर्दिष्टा बहवस्तान्निबोध मे ॥

आदित्यचन्द्रावनिलानलौ च द्यौर्भूमिरापो हृदयं यमश्च ॥

अहश्च रात्रिश्च उभे च सन्ध्ये धर्मश्च जानाति नरस्य वृत्तम् ॥२३॥

कर्म कृत्वेह राजेन्द्र फलमन्यत्र भुज्यते ॥ शुभानामशुभानां च शास्ता वैवस्वतो यमः ॥२४॥

चित्रगुप्तादिभिः सार्धं धर्मसाक्षिभिरेव च ॥ कर्मानुरूपं भद्रन्ते फलमन्यत्र भुज्यते ॥२५॥

नातिक्रमति तत् कश्चित्तस्मात्कर्म शुभाशुभम् ॥ अवश्यं चैव भोक्तव्यं गन्तव्यं च यमालयम् ॥२६॥

दुर्गं दुष्कृतिनां राजन् स्वर्गं सुकृतिनां हि तत् ॥ तस्माच्छुभानि कुर्वीत य इच्छेत् सुखमात्मनः ॥२७॥

स्वर्गापवर्गफलदं शुभं कर्म न संशयः ॥ निष्कामेण कृते तस्मिन्निर्वाणमधिगच्छति ॥२८॥

यथा कर्म क्षयं याति तन्निबोध कुरूत्तम ॥ पृष्टः प्रोवाच भगवानुमयेदं पुरा शिवः ॥२९॥

कैलासशिखरे रम्ये सुखासीनं वृषध्वजम् ॥ प्रणिपत्य जगन्नाथं जगन्माताऽब्रवीदिदम् ॥३०॥

उमोवाच ॥

कर्मक्षये हि भूतानां मुक्तिर्भवति नान्यथा ॥ कथं कर्म क्षयं याति ब्रूहि मे परमेश्वर ॥३१॥

शिव उवाच ॥

सम्यक् पृष्टं त्वया देवि सर्वेषां च हितं महत् ॥ कथयामि समासेन यथा कर्मक्षयो भवेत् ॥३२॥

योगो मोक्षाय निर्दिष्टः साङ्ख्यश्च वरवर्णिनि ॥ योगमेव परं मन्ये योगाद्दुःखं विनश्यति ॥३३॥

योगात् कर्म क्षयं याति तस्माद्योगः प्रशस्यते ॥ चित्तवृत्तिनिरोधेन कथ्यते योगपद्धतिः ॥३४॥
इन्द्रियार्थेषु भूतानां चित्तं स्थिरतरं यदा ॥ क्षिप्तभूतः स विज्ञेयो न योग्यो योगकर्मणि ॥३५॥
बुद्धिर्यस्य विवेकाय न क्षमा क्षीणशक्तितः ॥ सोऽपि योगे परित्याज्यस्तृतीयोऽग्राह्य उच्यते ॥३६॥
विक्षेपो तामसः प्रोक्तो यत्र यत्र स्थितं मनः ॥ तत्र तत्र क्षमा कार्या स गृह्यो योगविस्तरे ॥३७॥
तस्य योगक्रियां वक्ष्ये संक्षेपाच्छूयतां प्रिये ॥ स्नात्वा प्रक्षाल्य पादौ च शुचिर्भूत्वा यतात्मवान्
॥३८॥
एकान्ते जननिर्मुक्ते प्रच्छन्ने सुमनोहरे ॥ मृद्वासनसमासीनो देहशुद्धिं समाचरेत् ॥३९॥
नाभौ विन्यस्य वायुं वै स्वमण्डलसमन्वितम् ॥ वारुणं मूर्ध्नि विन्यस्य स्वमण्डलपरिष्कृतम्
॥४०॥
एवं ध्यात्वा स कुर्वीत शोषणं दाहनं तथा ॥ स्तम्भनं प्लावनं चैव प्लावयित्वा रजस्तमः ॥४१॥
प्रलयक्रममासाद्य कुर्यात् सर्वत्र नाशनम् ॥ निसर्गक्रममासाद्य कुर्यात् सर्वत्र सर्जनम् ॥४२॥
निसर्गक्रममासाद्य पुनरुत्पादनं स्मृतम् ॥ यस्मान्निसर्गसंहारौ विज्ञेयौ मामुपाश्रितौ ॥४३॥
आनुपूर्व्येण भावानां नान्यथा सिद्धिरिष्यते ॥

उमोवाच ॥

कुतः प्रसूतिर्भावानां विनाशो वा क्व सम्भवः ॥४४॥
कियन्तं कालमुभयमेतद्भवति तद्वद ॥

रुद्र उवाच ॥

सृजते प्रकृतिर्भावान् प्रकृतिर्ग्रसते पुनः ॥४५॥
ब्रह्मणः सम्भवे सृष्टिस्तदन्ते प्रलयः पुनः ॥ सहस्रं वै युगानां तु दिनं ब्राह्मं निशामय ॥४६॥
तेन मानेन तस्यापि शतं वर्षाणि जीवितम् ॥ एवं प्रजापतेर्देवि कालेन प्रलयं विदुः ॥४७॥
सततं ते प्रवर्तेते मन्नियोगाद्वरानने ॥

देव्युवाच ॥

किं रूपं प्रकृतेस्तस्याः कथं चाथ प्रसूयते ॥४८॥
सम्बन्धः कीदृशस्तस्याः पुरुषस्य परस्य च ॥

रुद्र उवाच ॥

अचेतना परार्था च नित्या सततमक्रिया ॥४९॥

त्रिगुणा कर्मणः क्षेत्रं प्रकृते रूपमुच्यते ॥ व्याप्तिरूपेण सम्बन्धस्तस्याश्च पुरुषस्य च ॥५०॥
सा चैवादिरनादिश्च परमार्थेन चिन्तितः ॥ यथा भूमिमिमां सर्वां व्याप्य गन्धो व्यवस्थितः ॥५१॥
तथैव प्रकृतिं व्याप्य परमात्मा व्यवस्थितः ॥ यथा पयसि च स्नेहो यथा च सलिले रसः ॥५२॥
गम्यते तद्वदत्रापि व्याप्ये व्यापकमुच्यते ॥ तत्र यद् व्यापकं रूपं परस्य विषयीमुखम् ॥५३॥
परोप्येवं बहुविधान् भावान् भावयते नृप ॥ अद्वैतमंशुमजरं योगव्याप्तमवाप्य च ॥५४॥
अहमेव जगत्सर्वं जगन्मय्येव वर्तते ॥ नान्यन्मत्तोऽस्ति यद्भावं भाव्य मुक्तो भविष्यति ॥५५॥
एवं कर्मक्षयं याति मत्प्रसादाद्वरानने ॥ योगान्मोक्षमवाप्नोति न भवेत् कर्मवर्त्मनः ॥५६॥

---

## भक्तियोगोपक्रमः

वैराग्याद्योगमाप्नोति मद्भक्त्या च वरानने ॥ कर्मणा योगमाप्नोति साङ्ख्येन वरवर्णिनि ॥५७॥
वैराग्यं कर्मणाऽभ्येति तस्मान्मोक्षो भवेद्ध्रुवम् ॥ कर्म बन्धाय भवति मुक्तये च न संशयः ॥५८॥

देव्युवाच ॥

योगादाप्या मुक्तिरिति श्रुतं पूर्वं मया हर ॥ कर्मणा तत्कथं मुक्तिर्भवेत्तर्हि वदस्व मे ॥५९॥

रुद्र उवाच ॥

नायोग्यस्य भवेद्योगो जन्तोर्जन्मशतैरपि ॥ तत् कर्मणैव प्राप्नोति तस्मात् कर्म प्रशस्यते ॥६०॥
दृश्यते कर्मणो भद्रे फलमन्यत्र दृश्यते ॥ दृश्येनादृश्यमन्विच्छेद् द्वैतेनाद्वैतमप्युत ॥६१॥
तदेवाकारमान् देवि नान्यदृश्येत शोभने ॥ तस्मात् क्रियावतां सिद्धिरयत्नेनोपपद्यते ॥६२॥
मद्याजी मत्कथावादी मद्व्रतानुगतः सदा ॥ मामेवैष्यति जन्तुः स पुनरावृत्तिवर्जितः ॥६३॥
इतिश्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे योगविचारोनाम त्र्युत्तरशततमोऽध्यायः ॥१०३॥

 अध्यायाः अकारादि <<BACK  ॥ अध्यायः १०४ ॥  NEXT>>  श्लोक संख्या–४७

## ॥ योगाचरणम् ॥

## भक्तियोगः

देव्युवाच ॥

क्रियापरैर्देवदेव कथं पूजा भविष्यति ॥ पूजकः कीदृशो देव कर्म चास्य च शंस मे ॥१॥
कथं तेनाप्यते देव मुक्तिस्तन्मेऽनुवर्णय ॥ अद्वैतभावनं देव जन्तोर्जन्मशतादपि ॥२॥

न भवेदिति मे बुद्धिः क्रियायोगं प्रचक्ष्व मे ॥

श्रीरुद्र उवाच ॥

पूजाविधिं प्रवक्ष्यामि शृणु देवि समासतः ॥३॥
आत्मानं पूजयित्वादौ ततो देवं समर्चयेत् ॥ संयमश्च सदाचारः स्वाध्यायो द्रव्यसञ्चयः ॥४॥
शुद्धिर्यागस्तुतिर्ध्यानमित्येवं विधिरष्टधा ॥ दीक्षा च गुरुभक्तिश्च मद्भक्तेषु सदा रतिः ॥५॥
विधिनाऽनेन यस्तिष्ठेत् सर्वपापैः प्रमुच्यते ॥ द्विविधः पूजको भद्रे दीक्षितोऽदीक्षितस्तथा ॥६॥
दीक्षितस्य भवेत् सिद्धिः क्षिप्रं नास्त्यत्र संशयः ॥ अदीक्षितस्य मर्त्यस्य सिद्धिर् जन्मान्तरे भवेत् ॥७॥
संयमस्तु द्वयोस्तुल्यस्तस्मात् संयममाचरेत् ॥ ध्यातव्यो ह्यद्वयो भद्रे नान्यं विश्वस्य कारणम् ॥८॥
तस्माच्छुद्धस्वभावेन भक्तियुक्तोऽर्चयेत माम् ॥ मय्येवार्पितचेतस्तु मत्कथाश्रवणे रतिः ॥९॥
मद्भक्तसङ्गतिर्नित्यं मद्व्रतेषु प्रवर्तनम् ॥ एतानि मुक्तिदायीनि देवि नास्त्यत्र संशयः ॥१०॥
भक्तिरष्टविधा प्रोक्ता तच्छृणुष्व वरानने ॥ देवताराधनं नित्यं संयमस्य च रक्षणम् ॥११॥
मद्भक्तानां सखित्वं च मत्पूजायां सदा रतिः ॥ मत्पूजादर्शनासक्तिर्मत्कथाश्रवणे रतिः ॥१२॥
मद्भक्तार्तिप्रशमनं मद्भक्तानां च पूजनम् ॥ एवमष्टविधा भक्तिः प्रोक्ता वेदान्तवेदिभिः ॥१३॥
यस्य भक्तिर्दृढा देवि विद्यते मयि सर्वदा ॥ न तं पापानि लिप्यन्ति पद्मपत्रमिवाम्भसा ॥१४॥
गन्धपुष्पाक्षतं तोयं धूपदीपौ च वाससी ॥ भक्ष्यभोज्यादि नैवेद्यं सङ्गृह्य यतमानसः ॥१५॥
कृतोपवासः सुस्नातो धौतवस्त्रधरः शुचिः ॥ प्रक्षाल्य पाणिपादं च आचम्य प्रणवं जपेत् ॥१६॥
पीठं प्रकल्पयेत् पश्चाच्चतुरस्रं सुशोभनम् ॥ शुचौ देशे विविक्ते च सर्वबाधाविवर्जिते ॥१७॥
संस्थाप्य प्रतिमां देवि स्नापयित्वा यथाविधि ॥ गन्धैः पुष्पैर्धूपदीपैर्नैवेद्यैरक्षतैरपि ॥१८॥
पूजयित्वा यथान्यायं प्रतिमां वरवर्णिनि ॥ ततः पञ्चाक्षरीमन्त्रं जपेच्छक्त्या यथाविधि ॥१९॥
प्रदक्षिणानमस्कारैः स्तोत्रपाठैर्वरानने ॥ एवं पूजां समाप्याथ प्रसाद्य परमेश्वरम् ॥२०॥
भुञ्जीयाद्ब्राह्मणैः सार्धं मद्भक्तैश्चारुलोचने ॥ पाखण्डान् भिन्नवृत्तांश्च पतितान्नास्तिकान् तथा ॥२१॥
देवद्विजपुराणानां निन्दकान् कूटयुक्तिभिः ॥ नालापो न च संस्पर्शो न तैश्च सह संवसेत् ॥२२॥
एवं करोति यो भद्रे तस्य कर्मक्षयो भवेत् ॥ कर्महानौ भवेद्भक्तिर् मय्येवाव्यभिचारिणी ॥२३॥
भक्त्या योगः प्रभवति तेन मुक्तिर्भविष्यति ॥ पत्रं पुष्पं फलं तोयं भक्त्या यो मे प्रयच्छति ॥२४॥

तदनन्तफलं प्रोक्तं नात्र कार्या विचारणा ॥ चाण्डालः पुल्कसो वापि मयि भक्ति युतो यदि ॥२५॥

स एव पूज्यः सर्वेषां स द्विजः स च मुक्तिभाक् ॥ चतुर्वेद्यपि कल्याणि क्रियाहीनो भवेद्यदि ॥२६॥

अशुचित्वमवाप्नोति तस्मात् कर्म प्रशस्यते ॥ प्रतिमायामुपासीत यावद्भक्तिर्दृढा भवेत् ॥२७॥

ततस्तत्प्रतिमां भद्रे हृद्याकाशे विचिन्तयेत् ॥ तदैव सोमसूर्याग्निं जलमध्ये विचिन्तयेत् ॥२८॥

हृद्याकाशे च पूजायां मनसा सर्वमाचरेत् ॥ एवं मां यो यजेद्भक्त्या तस्य मुक्तिर्भविष्यति ॥२९॥

सिद्धिक्षेत्रमुपागम्य यो मामेवं प्रपूजयेत् ॥ तस्य मुक्तिर्भवेद्भद्रे अचिरान्नात्र संशयः ॥३०॥

---

## क्रियायोगः(कर्मयोगः)

साङ्ख्ययोगः क्रियायोगो द्वौ निर्वाणफलप्रदौ ॥ मुक्तिं विन्दति वै मर्त्यः संसाराद्दुःखसागरात् ॥३१॥

क्रियया योगमाप्नोति रूढाभ्यासस्तु साङ्ख्यकम् ॥ क्रियया सर्वमाप्नोति क्रिया तस्माद्विशिष्यते ॥३२॥

व्योम्नि नक्षत्रपदवीं दिक्पालपदमेव च ॥ ब्रह्मेशविष्णुपदवीं प्राप्नोति क्रियया प्रिये ॥३३॥

मया सृष्टा क्रिया भद्रे साङ्ख्ययोगौ मदुद्भवौ ॥ मत्प्राप्तिकारकौ ह्येतौ क्रियायोगोऽधिकः स्मृतः ॥३४॥

देव्युवाच ॥

क्रियायोगं ममाचक्ष्व देवदेव महेश्वर ॥ उपकाराय लोकानां तद्विधिं चैव विस्तरात् ॥३५॥

रुद्र उवाच ॥

शृणु देवि प्रवक्ष्यामि क्रियायोगं समासतः ॥ स्वजातिविहितं कर्म क्रियायोगं प्रचक्षते ॥३६॥

यस्य वर्णस्य यो धर्मस्तदलङ्घ्यमुदाहृतम् ॥ ब्राह्मणक्षत्रियविशां वेदोक्तं कर्म चोच्यते ॥३७॥

वर्णत्रयस्य शुश्रूषा शूद्रस्य विहिता प्रिये ॥ भर्तृशुश्रूषणं धर्मः कुलस्त्रीणामुदाहृतः ॥३८॥

अधीत्य ब्राह्मणो वेदं यावज्जीवं यजेत माम् ॥ अध्यापयीत शिष्यांश्च वेदान् साङ्गपदक्रमान् ॥३९॥

दद्याद्दानानि विप्रेभ्यस्तेभ्य एव प्रतिग्रहेत् ॥ स्वधर्मनिरताद्वापि क्षत्रियादेरपि द्विजः ॥४०॥

स्त्रीशूद्राणां न प्रशस्तं दानमध्ययनादिकम् ॥ दानमध्ययनं यज्ञः क्षत्रियस्य विशिष्यते ॥४१॥

वैश्यस्यैवं विधिं प्राहुः शूद्रस्य द्विजसेवनम् ॥ नारीणां पतिशुश्रूषा शिष्याणां गुरुसेवनम् ॥४२॥

क्षिप्रं सिद्धिकरं देवि नात्र कार्या विचारणा ॥ तिष्ठाम्यहं सदा लोके गुरुरूपेण वै प्रिये ॥४३॥
शिष्याणां हितमन्विच्छन् तस्माच्छिष्यो गुरुं यजेत् ॥ पतिरेव सदा स्त्रीणां गतिर्नान्योऽस्ति हि क्वचित् ॥४४॥
भर्तृशुश्रूषया नारी सिद्धिं प्राप्नोति दुर्लभाम् ॥ यस्य यस्य च यो धर्मो मन्वादिस्मृतिचोदितः ॥४५॥
तत्तत्कृत्वैव चाप्नोति मनुजः सिद्धिमक्षयाम् ॥ स्वधर्माचरणात् पुंसः सिद्धिर्भवति नान्यथा ॥४६॥
एतत्ते सर्वमाख्यातं किमन्यच्छ्रोतुमिच्छसि ॥
इतिश्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे योगाचरणंनाम चतुरुत्तरशततमोऽध्यायः ॥१०४॥

 अध्यायाः अकारादि <<BACK  ॥ अध्यायः १०५ ॥  NEXT>>  श्लोक संख्या–९२

॥ वर्णाश्रमाचार वर्णनम् ॥

## क्रियायोगे–वर्णाश्रमाचारवर्णनम्

देवी ॥

देवदेव जगन्नाथ नमस्ते भक्तवत्सल ॥ ब्रूहि वर्णाश्रमाचारं कुर्वतां सिद्धिदं नृणाम् ॥१॥
यस्य वर्णस्य यो धर्मः पृथक् तान् शंस मे प्रभो ॥

रुद्र उवाच ॥

शृणु देवि प्रवक्ष्यामि वर्णिनां धर्ममुत्तमम् ॥२॥
मन्वादिभिश्च कथितं निःश्रेयसकरं परम् ॥ ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्चेति यथाक्रमम् ॥३॥
वर्णा एवं समाख्याता एतेषां ब्राह्मणोऽधिकः ॥ ब्राह्मणः क्षत्रियो वैश्यो द्विजाः प्रोक्तास्त्रयस्तथा ॥४॥
मातृतश्चोपनयनदीक्षाया जन्म वै क्रमात् ॥ एतैर्वर्णैः स्वधर्मश्च कार्यो वर्णानुरूपतः ॥५॥
स्ववर्णधर्मत्यागेन पाखण्डः प्रोच्यते बुधैः ॥ स्ववर्णचोदितं कर्म नरः कुर्वन् कृती भवेत् ॥६॥
अन्यथा पतितो ज्ञेयः सर्ववर्णबहिष्कृतः ॥ युगधर्माः परिग्राह्याः वर्णैरेतैर्यथोचितम् ॥७॥
ग्रामाचारः परिग्राह्यः स्मृतिमार्गानुसारतः ॥ कर्मणा मनसा वाचा धर्ममेव विचिन्तयेत् ॥८॥
अस्वर्ग्यं लोकविद्विष्टं कर्म कुर्यान्न कर्हिचित् ॥

## कलिवर्ज्यानि

समुद्रयानं पोतेन कमण्डलुविधारणम् ॥९॥
द्विजानामन्यवर्णासु कन्यासूपयमं तथा ॥ देवरेण सुतोत्पत्तिं मधुपर्के पशोर्वधम् ॥१०॥
मांसदानं तथा श्राद्धे वानप्रस्थाश्रमं तथा ॥ दत्ताक्षतायाः कन्यायाः पुनर्दानं परस्य च ॥११॥
दीर्घकालं ब्रह्मचर्यं नरमेधाश्वमेधकौ ॥ महाप्रस्थानगमनं गोमेधं च तथा मखम् ॥१२॥
इमान् धर्मान् कलियुगे वर्जयेन्मतिमान्नरः ॥

---

देशाचाराः परिग्राह्यास्तत्तद्देशसमुद्भवैः ॥१३॥
अन्यथा पतिता ज्ञेयाः सर्वकर्मसु निन्दिताः ॥ ब्राह्मणक्षत्रियविशां शूद्राणां वरवर्णिनि ॥१४॥
क्रियाः संक्षेपतो वक्ष्ये शृणुष्वावहिता भव ॥

## ब्राह्मणधर्माः

दानं दद्याद्द्विजातिभ्यो देवान् यज्ञैर्यजेत् द्विजः ॥१५॥
वृत्त्यर्थं याजयेन्नैव वेदान्नाध्यापयेत्तथा ॥ न याजयेत् तथाऽयाज्यान् द्विजो नित्योदकी भवेत् ॥१६॥
कुर्याच्च वेदग्रहणं तथाग्नेश्च परिग्रहम् ॥ हानिप्राप्त्योः समो भूयात् समनिन्दास्तुतिर्भवेत् ॥१७॥
सर्वलोकहितं कुर्यान्मृदुवाक्यादिभिः स्वयम् ॥ ऋतावभिगमः पत्न्यां शस्यते वरवर्णिनि ॥१८॥
न कस्याप्यहितं कुर्याच्छिवपूजापरो भवेत् ॥

## क्षत्रियधर्माः

दानानि दद्याद्विप्रेभ्यो क्षत्रियो वरवर्णिनि ॥१९॥
कुर्याच्च वेदग्रहणं यज्ञैर्देवान् यजेत् तथा ॥ शस्त्रजीवी भवेदुर्वीं धर्मतः परिपालयेत् ॥२०॥
दुष्टनिग्रहणं कार्यं शिष्टानां पालनं प्रिये ॥ शिवकेशवयोर्भक्तिं दद्याद्वृद्धेषु सत्स्वपि ॥२१॥

## वैश्यशूद्रधर्माः

पाशुपाल्यं च वाणिज्यं कृषिश्चैव वरानने ॥ वेदस्याध्ययनं चैव वैश्यः कुर्यात् कृती भवेत् ॥२२॥
दद्याद्दानं च विप्रेभ्यो देवान् यज्ञैर्यजेत्तथा ॥ कुर्याच्च दारग्रहणं धर्मांश्चैव समाचरेत् ॥२३॥
क्रयविक्रयजं द्रव्यं तथा शीर्षार्जितं च यत् ॥ दद्याद्दानं च शूद्रोऽपि पाकयज्ञं यजेत् तथा ॥२४॥
ब्राह्मणक्षत्रियविशां शुश्रूषानिरतो भवेत् ॥

### सर्वेषां धर्माः

ऋतुकालाभिगमनं स्वदारेषु न चान्यथा ॥२५॥
सर्वलोकहितैषित्वं सर्वेषां प्रियवादिता ॥ अनायासो महोत्साहो तितिक्षाऽनभिमानता ॥२६॥
सामान्यं सर्ववर्णानां मुनिभिः परिकीर्तितम् ॥ सर्वे मुक्तिं प्रयान्त्येवं स्वाश्रमाचारवर्तनात् ॥२७॥
ब्राह्मणः क्षत्रियाचारमाश्रयेदापदि प्रिये ॥ अत्यापदि विशो वृत्तिं क्षत्रियो वैश्यवृत्तिताम् ॥२८॥
नाश्रयेच्छूद्रवृत्तिं तु अत्यापद्यपि वै द्विजः ॥ यश्चाश्रयेद् द्विजो मूढः स चाण्डाल इति स्मृतः ॥२९॥
ब्राह्मणक्षत्रियविशो द्विजा इति च विश्रुताः ॥

---

चत्वारश्चाश्रमास्तेषां विद्यन्ते वरवर्णिनि ॥३०॥
ब्रह्मचारी गृही वानप्रस्थो भिक्षुर्यथाक्रमम् ॥ चतुर्भिराश्रमैरेभिः स्वधर्मान् साधयेद् द्विजः ॥३१॥
तेषां तुष्याम्यहं भद्रे कर्मयोगरतात्मनाम् ॥ निस्पृहाः शान्तमनसः स्वकर्मपरिनिष्ठिताः ॥३२॥
ते यान्ति परमं स्थानं पुनरावृत्तिवर्जिताः ॥

---

### संस्काराः

गर्भाधानादिसंस्काराः कार्यास्तेषां विधानतः ॥३३॥
स्त्रीणाममन्त्रकं कार्या यथाकालं यथाविधि ॥ सीमन्तं प्रथमं गर्भे चतुर्थे मासि कारयेत् ॥३४॥
षष्टे वा सप्तमे कुर्यादष्टमे वापि पुंसवम् ॥ पुत्रे जाते पिता स्नात्वा सचैलं जातकर्म च ॥३५॥
कृत्वाऽभ्युदयिकं श्राद्धं वाग्यतो ह्यात्मजस्य वै ॥ कुर्वीत नामकरणं द्वादशाहे यथाविधि ॥३६॥
अस्पष्टमर्थं क्षीणं च अतिगुर्वक्षरान्वितम् ॥ न दद्यान्नाम कल्याणि तथैव विषमाक्षरम् ॥३७॥
तृतीये वत्सरे चौलं पञ्चमेऽब्देऽपि वा चरेत् ॥

---

### उपनयनधर्माः

सप्तमे वाऽष्टमे वाऽब्दे ब्राह्मणस्योपनायनम् ॥३८॥
द्वादशाब्दे क्षत्रियाणां षोडशेऽब्दे विशां प्रिये ॥ उक्तकाले द्विगुणिते प्रमादाच्च गते सति ॥३९॥
सावित्रीपतितं विद्यान्नालपेत्तं कदाचन ॥ द्विजोपनयने देवि मुख्यकालव्यतिक्रमे ॥४०॥
द्वादशाहं चरेत् कृच्छ्रं पश्चाच्चान्द्रायणं चरेत् ॥ चरेत् सान्तपनयुगं पश्चात् कर्म समाचरेत् ॥४१॥
अन्यथा पतितं विद्यात् कर्तापि ब्रह्महा भवेत् ॥ मौञ्जी विप्रस्य विज्ञेया धनुर्ज्या क्षत्रियस्य वै
॥४२॥ आसी वैश्यस्य विज्ञेया शृणु देव्यजिनं तथा ॥ विप्रस्य प्रोक्तमैणेयं रौरवं क्षत्रियस्य तु

॥४३।
आजं वैश्यस्य विज्ञेयं दण्डान् वक्ष्ये यथाक्रमम् ॥ पालाशं ब्रह्मणस्योक्तं नृपस्यौदुम्बरं तथा
॥४४॥
बैल्वं वैश्यस्य विज्ञेयं तत्प्रमाणं शृणु प्रिये ॥ विप्रस्य केशमानं स्यादाललाटं नृपस्य तु ॥४५॥
नासाग्रसम्मितं दण्डं वैश्यस्याहुर्मनीषिणः ॥ अथ वासांसि वक्ष्यामि विप्रादीनां यथाक्रमम् ॥४६॥
काषायं चैव माञ्जिष्ठं हारिद्रञ्च प्रकीर्तितम् ॥

---

## ब्रह्मचारिधर्मनिरूपणम्

उपनीतो द्विजो देवि सेवयाऽनुदिवं गुरोः ॥४७॥
वेदग्रहणपर्यन्तं निवसेद्गुरुवेश्मनि ॥ प्रातःस्नायी भवेद्वर्णी समित्पुष्पफलादिकान् ॥४८॥
गुर्वर्थमाहरेन्नित्यं गुर्वनुज्ञां न लङ्घयेत् ॥ यज्ञोपवीतमजिनं धार्यं दण्डं च सर्वदा ॥४९॥
नष्टे भ्रष्टे नवं मन्त्रैर्धृत्वा भ्रष्टं जले क्षिपेत् ॥ भिक्षान्नं स तु भुञ्जीयाद्ब्रह्मचारी शुचिस्मिते ॥५०॥
भिक्षां च श्रोत्रियागारादाहरेत् प्रयतेन्द्रियः ॥ भवत्पूर्वं ब्राह्मणस्य भवन्मध्यं नृपस्य च ॥५१॥
भवदन्त्यं विशः प्रोक्तं भिक्षामाहरणे वचः ॥ सायंप्रातस्त्वग्निकार्यं कुर्याद्वर्णी यतेन्द्रियः ॥५२॥
प्रत्यहं ब्रह्मयज्ञं च तथा देवर्षितर्पणम् ॥ अग्निकार्यपरित्यागी पतितः प्रोच्यते बुधैः ॥५३॥
ब्रह्मयज्ञविहीनश्च ब्रह्महा परिकीर्तितः ॥ देवता पूजनं कुर्याच्छुश्रूषां नियतं गुरोः ॥५४॥
भिक्षान्नं भोजयेन्नित्यमेकान्नाशी भवेत् प्रिये ॥ नानीयान्निन्द्यविप्राणां गृहाद्भिक्षां जितेन्द्रियः ॥५५॥
निवेद्य गुरवेऽश्नीयाद्वाग्यतस्तदनुज्ञया ॥ मधुस्त्रीमांसलवणं ताम्बूलं दन्तधावनम् ॥५६॥
उच्छिष्टभोजनं चैव दिवास्वापं च वर्जयेत् ॥ छत्रपादुकगन्धांश्च तथा माल्यानुलेपनम् ॥५७॥
मलकेलिद्यूतगीतवाद्यं च परिवर्जयेत् ॥ परिवादं चोपतापं वृथालापं तथाञ्जनम् ॥५८॥
पाखण्डजनसंसर्गं शूद्रसङ्गं च वर्जयेत् ॥

---

## अभिवादननियमः

अभिवादनशीलः स्याद्वृद्धेषु च यथाक्रमम् ॥५९॥
ज्ञानवृद्धास्तपोवृद्धा वयोवृद्धा इति त्रयः ॥ आध्यात्मिकानि दुःखानि निवारयति यो गुरुः ॥६०॥
वेदशास्त्रोपदेशेन तं पूर्वमभिवादयेत् ॥ नाभिवाद्याश्च विप्रेण क्षत्रियाद्याः कदाचन ॥६१॥
नास्तिकं भिन्नमर्यादं कृतघ्नं ग्रामयाजकम् ॥ स्तेनं च कितवं चैव कदाचिन्नाभिवादयेत् ॥६२॥

पाखण्डं पतितं दृष्ट्वा व्रात्यं नक्षत्रजीवनम् ॥ महापातकिनं चैव कदाचिन्नाभिवादयेत् ॥६३॥
उन्मत्तं च शठं धूर्तं धावन्तमशुचिं तथा ॥ अभ्यक्तशिरसं चैव स्नानसन्ध्यारतं द्विजम् ॥६४॥
उदकुम्भधरं चैव समित्पुष्पादिधारिणम् ॥ विवादशीलिनं चण्डं वमन्तं जलमध्यगम् ॥६५॥
भिक्षान्नधारिणं चैव वमन्तं नाभिवादयेत् ॥ भर्तृघ्नीं पुष्पिणीं जारां सूतिकां गर्भपातिनीम् ॥६६॥
कृतघ्नीं च तथा चण्डीं कदाचिन्नाभिवादयेत् ॥ सभायां यज्ञशालायां देवतायतनेष्वपि ॥६७॥
प्रत्येकं तु नमस्कारो हन्ति पुण्यं पुराकृतम् ॥ श्राद्धं व्रतं तथा दानं देवतापूजनं तथा ॥६८॥
यज्ञं च तर्पणं चैव कुर्वन्तं नाभिवादयेत् ॥ कृताभिवादनं यस्तु न कुर्यादभिवादनम् ॥६९॥
नाभिवाद्यः स विज्ञेयो यथा शूद्रस्तथैव सः ॥ प्रक्षाल्य पादावाचम्य गुरोरभिमुखः सदा ॥७०॥
तस्य पादौ च सङ्गृह्य अधीयीत विचक्षणः ॥

---

## अनध्यायाः

अष्टकासु चतुर्दश्यां प्रतिपत्पर्वणोस्तथा ॥७१॥
महाभरण्यां विप्रेन्द्रः श्रवणद्वादशीदिने ॥ नभस्यापरपक्षे तु तृतीयायां तथैव च ॥७२॥
शयनोत्थानद्वादश्यां श्रोत्रिये मरणं गते ॥ आषाढे फाल्गुने चैत्रे कार्तिके च तथा प्रिये ॥७३॥
कृष्णपक्षे तृतीयायां ग्रामदाहे वरानने ॥ माघस्य नवमी शुद्धा आश्वयुज्यां तथैव च ॥७४॥
परिवेषदिने सूर्ये श्रोत्रिये गृहमागते ॥ बन्धिते ब्राह्मणे देवि प्रवृद्धकलहे तथा ॥७५॥
सन्ध्यायां गर्जिते मेघे अकाले वर्षिते सति ॥ उल्काशनिप्रपाते च तथा विप्रेऽवमानिते ॥७६॥
मन्वादिषु च कल्पाणि युगादिषु चतुर्ष्वपि ॥ नाधीयीत द्विजो भद्रे तत्कर्मफलकामुकः ॥७७॥
शुक्ला तृतीया वैशाखे प्रेतपक्षे त्रयोदशी ॥ कार्तिकी नवमी शुद्धा माघमासे अमा तथा ॥७८॥
एते युगादयः प्रोक्ता दत्तस्याक्षयकारकाः ॥ मन्वादींश्च प्रवक्ष्यामि शृणुष्वावहिता प्रिये ॥७९॥
आश्वयुक् शुक्लनवमी कार्तिके द्वादशी सिता ॥ तृतीया चैत्रमासस्य तथा भाद्रपदस्य च ॥८०॥
आषाढे शुक्लनवमी सिता माघस्य सप्तमी ॥ श्रावणस्याष्टमी कृष्णा तथाषाढे च पूर्णिमा ॥८१॥
फाल्गुनस्य तथा दर्शः पुष्यस्यैकादशी सिता ॥ कार्तिके फाल्गुने चैत्रे ज्येष्ठे पञ्चदशी सिता ॥८२॥
मन्वादय इमे देवि दत्तस्याक्षयकारकाः ॥ द्विजैः श्राद्धं प्रकर्तव्यं मन्वादिषु युगादिषु ॥८३॥
श्राद्धे निमन्त्रितश्चैव ग्रहणे चन्द्रसूर्ययोः ॥ अयनद्वितये चैव नाधीयीत द्विजोत्तमः ॥८४॥
शावानुगमने चैव सूतकद्वितये तथा ॥ सर्पादिदर्शने देवि तथा भूतस्वनेऽपि च ॥८५॥

एवमादिषु सर्वेषु अनध्यायः प्रकीर्तितः ॥ अनध्यायेष्वधीतानां प्रजां प्रज्ञां यशः श्रियम् ॥८६॥
आयुष्यं बलमारोग्यं निकृन्तति यमः स्वयम् ॥ ब्रह्महा स तु विज्ञेयो न तेन सह संवसेत् ॥८७॥

### स्वाध्यायत्यागनिन्दा

अनधीत्य द्विजो यस्तु स्वाचारं क्रियते यदि ॥ नाचारफलमाप्नोति यथा शूद्रस्तथैव सः ॥८८॥
नित्यं नैमित्तिकं काम्यं यच्चान्यत् कर्म वैदिकम् ॥ अनधीतस्य विप्रस्य सर्वं भवति निष्फलम् ॥८९॥
शब्दब्रह्ममयो विष्णुर्वेदः साक्षाद्धरिः स्मृतः ॥ वेदाध्यायी सदा विप्रः सर्वान् कामान् समश्नुते ॥९०॥
वेदग्रहणपर्यन्तं शुश्रूषां नियतं गुरोः ॥ कृत्वा तु गुरवे दत्वा दक्षिणां च यथाविधि ॥९१॥
अनुज्ञातस्ततस्तेन कुर्याद्दारपरिग्रहम् ॥

इतिश्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे वर्णाश्रमाचार वर्णनंनाम पञ्चोत्तरशततमोऽध्यायः ॥१०५॥

 अध्यायाः अकारादि <<BACK  ॥ अध्यायः १०६ ॥  NEXT>>  श्लोक संख्या–४६

## ॥ गृहस्थाश्रमाचार वर्णनम् ॥

### कर्मयोगे–गृहस्थाश्रमाचारवर्णनम्

श्रीरुद्र उवाच ॥

शृणु भद्रे प्रवक्ष्यामि गृहस्थस्याश्रमं पुनः ॥ वेदानभ्यस्य मेधावी लब्ध्वाऽनुज्ञां ततो गुरोः ॥१॥

### विवाहे वर्ज्यकन्याः

रूपलक्षणसम्पन्नां सद्गुणां सत्कुलोद्भवाम् ॥ द्विजः समुद्वहेत् कन्यां सुशीलां धर्मचारिणीम् ॥२॥
मातृतः पञ्चमादूर्ध्वं पितृतः सप्तमादधः ॥ द्विजः समुद्वहेत् कन्यामन्यथा गुरुतल्पगः ॥३॥
रोगिणीं चैव वृत्ताक्षीं सरोगकुलसम्भवाम् ॥ अतिकेशां च वाचालां पिशुनां चैव संत्यजेत् ॥४॥
कायस्थां वामनां चैव दीर्घदेहां विरूपिणीम् ॥ ऊनाधिकाङ्गमुन्मत्तां स्थूलोष्ठीं घर्घरस्वनाम् ॥५॥
स्थूलगुल्फां दीर्घजङ्घां तथैव पुरुषाकृतिम् ॥ श्मश्रुव्यञ्जनसंयुक्तां वृथाहास्यमुखीं त्यजेत् ॥६॥

विवादशीलां भ्रमितां सदाऽन्यगृहवासिनीम् ॥ बह्वाशिनीं स्थूलदन्तां धूर्तां निष्ठुरवादिनीम् ॥७॥
अतितृष्णां रक्तवर्णां पाण्डुवर्णां च कुत्सिताम् ॥ सदारोदनशीलां च निद्राशीलां च तस्कराम् ॥८॥
श्वासखासादिसंयुक्तां लोकद्वेषपरायणाम् ॥ अनर्थभाषिणीं चैव तनूरुहविरूपिताम् ॥९॥
परापवादनिरतां गर्वितां कितवां त्यजेत् ॥ बकवृत्तिं दीर्घनासां सर्वथा नोद्वहेत् पुमान् ॥१०॥
बालभावादविज्ञातस्वभावामुद्वहेद्यदि ॥ प्रगल्भामगुणां ज्ञात्वा सर्वथा तां परित्यजेत् ॥११॥
भर्तृपुत्रेषु या नारी निष्ठुरा सर्वदा भवेत् ॥ परानुकूलिनीं चैव सर्वथा तां परित्यजेत् ॥१२॥

---

## प्रशस्तकन्या

अष्टलक्षणसम्पन्नां सुकेशीमुन्नतस्तनीम् ॥ सुदृशं सूक्ष्ममध्यां तां पृथुश्रोणीं नितम्बिनीम् ॥१३॥
सूक्ष्माङ्गुलिनखां निम्ननाभिं च करभोरुहाम् ॥ मत्तहंसगतिं रम्यामुद्वहेत विचक्षणः ॥१४॥

---

## अष्टविधविवाहाः

विवाहस्त्वष्टधा ज्ञेयो ब्राह्माद्यैर्वरवर्णिनि ॥ पूर्वः पूर्वतरो ज्ञेयः पूर्वाभावे परः परः ॥१५॥
ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथासुरः ॥ गान्धर्वो राक्षसश्चैव पैशाचश्चाष्टमो मतः ॥१६॥
ब्राह्मेणैव विवाहेन विवाह्या ब्राह्मणेन वै ॥ दैवेनाप्यथवा कुर्यात् केचिदार्षं प्रचक्षते ॥१७॥
प्राजापत्यादयो देवि विवाहाः पञ्चगर्हिताः ॥ अभावे सति पूर्वेषां कुर्यादेव परान् बुधः ॥१८॥

---

## गृहस्थधर्माः

उपवीतद्वयं धार्यं सोत्तरीयं गृही प्रिये ॥ सुवर्णकुण्डले चैव धौतवस्त्रद्वयं तथा ॥१९॥
अनुलेपनलिप्ताङ्गः कृतकेशनखः शुचिः ॥ धारयेद्वैणवं दण्डं सोदकं च कमण्डलुम् ॥२०॥
उष्णापहारिणं छत्रं पादुके चाप्युपानहौ ॥ धारयेत् पुष्पमालां च गन्धं च प्रियदर्शनः ॥२१॥
नित्यं स्वाध्यायशीलः स्याद्यथाचारं समाचरेत् ॥ परान्नं परवादं च वर्जयेत् सर्वदा बुधः ॥२२॥
पादेन नाक्रमेत् पादमुच्छिष्टं नैव लङ्घयेत् ॥ न संहताभ्यां पाणिभ्यां कण्डूयादात्मनः शिरः ॥२३॥
पूज्यं देवालयं चैव नापसव्यं व्रजेद्बुधः ॥ देवार्चाचमनस्नानव्रतश्राद्धक्रियादिषु ॥२४॥
न भवेन्मुक्तकेशश्च नैकवस्त्रधरस्तथा ॥ नारोहेद्दुष्टयानं च वृथावादं च वर्जयेत् ॥२५॥
अन्यां स्त्रियं न गच्छेच्च पैशून्यं परिवर्जयेत् ॥ नापसव्यं व्रजेद्विप्रमश्वत्थं तु चतुष्पथम् ॥२६॥
असूयां मत्सरं चैव दिवास्वापं च वर्जयेत् ॥ न वदेत् परपापानि स्वपुण्यं नैव कीर्तयेत् ॥२७॥
स्ववयश्च स्वनक्षत्रं मनस्येवातिगोपयेत् ॥ न दुर्जनैः सह वसेन्नाशास्त्रं शृणुयात्तथा ॥२८॥

आसवद्यूतगीतेषु नरस्तु न रतिं चरेत् ॥ आर्द्रास्थि च तथोच्छिष्टं शूद्रं च पतितं तथा ॥२९॥
सर्पं च भिषजं स्पृष्ट्वा सचैलं स्नानमाचरेत् ॥ दीपखट्वातनुच्छायाकेशवस्त्रनखोदकम् ॥३०॥
अजमार्जाररेणुश्च हन्ति पुण्यं पुराकृतम् ॥ शूर्पवातं प्रेतधूमं तथा शूद्रान्नभोजनम् ॥३१॥
वृषलीपतिसङ्गं च दूरतः परिवर्जयेत् ॥ असच्छास्त्राभिगमनं चादनं नखकेशयोः ॥३२॥
तथैव नग्नशयनं सर्वदा परिवर्जयेत् ॥ शिरोभ्यङ्गावशिष्टेन तैलेनाङ्गं न लेपयेत् ॥३३॥
ताम्बूलमशुचिर्नाद्यात् तथा सुप्तं न बोधयेत् ॥ नाशुद्धोऽग्निं परिचरेत् पूजां च गुरुदेवयोः ॥३४॥
न वामहस्तेनैकेन पिबेद्वक्त्रेण वै जलम् ॥ न चाक्रमेद्गुरुच्छायां तदाज्ञां वरवर्णिनि ॥३५॥
न निन्द्याद्योगिनो विप्रान् यतीनपि तपस्विनः ॥ तथा परस्य मर्माणि कदाचिन्न वदेद्बुधः ॥३६॥
दर्शे च पौर्णमास्यां च यागं कुर्याद्यथाविधि ॥ औपासनं च जुहुयात् सायं प्रातर्द्विजोत्तमः ॥३७॥
औपासनपरित्यागी सुरापीत्युच्यते बुधैः ॥ अयने विषुवे चैव युगादिषु चतुर्ष्वपि ॥३८॥
दर्शे च प्रेतपक्षे च श्राद्धं कुर्याद्गृही प्रिये ॥ मन्वादिषु मृताहे च अष्टकासु वरानने ॥३९॥
नवधान्ये समायाते गृही श्राद्धं समाचरेत् ॥ श्रोत्रिये गृहमायाते ग्रहणे चन्द्रसूर्ययोः ॥४०॥
पुण्यक्षेत्रेषु सर्वेषु गृही श्राद्धं समाचरेत् ॥ यज्ञो दानं तपो होमः स्वाध्यायः पितृतर्पणम् ॥४१॥
भस्मीभवति कल्याणि त्रिपुण्ड्रेण विना कृतम् ॥ ऊर्ध्वपुण्ड्रं च तुलसीं श्राद्धे नेच्छन्ति केचन ॥४२॥
वृद्धाचाराः परिग्राह्यास्तस्माच्छ्रेयोर्थिभिर्नरैः ॥ इति वर्णाश्रमा धर्माः समासेन प्रकीर्तिताः ॥४३॥
एवमाचारधर्मज्ञो लभते परमां गतिम् ॥ धर्माज्ज्ञानमवाप्नोति ज्ञानान्मोक्षमवाप्यते ॥४४॥
वेदमार्गरतो यस्तु स्मृतिमार्गप्रवर्तकः ॥ अमार्गं यस्त्यजेद्देवि स नरो मुक्तिभाक् भवेत् ॥४५॥
महापातकयुक्तो वा संयुक्तोप्युपपातकैः ॥ यः स्वधर्मं सदा कुर्यात् स मुक्तो नात्र संशयः ॥४६॥
इतिश्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे वर्णाश्रमाचारवर्णनंनाम षष्ट्शततमोऽध्यायः ॥१०६॥

अध्यायाः अकारादि <<BACK ॥ अध्यायः १०७ ॥ NEXT>> श्लोक संख्या–८८

॥ नित्याह्निकादिविधि वर्णनम् ॥

क्रियायोगे–गृहस्थाचारे– नित्याह्निकादिविधिः

रुद्र उवाच ॥

शृणु भूयः प्रवक्ष्यामि गृहिणां धर्ममेव ते ॥ ब्राह्मे मुहूर्ते चोत्थाय पुरुषार्थप्रसाधिनीम् ॥१॥
वृत्तिं सञ्चिन्तयेद्विद्वान् विष्णुस्मरणपूर्वकम् ॥ दिवा सन्ध्यासु कर्णस्थब्रह्मसूत्र उदङ्मुखः ॥२॥
कुर्यान्मूत्रं पुरीषं च रात्रौ चेद्दक्षिणामुखः ॥ शिरः प्रावृत्य वस्त्रेण अन्तर्धाय तृणैर्महीम् ॥३॥
वहन् काष्ठं करेणैकं तावन्मौनी भवेद्द्विजः ॥ पथि गोष्ठे नदीतीरे तटाके कूपसन्निधौ ॥४॥
देवालये तथोद्याने कृषिभूमौ चतुष्पथे ॥ ब्राह्मणानां समीपे तु तथाग्रे गुरुयोषिताम् ॥५॥
तुषाङ्गारकपालेषु जलमध्ये तथैव च ॥ एवमादिषु देशेषु मलमूत्रं न चोत्सृजेत् ॥६॥
शौचे यत्नः सदा कार्यः शौचमूलो द्विजः स्मृतः ॥ शौचाचारविहीनस्य समस्तं कर्म निष्फलम्
॥७॥
शौचं तु द्विविधं प्रोक्तं बाह्यमाभ्यन्तरं तथा ॥ मृज्जलाभ्यां भवेद्बाह्यं भावशुद्धिस्तथान्तरम् ॥८॥
गृहीतशिश्नश्चोत्थाय शौचार्थं मृत्तिकां हरेत् ॥ गन्धलेपक्षयकरं शौचं कुर्यादतन्द्रितः ॥९॥
अनुच्छिष्टप्रदेशेषु शौचार्थं मृत्तिकां हरेत् ॥ न मूषिकादिखनितां हलोत्कृष्टां तथैव च ॥१०॥
वापीकूपतटाकेषु नाहरेत्तु द्विजो मृदम् ॥ लिङ्गे मृदः प्रदातव्यास्तिस्रो वामे द्वयोर्द्वयम् ॥११॥
अपाने पञ्च वामे तु दश सप्त तथोभयोः ॥ तिस्रस्तिस्रः प्रदातव्याः पादयोर्मृत्तिकाः प्रथक् ॥१२॥
एवं शौचं प्रकुर्वीत गन्धलेपापनुत्तये ॥ एतच्छौचं गृहस्थस्य द्विगुणं ब्रह्मचारिणः ॥१३॥
त्रिगुणं तु वनस्थानां यतीनां तु चतुर्गुणम् ॥ स्वगृहे पूर्णमाचारः पथ्यर्धो वरवर्णिनि ॥१४॥
आतुरे नियमो नास्ति महापदि तथैव च ॥ स्त्रीणामनुपनीतानां गन्धलेपक्षयावधि ॥१५॥
वनस्थानां च सर्वेषां विधवानां विधिः समः ॥ प्राङ्मुखोदङ्मुखो वापि आचमेत् प्रयतेन्द्रियः
॥१६॥
त्रिश्चतुर्वा पिबेदम्भो गन्धफेनादिवर्जितम् ॥ द्विर्मार्जयेत् कपोलौ तु तलेनौष्ठौ तु संस्पृशेत् ॥१७॥
तर्जन्यङ्गुष्ठयोगेन नासारन्ध्रद्वयं स्पृशेत् ॥ अङ्गुष्ठानामिकाभ्यां च चक्षुः श्रोत्रे च संस्पृशेत् ॥१८॥
कनिष्ठाङ्गुष्ठयोगेन नाभिदेशं स्पृशेन्नरः ॥ तलेनोरस्थलं चैव अङ्गुल्यग्रैः शिरः स्पृशेत् ॥१९॥
तलेन चाङ्गुल्यग्रैर्वा स्पृशेदंसं विचक्षणः ॥ एवमाचम्य विप्रेन्द्रः शुद्धिमाप्नोत्यनुत्तमाम् ॥२०॥
ततः स्नानं प्रकुर्वीत मार्जनं जलतर्पणम् ॥

## सन्ध्या,ब्रह्मयज्ञम्

ततः सन्ध्यामुपासीत गायत्र्याऽर्घ्यं विनिक्षिपेत् ॥२१॥

मन्देहदेहनाशाय उदयास्तमये रवेः ॥ स्थित्वासने ततो विप्रः कुर्याद्गुर्वादिवन्दनम् ॥२२॥
गायत्रीं च जपन् प्रातस्तिष्ठेदासूर्यदर्शनात् ॥ तथैव सायमासीनो जपेदाऋक्षदर्शनात् ॥२३॥
उपास्य सन्ध्यां मध्याह्ने क्षिपेदर्घ्यं च पूर्ववत् ॥ गायत्रीं च जपेत् सम्यक् तिष्ठन्नासीन एव वा ॥२४॥
ब्रह्मचारी गृहस्थश्च शतमष्टोत्तरं जपेत् ॥ वानप्रस्थो यतिश्चैव सहस्राष्टोत्तरं जपेत् ॥२५॥
प्रातर्मध्यन्दिने चैव गृहस्थः स्नानमाचरेत् ॥ ब्रह्मयज्ञं प्रकुर्वीत देवर्षिपितृतर्पणम् ॥२६॥
नियमेन प्रकुर्वीत दर्भपाणिरतन्द्रितः ॥ दिवोदितानि कर्मणि प्रमादादकृतानि चेत् ॥२७॥
शर्वर्याः प्रथमे यामे तानि कुर्यात् समाहितः ॥ प्रातर्मध्याह्नयोः स्नानं वानप्रस्थगृहस्थयोः ॥२८॥
यतेस्त्रिषवणस्नानं सकृद्वै ब्रह्मचारिणः ॥ सर्वे वापि सकृत् कुर्युरार्तश्चेदुदकं विना ॥२९॥
नोपास्ते यो द्विजः सन्ध्यां धूर्तोन्मत्तो ह्यनापदि ॥ पाखण्डः स हि विज्ञेयः सर्वकर्मबहिष्कृतः ॥३०॥
यस्तु सन्ध्यादिकर्माणि कूटयुक्तिविशारदः ॥ परित्यजति विद्यात् तं महापातकिनां वरम् ॥३१॥
ये द्विजेनापि भाषन्ते त्यक्तसन्ध्यादिकर्मणा ॥ ते यान्ति नरकान् घोरान् यावदाचन्द्रतारकम् ॥३२॥

---

देवार्चनं ततः कुर्याद्वैश्वदेवं यथाविधि ॥ आयान्तमतिथिं सम्यग्गन्धाद्यैश्च प्रपूजयेत् ॥३३॥
वक्तव्या मधुरा वाणी अतिथिष्वागतेषु वै ॥ जलान्नकन्दमूलैर्वा अन्नदानेन वार्चयेत् ॥३४॥
अतिथिर्यस्य भग्नाशो गृहात् प्रतिनिवर्तते ॥ स तस्मै दुष्कृतं दत्वा पुण्यमादाय गच्छति ॥३५॥
अज्ञातगोत्रनामानमन्यग्रामादुपागतम् ॥ तं विद्यादतिथिं देवि विष्णुवत्तं प्रपूजयेत् ॥३६॥
स्वग्रामवासिनं त्वेकं श्रोत्रियं विष्णुतत्परम् ॥ अनाथं प्रत्यहं विप्रमुद्दिश्य स्वपितॄन् यजेत् ॥३७॥
पञ्चयज्ञपरित्यागी ब्रह्महेत्युच्यते बुधैः ॥ कुर्यादहरहस्तस्मात् पञ्चयज्ञं प्रयत्नतः ॥३८॥
देवयज्ञो भूतयज्ञः पितृयज्ञस्तथैव च ॥ नृयज्ञो ब्रह्मयज्ञश्च पञ्चयज्ञाः प्रकीर्तिताः ॥३९॥
भृत्यमित्रादिसंयुक्तः स्वयं भुञ्जीत वाग्यतः ॥ द्विजेनाभोज्यं नाश्नीयात् पात्रं नैव परित्यजेत् ॥४०॥
संस्थाप्य चासने पादौ वस्त्रार्धं परिधाय च ॥ मुखेन धमितं भुक्त्वा सुरापीत्युच्यते बुधैः ॥४१॥
खादितार्धं पुनः खात्वा मोदकादिफलादिकम् ॥ प्रत्यक्षं लवणं भुक्त्वा गोमांसाशी निगद्यते ॥४२॥

पानीयं पायसं भैक्षं घृतं लवणमेव च ॥ हस्तदत्तं तु यो भुङ्क्ते तुल्यं गोमांसभक्षणात् ॥४३॥
सूपे वा परमान्ने वा घृतपात्रं यदि क्षिपेत् ॥ तद्भुतं सुरया तुल्यं तदन्नं मांसवत् स्मृतम् ॥४४॥
उत्तरापोशनं कृत्वा पवित्रं तत्र सन्त्यजेत् ॥ असम्भाष्य च शूद्रादीन् भानुं वा नावलोकयेत् ॥४५॥
गण्डूषद्वादशं कृत्वा हस्तौ पादौ च मार्जयेत् ॥ ततस्त्वाचम्य विप्रेन्द्रः शास्त्रचिन्तापरो भवेत् ॥४६॥
रात्रावपि यथाशक्त्या शयनासनभोजनैः ॥ कन्दमूलफलैर्वापि आयान्तमतिथिं यजेत् ॥४७॥
स्वयं भुञ्जीत यत्नेन क्षीरान्नं स्वस्थमानसः ॥ अर्कद्वये पर्वरात्रौ चतुर्दश्यष्टमी दिवा ॥४८॥
एकादश्यामहोरात्रं भुक्त्वा चान्द्रायणं चरेत् ॥ प्रक्षाल्य पादावाचम्य पूर्ववच्छुद्धिमाप्नुयात् ॥४९॥
निर्माल्यगन्धपुष्पाद्यैरलङ्कृत्य स्वकां प्रियाम् ॥ स्वयं च समलङ्कृत्य तया सम्भोगमाप्नुयात् ॥५०॥
ऋतुकाले स्वयं गच्छेदन्यत्र तदनुज्ञया ॥ वैणवं दण्डमादाय स्वसमीपे विचक्षणः ॥५१॥
स्वगृहे प्राक्शिराः सुप्यात् याम्यश्च श्वशुरे गृहे ॥ प्रवासे पश्चिमशिरा न कदाचिदुदक्शिराः ॥५२॥
एवं गृही सदाचारं कुयात् प्रतिदिनं प्रिये ॥ यद्याचारपरित्यगी प्रायश्चित्ती भवेद्ध्रुवम् ॥५३॥

---

## वानप्रस्थधर्माः

दूषितां स्वतनुं दृष्ट्वा पलिताद्यैश्च भामिनि ॥ पुत्रेषु भार्यां निक्षिप्य वनं गच्छेत्ततो बुधः ॥५४॥
भवेत्त्रिषवणस्नायी नखश्मश्रुजटाधरः ॥ अधःशायी ब्रह्मचारी पञ्चयज्ञपरायणः ॥ ५५॥
फलमूलाशनो नित्यं स्वाध्यायनिरतस्तथा ॥ दयावान् सर्वभूतेषु मम ध्यानपरायणः ॥५६॥
वर्जयेद्ग्रामजातानि फलपुष्पाणि यानि तु ॥ अष्टौ ग्रासा मुनेर्भक्ष्याः षोडशारण्यवासिनः ॥५७॥
द्वात्रिंशच्च गृहस्थस्य अमितं ब्रह्मचारिणः ॥ एवं वनस्थो भुञ्जीत न कुर्याद्रात्रिभोजनम् ॥५८॥
अभ्यङ्गं वन्यतैलेन वानप्रस्थः समाचरेत् ॥ वायव्यं वर्जयेच्चैव निद्रालस्यं त्यजेत् सदा ॥५९॥
मृषावादं परीवादं वर्जयेद्गिरिनन्दिनि ॥ शङ्खचक्रगदापाणिं विष्णुं मां चैव संस्मरेत् ॥६०॥
वानप्रस्थः प्रकुर्वीत पश्चाच्चान्द्रायणादिकम् ॥ सहेत शीतवातादि वह्निं परिचरेत् सदा ॥६१॥
भस्मरुद्राक्षधारी च स्थिरासनगतः शुचिः ॥

---

## आसनफलम्

सर्वान् कामानवाप्नोति मनुष्यः कम्बलासने ॥६२॥
कृष्णासने भवेन्मुक्तिर्मोक्षः स्याद् व्याघ्रचर्मणि ॥ दर्भेषु कर्मसिद्धिः स्याद्दौर्भाग्यं दारुकासने ॥६३॥

शिलायां रोगमाप्नोति भूमौ कर्म च निष्फलम् ॥

## अक्षमालाफलम्

अक्षमालाफलं वक्ष्ये शृणु पर्वतनन्दिनि ॥६४॥

साम्राज्यं स्फटिकेन स्यात् पुत्रजीव्यं परां श्रियम् ॥ आत्मज्ञानं कुशग्रन्थौ रुद्राक्षैश्चिन्तितं भवेत् ॥६५॥

प्रवालैश्च कृता माला सर्वलोकवशङ्करी ॥ मोक्षप्रदा च माला स्यादामलक्याः फलैः कृता ॥६६॥

मुक्ताफलैः कृता माला सर्वविद्याप्रदायिनी ॥ माणिक्यरचिता माला त्रैलोक्यस्त्रीवशङ्करी ॥६७॥

नीलैर्मरकतैर्वापि कृता शत्रुजयप्रदा ॥ सुवर्णरचिता माला दद्याद्वै महतीं श्रियम् ॥६८॥

तथा रौप्यमयी माला कन्यां यच्छति कामिनाम् ॥ उक्तानां सर्वकामानां दायिनी पारदैः कृता ॥६९॥

अष्टोत्तरशतं माला तत्र स्यादुत्तमोत्तमा ॥ चतुःपञ्चाशता मध्या अधमा सप्तविंशतिः ॥७०॥

इत्येवं स्थापयेद्गूढं न कस्मैचित् प्रदापयेत् ॥ मालया वर्णमितयाऽनुलोमप्रतिलोमतः ॥७१॥

तथैकवारं जप्त्वा च पुनश्चर्या कृता भवेत् ॥ वामपादं गुदे स्थाप्य दक्षिणं च ध्वजोपरि ॥७२॥

योनिमुद्राबन्ध एवं भवेदासनमुत्तमम् ॥ योनिमुद्रासने स्थित्वा प्रजपेद्यः समाहितः ॥७३॥

यत्किञ्चिदपि वा मन्त्रं तस्य स्युः सर्वसिद्धयः ॥ ब्राह्मं मुहूर्तमारभ्य मुहूर्तं प्रजपेन्मनून् ॥७४॥

अत ऊर्ध्वं कृते जापे विनाशो भवति ध्रुवम् ॥ त्रयाणामाश्रमाणां ते विधिरेष उदाहृतः ॥७५॥

## सन्यासिधर्माः

यदा मनसि वैराग्यं जायते सर्ववस्तुषु ॥ तदैव सन्यसेद्विद्वानन्यथा पतितो भवेत् ॥७६॥

वेदान्ताभ्यासनिरतः शान्तो दान्तो जितेन्द्रियः ॥ निर्द्वन्द्वो निरहङ्कारो सन्तुष्टः सर्वदा भवेत् ॥७७॥

शमादिगुणसंयुक्तः कामक्रोधादिवर्जितः ॥ नग्नो वाऽजिनकौपीनो भवेन्मुण्डी यतिः प्रिये ॥७८॥

समः शत्रौ च मित्रे च तथा मानावमानयोः ॥ एकरात्रं वसेद्ग्रामे द्विरात्रं नगरे वसेत् ॥७९॥

भिक्षान्नाशी भवेन्नित्यमेकवारं वरानने ॥ अनिन्दितद्विजगृहे वेदाभ्यासादिसंयुते ॥८०॥

विवादरहिते चैव भिक्षार्थं पर्यटेद्यतिः ॥ भवेत् त्रिषवणस्नायी नारायणपरायणः ॥८१॥

जपेच्च प्रणवं नित्यं यतात्मा नियतेन्द्रियः ॥ यदि प्रमादान्मोहाद्वा कदाचिल्लम्पटो यतिः ॥८२॥

न तस्य निष्कृतिश्चास्ति प्रायश्चित्तायुतैरपि ॥ तथा कामी भवेद्भिक्षुर्मोहात् स्त्रीषु वरानने ॥८३॥
स चाण्डालसमो ज्ञेयो वर्णाश्रमविगर्हितः ॥ अव्ययं परिपूर्णञ्च सदानन्दैकविग्रहम् ॥८४॥
निर्द्वन्द्वं निर्ममं शान्तं मायातीतममत्सरम् ॥ निर्गुणं परमं ध्यायेदात्मानं प्रकृतेः परम् ॥८५॥
पठेदुपनिषद्वाक्यं वेदान्तार्थं विचारयेत् ॥ एवं ध्यानपरो यस्तु यतिर्विगतमत्सरः ॥८६॥
स याति परमानन्दं परं ज्योतिः सनातनम् ॥ इत्येवमाश्रमाचारान् यः करोति द्विजः क्रमात् ॥८७॥
स याति परमानन्दं यत्र गत्वा न शोचति ॥८८॥ ॥

इतिश्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे वर्णाश्रमाचारधर्मोनाम सप्ताधिकशततमोऽध्यायः ॥१०७॥

 अध्यायाः अकारादि <<BACK  ॥ अध्यायः १०८ ॥  NEXT>>  श्लोक संख्या–८६

## ॥ स्त्रीधर्मानुवर्णनम् ॥

### क्रियायोगे–स्त्रीधर्माः

रुद्र उवाच ॥

अतः परं प्रवक्ष्यामि स्त्रीणां धर्ममनुत्तमम् ॥ यं कृत्वा स्त्री सुखं याति इहलोके परत्र च ॥१॥
तच्छृणुष्व प्रिये सम्यग्विस्तराद्वदतो मम ॥ लोके पतिव्रता योषित् पावनेत्युच्यते बुधैः ॥२॥
पतिरेव गुरुः स्त्रीणां पतिरेव हि दैवतम् ॥ पतिरेव परं ब्रह्म पतिरेव परा गतिः ॥३॥
पतिरेव परो बन्धुस्तस्मात् किञ्चिन्न विद्यते ॥ तस्मात्तं पूजयेद्भक्त्या सर्वदेवमयो यतः ॥४॥
यस्मिन् भुक्ते स्वयं भुज्यात् शयिते शयिता भवेत् ॥ तत्पूर्वं परिबुध्येत स्थिते तस्मिंस्थिता भवेत् ॥५॥
अनलङ्कृतदेहं तु भर्तुः क्वापि न दर्शयेत् ॥ कार्यार्थं प्रोषिते पत्यौ सर्वालङ्कारवर्जिता ॥६॥
आगते स्वपतौ साध्वी सर्वभूषन्विता भवेत् ॥ ताडितापि प्रसन्ना स्यादाक्रुष्टापि न क्रोशति ॥७॥
पतिनाम न गृह्णीयात् तस्यायुष्यविवृद्धये ॥ पुरुषान्तरनामापि न गृह्णीयात् कदाचन ॥८॥
आहूता गृहकार्याणि त्यक्त्वा गच्छेदतन्द्रिता ॥ न चिरं द्वारि तिष्ठेत न देयं कस्यचिद्धनम् ॥९॥
भर्तुराज्ञां विना नारी न सतीसुखमेधते ॥ पूजोपकरणं सर्वमनुक्ता साधयेत् स्वयम् ॥१०॥

नियमोदकबर्हींषि पूजाद्रव्याणि यानि च ॥ प्रतीक्ष्यमाणा समयं यद्यत्कालोचितं हि यत् ॥११॥
तदुपस्थापयेत् सर्वं सुप्रसन्ना मुदान्विता ॥ अश्नीयाद्भर्तुरुच्छिष्टं मृष्टमन्नफलादिकम् ॥१२॥
अविभज्य न चाश्नीयाद्देवपित्र्यतिथिष्वपि ॥ परिचारकवर्गेषु गोषु भिक्षुकुलेषु वै ॥१३॥
संयुतोपस्करान् दत्वा हृष्टाप्ययपराङ्मुखी ॥ कुर्याद्भर्त्राऽभ्यनुज्ञाता उपवासव्रतादिकम् ॥१४॥
दूरतो वर्जयेद्गोष्ठीं समाजोत्सवदर्शनम् ॥ न गच्छेत् तीर्थयात्रादि विवाहप्रेक्षणादिषु ॥१५॥
सुखसुप्तं सुखासीनं रममाणं यदृच्छया ॥ आतुरेष्वपि कार्येषु पतिं नोत्थापयेत् क्वचित् ॥१६॥
रजस्वला त्रिरात्रं तु स्वमुखं नैव दर्शयेत् ॥ स्ववाक्यं श्रावयेन्नैव यावत् स्नाता न शुध्यति ॥१७॥
सुस्नाता भर्तृवदनं पश्येदन्यस्य न क्वचित् ॥ अथवा मनसि ध्यात्वा पतिं भानुं विलोकयेत् ॥१८॥
हरिद्रां कुङ्कुमञ्चैव कज्जलं कञ्चुकीं तथा ॥ सिन्दूरञ्चैव ताम्बूलं माङ्गल्याभरणं शुभम् ॥१९॥
केशसंस्कारकबरीं करकर्णादिभूषणम् ॥ भर्तुरायुष्यमिच्छन्ती दूषयेन्न पतिव्रता ॥२०॥
न रजक्या न हेतुक्या जारिण्या सङ्गमं न च ॥ सखित्वं कारयेत् साध्वी न च दुर्भगया क्वचित् ॥२१॥
भर्तृविद्वेषिणीं नारीं नैव सम्भाषयेत् क्वचित् ॥ नग्नरूपेण न स्नायात् तथा नैकाकिनी वसेत् ॥२२॥
देहल्यां नखयन्त्रेषु पाषाणे मुसलेन च ॥ नोलूखलेन वर्धक्यां सती नोपविशेत् क्वचित् ॥ २३॥
विना व्यवायसमयं प्रागल्भ्यं न क्वचिच्चरेत् ॥ तत्र प्रेमवती भूयाद्भर्तुर्यत्र रुचिर्भवेत् ॥२४॥
इदं परं व्रतं स्त्रीणामिदमेव परं तपः ॥ इदं देवार्चनं प्रोक्तं भर्तृवाक्याविलङ्घनम् ॥२५॥
दुःखस्थमपि षण्डं वा वृद्धं व्याधितमेव वा ॥ दुस्थितं सुस्थितं वापि पतिमेकं न लङ्घयेत् ॥२६॥
विषण्णास्ये प्रिये नारी विषण्णा च भवेत् स्वयम् ॥ हृषिते हृषिता भूयादेकरूपवती भवेत् ॥२७॥
सर्पिर्लवणतैलादिव्यये नास्तीति नो वदेत् ॥ तीर्थपानार्थिनी साध्वी भर्तृपादोदकं पिबेत् ॥२८॥
ईशान्महेन्द्राद्विष्णोर्वा पतिरेवाधिकः स्त्रियः ॥ व्रतोपवासनियमान् पतिमुल्लङ्घ्य या चरेत् ॥२९॥
आयुष्यं हरते भर्तुर् मृता निरयमश्नुते ॥ भर्तुः प्रत्युत्तरं दत्वा यो नारी क्रोधविह्वला ॥३०॥
सारमेया भवेद्ग्रामे शृगाली निर्जने वने ॥ स्त्रीभिर्नियमतः कार्यमिदमेव वरानने ॥३१॥
अभ्यर्च्य चरणौ भर्तुस्तत्तीर्थं सेवयेत् स्वयम् ॥ उच्चासने न तिष्ठेत्तु न व्रजेत् परमन्दिरम् ॥३२॥
लज्जाहीनानि वाक्यानि न वदेत् क्वापि भामिनी ॥ परापवादो वक्तव्यो न कुर्यात् कलहं सती

॥३३॥

गुरूणां सन्निधौ साध्वी नोच्चैर्ब्रूयान्न वै हसेत् ॥ ताडिता ताडयति चेद् व्याघ्री भूयान्मृगादिनी

॥३४॥

स्वभर्तारं परित्यज्य रहश्चरति दुर्मतिः ॥ सोलूकी जायते क्रूरा वृक्षकोटरवासिनी ॥३५॥

याऽन्यं कटाक्षयेन्नारी सा भवेत् केकराक्षिका ॥ मृष्टमश्नाति या नारी स्वभार्तारं विहाय तु ॥३६॥

ग्रामे सा सूकरी भूयाद्वल्गुरा वै स्वविड्भुजा ॥ या सपत्नीं सदेर्ष्येत दुर्भगा सा भवेद्ध्रुवम् ॥३७॥

ब्रूते पतिं या तुंकृत्य सा मूका भवति ध्रुवम् ॥ विलुप्य भर्तरि दृशमन्यं कञ्चित् समीक्षते ॥३८॥

विमुखी सा भवेत् काणा कुरूपा वापि जायते ॥ बाह्यादायान्तमालोक्य शीघ्रं दत्वा जलासनम्

॥३९॥

ताम्बूलव्यजनाद्यैश्च पादसंवाहनादिभिः ॥ मृदुवाक्यैस्तथा साध्वी खेदं विश्रामयेत वै ॥४०॥

या प्रीणयेत् पतिं प्रीता त्रैलोक्यं प्रीणितं तया ॥ मितं ददाति पिता मितं माता मितं सुतः ॥४१॥

अमितस्य प्रदातारं भर्तारं पूजयेत् सदा ॥ भर्ता देवो गुरुर्भर्ता धर्मतीर्थव्रतानि च ॥४२॥

तस्मात् सर्वं परित्यज्य पतिमेकं समर्चयेत् ॥

---

## विधवानिन्दा

जीवहीनो यथा देहः क्षणादशुचितां व्रजेत् ॥४३॥

पतिहीना तथा नारी सुस्नाताप्यशुचिर्भवेत् ॥ अमङ्गलेभ्यः सर्वेभ्यो विधवा ह्यत्यमङ्गला ॥४४॥

विधवादर्शनात् सिद्धिर्लोके जातु न जायते ॥ तदाशिषमपि प्राज्ञस्त्यजेदाशीविषोपमाम् ॥४५॥

विहाय मातुरेकां वै सर्वामङ्गलवर्जिताम् ॥

---

## सहगमनप्रशंसा

भर्ता सदाऽनुयातव्यश्छायया देहवत् स्त्रिया ॥४६॥

यथा चन्द्रमसं ज्योत्स्ना अनुगच्छेत् पतिं सदा ॥ पदे पदेऽश्वमेधस्य फलं प्राप्नोत्यसंशयम् ॥४७॥

व्यालग्राही यथा सर्पं बलादुद्धरते बिलात् ॥ स्वपतिं यमदूतेभ्यः कृष्य स्वर्गं नयेत् सती ॥४८॥

सतीं दृष्ट्वा पलायन्ते यमदूतास्तु दूरतः ॥ उत्सृज्य तत्पतिं दूरे अपि दुष्कृतकर्मिणम् ॥४९॥

वह्नेर्बिभ्यति न तथा न तथा विद्युतो प्रिये ॥ आपतन्तीं समालोक्य यमदूताः पतिव्रताम् ॥५०॥

दहनो दह्यतेऽत्यन्तं तपनश्चापि तप्यते ॥ कम्पन्ते सर्वतेजांसि दृष्ट्वा पतिव्रतप्रभाम् ॥५१॥
यावत्तल्लोमसंख्यास्ति तावत्कोट्ययुतानि च ॥ भर्ता स्वर्गफलं भुङ्क्ते रममाणो पतिव्रताम् ॥५२॥
सैव माता स च पिता यौ साध्वीजनकौ प्रिये ॥ धन्यः स च पतिः स्त्रीमान् यस्य भार्या पतिव्रता ॥५३॥
पितृवंश्यान् मातृवंश्यान् पतिवंश्यान् पतिव्रता ॥ स्वर्गं नयति कल्याणि दुर्वृत्तांश्चैव नारकात् ॥५४॥
पतिव्रतापदद्वन्द्वं यत्र भूमिं तु संस्पृशेत् ॥ तत्र तत्र तु गोकर्णं केदारं पुष्करं प्रिये ॥५५॥
बिभेति भानुमान् स्पर्शे तथा सोमोपि तां सतीम् ॥ सूर्यो गन्धवहश्चापि स्वपवित्राय संस्पृशेत् ॥५६॥
जलं पतिव्रतास्पर्शमभिलष्यति भामिनि ॥ देशे देशे न किं देवि स्त्रियो रूपेण गर्विताः ॥५७॥
हरिशङ्करयोर्भक्त्या लभ्यते स्त्री पतिव्रता ॥ भार्या मूलं गृहस्थस्य सती मूलं सुखस्य च ॥५८॥
साध्वी धर्मफलावाप्त्यै भार्या सन्तानवृद्धये ॥ गृहस्थः स हि विज्ञेयो यस्य भार्या पतिव्रता ॥५९॥

---

## विधवाधर्माः

अनुयाति न भर्तारं यदि दैवात् कथञ्चन ॥ तथापि शीलं संरक्ष्यं शीलभङ्गात् पतत्यधः ॥६०॥
तद्वैगुण्यादपि स्वर्गात् पतिः पतति नान्यथा ॥ तस्याः पिता च माता च स्वशीलं पालयेत् सदा ॥६१॥
सा पुनः स्वपतिं प्राप्य स्वर्गभोगं समश्नुते ॥ विधवाकबरीबन्धो भर्तृबन्धाय कल्पते ॥६२॥
केशानां वपनं तस्मात् कार्यं विधवया प्रिये ॥ एकदैवाशनं कार्यं न द्वितीयं कदाचन ॥६३॥
त्रिरात्रं पञ्चरात्रं वा कुयात् पक्षव्रतं तथा ॥ मासोपवासं विधवा तथा चान्द्रायणं चरेत् ॥६४॥
तप्तकृच्छ्रं पराकं वा कुर्यात् सान्तपनं तथा ॥ फलाहारैर्यवान्नैश्च शाकाद्यैर्वा पयोव्रतैः ॥६५॥
यावत् प्राणः स्वयं याति तावत् कुर्याद्व्रतादिकम् ॥ भूमौ शयीत विधवा पर्यङ्कादि विहाय तु ॥६६॥
नैवाङ्गोद्वर्तनं कार्यं पतिसौख्यसमीहया ॥ गन्धद्रव्यस्य संयोगं त्यजेदामरणावधि ॥६७॥
प्रत्यहं तर्पणं कुर्याद्भर्तुः कुशतिलोदकैः ॥ तत्पितुस्तत्पितुश्चैव नामगोत्रादिपूर्वकम् ॥६८॥

विष्णुपूजा सदा कार्या पतिबुध्या ममार्चनम् ॥ पतिमेव सदा ध्यायेद्विष्णुरूपधरं हृदि ॥६९॥
यद्यदिष्टतमं पत्युस्तत्तद् गुणवतेऽर्पयेत् ॥ वैशाखे कार्तिके माघे विशेषनियमं चरेत् ॥७०॥
तीर्थयात्रां स्नानदानं विष्णोर्नामग्रहं सदा ॥ वैशाखे जलकुम्भादि घृतदीपञ्च कार्तिके ॥७१॥
माघे धान्यकुलोत्सर्गं कार्यं विधवया प्रिये ॥ वसन्ते च प्रपा कार्या देवतासु गलन्तिका ॥७२॥
उपानच्छत्रवासांसि व्यजनं चन्दनं ददेत् ॥ सकर्पूरं सताम्बूलं पुष्पमाल्यादिकं शुभम् ॥७३॥
तथा पुष्पग्रहं रम्यं जलपात्राण्यनेकशः ॥ द्राक्षारम्भाफलादीनि पानानि विविधानि च ॥७४॥
देयानि द्विजमुख्येभ्यः पतिलोकस्य प्राप्तये ॥ ऊर्जे यवान्नमश्नीयात् वृन्ताकं सूरणं त्यजेत् ॥७५॥
मधु तैलं वर्जयेच्च कास्यं सन्धितमेव च ॥ घृतपात्रं प्रदातव्यं पत्रभोजी भवेत् स्वयम् ॥७६॥
भूमिशय्याव्रतं दानं कुर्याच्छय्यां सतूलिकाम् ॥ फलं रसञ्च धान्यादि तत्तद्द्यादतन्द्रिता ॥७७॥
गौः सवत्सा श्रोत्रियाय देयाऽलङ्कारसंयुता ॥ किञ्चिदभ्युदिते सूर्ये माघे स्नानं समाचरेत् ॥७८॥
यथाशक्त्या च नियमं माघस्नायी समाचरेत् ॥ पक्वान्नाद्यैर्भोजयीत यतिविप्रादिकान् प्रिये ॥७९॥
शुष्केन्धनानां भारांश्च दद्याच्छीतनिवृत्तये ॥ जातीफललवङ्गैश्च ताम्बूलानि ददेत् प्रिये ॥८०॥
कम्बलानि विचित्राणि पर्वतानि गृहाणि च ॥ कृष्णागरुप्रभृतिभिर्धूपयेद् देवतालये ॥८१॥
स्थूलवर्तिप्रदीपैश्च नैवेद्यैर्विविधैर्हरिम् ॥ तथा समर्चयेद्देवि मां चैव विधिपूर्वकम् ॥८२॥
एवं विधैश्च नियमैः पतिसौख्यसमीहया ॥ वैशाखं कार्तिकं माघमेवमेवातिवाहयेत् ॥८३॥
नारोहत ह्यनड्वाहं प्राणैः कण्ठगतैरपि ॥ कञ्चुकं न परीदध्याद्वासो न विकृतं वसेत् ॥८४॥
एवंविधसमाचारा विधवापि पतिव्रता ॥ पतिलोकमवाप्नोति क्वापि दुःखं न विन्दति ॥८५॥
इति वर्णाश्रमाचारा संक्षेपात् कथितास्तव ॥ यत्कृत्वा मोक्षमाप्नोति किमन्यच्छ्रोतुमिच्छसि ॥८६॥
इतिश्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे स्त्रीधर्मानुवर्णनंनाम अष्टोत्तरशततमोऽध्यायः ॥१०८॥

 अध्यायाः अकारादि <<BACK  ॥ अध्यायः १०९ ॥  NEXT>>  श्लोक संख्या–९६

## ॥ युगधर्म निरूपणम् ॥

## क्रियायोगे–युगधर्म निरूपणम्

देव्युवाच ॥

वर्णाश्रमाचारधर्माः श्रुता वै त्वन्मुखाम्बुजात् ॥ इदानीं श्रोतुमिच्छामि युगधर्मान् यथाक्रमम् ॥१॥

रुद्र उवाच ॥

शृणु देवि प्रवक्ष्यामि युगधर्मान् पृथक् पृथक् ॥ धर्मा विवृद्धिमायान्ति काले तस्मिंश्च उत्तमे ॥२॥
तथा विनाशमायान्ति धर्मा एवं महीतले ॥ कृतत्रेतद्वापराश्च कलिश्चेति चतुर्युगम् ॥३॥
दिव्यैर्द्वशभिर्ज्ञेयं वत्सरैस्तच्च सम्मितम् ॥ आद्यं कृतयुगं देवि ततस्त्रेताभिधानकम् ॥४॥
ततश्च द्वापराख्यं तु कलिमन्त्यं विदुर्बुधाः ॥

---

## कृतयुगवर्णनम्

देवदानवगन्धर्वा यक्षकिन्नरराक्षसाः ॥५॥
मर्त्याः कृतयुगे देवि सर्वे देवसमाः स्मृताः ॥ सर्वे हृष्टाश्च धर्मिष्ठा न तत्र क्रयविक्रयम् ॥६॥
देवानाञ्च विभागोऽपि न युगे कृतसंज्ञके ॥ ब्राह्मणाः क्षत्रिया वैश्याः शूद्राः स्वाचारतत्पराः ॥७॥
सर्वे नारायणपरास्तपोदानपरायणाः ॥ क्रोधादिदोषरहिताः शमादिगुणसम्भृताः ॥८॥
स्वाश्रमाचारनिरता दम्भासूयाविवर्जिताः ॥ सत्यवाक्यरताः सर्वे चतुराश्रमधर्मिणः ॥९॥
वेदाध्ययनसम्पन्नाः सर्वशास्त्रविशारदाः ॥ चतुराश्रमयुक्तेन कर्मणा कालयोगिना ॥१०॥
अकामफलसंयोगात् प्रयान्ति परमं पदम् ॥ नारायणः कृतयुगे शुक्लवर्णः सुनिर्मलः ॥११॥

---

## त्रेतायुगवर्णनम्

त्रेताधर्मान् प्रवक्ष्यामि शृणुष्वावहिता प्रिये ॥ धर्मः पादोनतां याति त्रेतायां गिरिनन्दिनि ॥१२॥
हरिश्च रक्ततां याति किञ्चित्कोपान्विता जनाः ॥ क्रियायोगरताः सर्वे यज्ञकर्मणि तत्पराः ॥१३॥
सत्यव्रता ध्यानपरा दानादानपरायणाः ॥

---

## द्वापरयुगवर्णनम्

ऊनद्विपादो धर्मश्च द्वापरे युगसत्तमे ॥१४॥
हरिः पीतत्वमायाति वेदश्चापि विभज्यते ॥ असत्यनिरतश्चापि यःकश्चिदपि वर्तते ॥१५॥
ब्राह्मणाद्याश्चतुर्वर्णाः स्वधर्मोक्तेन विच्युताः ॥ केचित् स्वर्गोपभोगाय विप्रा यज्ञान् प्रकुर्वते ॥१६॥

केचिद्दानादिकर्माणः केचित् कल्मषचेतसः ॥ धर्माधर्मपराश्चैव द्वापरे युगसत्तमे ॥१७॥

अथोऽधर्मे प्रवृद्धे तु दीर्यन्ते च प्रजास्तदा ॥ अल्पायुषो भविष्यन्ति केचिल्लोके वरानने ॥१६॥
केचित् पुण्यपरान् दृष्ट्वा असूयां कुर्वते सदा ॥

## कलियुगवर्णनम्

कलौ स्थितिं प्रवक्ष्यामि शृणुष्व गिरिनन्दिनि ॥१९॥
धर्मः कलियुगे देवि पादेनैकेन तिष्ठति ॥ हरिः कृष्णत्वमायाति वर्णाश्रमविवर्जनात् ॥२०॥
यःकश्चिदत्र धर्मात्मा क्रियायोगरतो भवेत् ॥ नरं धर्मपरं दृष्ट्वा सर्वेऽसूयां प्रकुर्वते ॥२१॥
वर्णाचाराः प्रणश्यन्ति जपयज्ञादयो भुवि ॥ उपद्रवा भविष्यन्ति अधर्मस्य प्रवर्तनात् ॥२२॥
असूयानिरताः सर्वे दम्भाचारपरायणाः ॥ प्रजाश्चाल्पायुषः सर्वे भविष्यन्ति कलौ युगे ॥२३॥
सर्वधर्मा विनश्यन्ति कृष्णो कृष्णत्वमागते ॥ तस्मात् कलिर्महाघोरः सर्वपापस्य साधकः ॥२४॥
ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा धर्मपराङ्मुखाः ॥ घोरे कलियुगे प्राप्ते द्विजा वेदपराङ्मुखाः ॥२५॥
व्याजधर्मपराः सर्वे दम्भाचारपरास्तथा ॥ असूयानिरताश्चैव दम्भाहङ्कारदूषिताः ॥२६॥
सर्वं संक्षिप्यते नित्यं नरैः पण्डितगर्वितैः ॥ अहमेवाधिक इति सर्व एव वदन्ति हि ॥२७॥
अधर्मलोलुपाः सर्वे तथा चैव द्विजा नराः ॥ अतः स्वल्पायुषः सर्वे भविष्यन्ति कलौ युगे ॥२८॥

अल्पायुस्त्वान्मनुष्याणां न विद्याग्रहणं प्रिये ॥ विद्याग्रहणशून्यत्वादधर्मो वर्धते ध्रुवम् ॥२९॥
व्युत्क्रमेण प्रजाः सर्वे म्रियन्ते पापतत्पराः ॥ ब्राह्मणाद्याश्चतुर्वर्णाः सङ्कीर्यन्ते परस्परम् ॥३०॥
कामक्रोधपरा मूढा वृथाहङ्कारपीडिताः ॥ बद्धवैरा भविष्यन्ति परस्परवधेप्सवः ॥३१॥
शूद्रतुल्या भविष्यन्ति विप्राः सत्यविवर्जिताः ॥ उत्तमा नीचतां यान्ति नीचाश्चोत्तमतां जनाः ॥३२॥
राजानो द्रव्यनिरताः सदा लोभपरायणाः ॥ धर्मकञ्चुकसंवीता धर्मविध्वंसकारिणः ॥३३॥
घोरे कलियुगे प्राप्ते सर्वाधर्मसमन्विते ॥ चतुरङ्गबलाढ्यो यः स एष पृथिवीं लभेत् ॥३४॥
किङ्कराश्च भविष्यन्ति शूद्राणाञ्च द्विजातयः ॥ धर्मस्त्रीष्वपि गच्छन्ति पतयो जारलक्षणाः ॥३५॥
द्विषन्ति पितरं पुत्रा गुरुं शिष्या द्विषन्ति च ॥ पतिञ्च वनिता द्वेष्टि कृष्णे कृष्णत्वमागते ॥३६॥
लोभाभिभूतमनसः सर्वे दुर्मदशीलिनः ॥ परान्नलोलुपा नित्यं भविष्यन्ति द्विजातयः ॥३७॥
परस्त्रीनिरताः सर्वे परद्रव्यपरायणाः ॥ मत्स्यामिषेण जीवन्ति दूयन्ते चाप्यजाविकान् ॥३८॥

असूयानिरताः सर्वे उपहारं प्रकुर्वते ॥ सरित्तीरेषु कुद्दालैर्वापयिष्यन्ति चौषधीः ॥३९॥
वेश्यालावण्यवृत्तेषु स्पृहां कुर्वन्ति योषितः ॥ अधर्मः प्रभवेद्देवि नारीषु पुरुषेषु च ॥४०॥
प्रायशः कृपणानां च बन्धूनां च तथा द्विजाः ॥ साधूनां विधवानां च वित्तान्यपहरन्ति च ॥४१॥
न व्रतानि चरिष्यन्ति ब्राह्मणा वेदनिन्दकाः ॥ न यक्ष्यन्ति न होष्यन्ति हेतुवादे विघूर्णिताः ॥४२॥
द्विजाः कुर्वन्ति दम्भार्थं पितृयज्ञादिकाः क्रियाः ॥ अपात्रेष्वेव दानानि कुर्वन्ति मनुजास्तथा ॥४३॥
क्षीरोपाधिनिमित्तेन गोषु स्नानं चरन्ति च ॥ न कुर्वन्ति तथा विप्राः स्नानशौचादिकाः क्रियाः ॥४४॥

अकालकर्मनिरताः कूटयुक्तिविशारदाः ॥ देवनिन्दापराश्चैव विप्रनिन्दापरास्तथा ॥४५॥
बध्नन्ति च द्विजानेव धनार्थं राजकिङ्कराः ॥ तापयन्ति च विप्रेन्द्रान् कृष्णे कृष्णत्वमागते ॥४६॥
स्नानयज्ञजपादीनां विक्रयन्ति जपं द्विजाः ॥ प्रतिग्रहं प्रकुर्वन्ति चण्डालाद्यैरपि द्विजाः ॥४७॥
कलेः प्रथमपादेपि विनिन्दन्ति हरिं द्विजाः ॥ पुण्यं तत्र हरेर्नाम नैव कश्चिद्ग्रहीष्यति ॥४८॥
शूद्रस्त्रीसङ्गनिरता विधवासङ्गलोलुपाः ॥ शूद्रान्नपाननिरता भविष्यन्ति कलौ द्विजाः ॥४९॥
धर्महीनाः नृपाः शूला शिवशूलाश्चतुष्पथाः ॥ स्त्रीयश्च केशशूलिन्यो भविष्यन्ति कलौ युगे ॥५०॥

कुहकैश्च जनास्तत्र हेतुवादविशारदाः ॥ पाखण्डिनो भविष्यन्ति चतुराश्रमनिन्दकाः ॥५१॥
न च द्विजातिशुश्रूषां सर्वधर्मप्रवर्तिनीम् ॥ करिष्यन्ति तथा शूद्राः प्रव्रज्या लिङ्गिनोऽधमाः ॥५२॥
काषायेण परीताश्च जटिला भस्मधूलिताः ॥ शूद्रधर्मान् प्रवक्ष्यन्ति कूटयुक्तिविशारदाः ॥५३॥
अशौचा वक्रमतयः परपाकान्नजीविनः ॥ भविष्यन्ति दुरात्मानः शूद्राश्च वरवर्णिनि ॥५४॥
उत्क्रोधजीविनस्तत्र महापापरतास्तथा ॥ सम्भविष्यन्ति पाखण्डाः कपाला भिक्षवोऽधमाः ॥५५॥
धर्मविध्वंसिनो देवि द्विजानां योषितां तथा ॥ एते चान्ये च बहवः पाखण्डा भूमिपालकाः ॥५६॥
गीतवाद्यपरा विप्रा वेदगद्यपराङ्मुखाः ॥ भविष्यन्ति कलौ प्राप्ते शूद्रमार्गप्रवर्तिनः ॥५७॥
अल्पद्रव्या वृथा लिङ्गा वृथाऽहङ्कारदूषिताः ॥ हर्तारो न च दातारो भविष्यन्ति कलौ युगे ॥५८॥
आत्मस्तुतिपराः सर्वे परनिन्दापरास्तथा ॥ विश्वासहीनाः पिशुनाः वेददेवद्विजातिषु ॥५९॥
भविता परमायुष्यं तदा वर्षाणि षोडश ॥ गतप्राणान् प्रहास्यन्ति कृष्णे कृष्णत्वमागते ॥६०॥
पञ्चमे वाथ षष्ठे वा वर्षे कन्या रजस्वला ॥ सप्तमे वाष्टमे वर्षे नारी पुत्रवती भवेत् ॥६१॥
स्वकर्मत्यागिनः सर्वे कृतघ्ना भिन्नवृत्तयः ॥ याचकाः पिशुनाश्चैव भविष्यन्ति कलौ युगे ॥६२॥

अन्याहारपरास्तत्र भुञ्जते परवेश्मनि ॥ निन्दां कुर्वन्ति सततं पितृमातृसुतेषु च ॥६३॥
वदन्ति वाचा धर्मांश्च चेतसा पापलोलुपाः ॥ धनविद्यादिनोन्मत्ताः सर्वे दुःखपरायणाः ॥६४॥
व्याधितस्करदुर्भिक्षैः पीडिता अतिमायिनः ॥ विद्विषन्ति तथैवान्यं विचार्यन्ति च दुष्कृतम् ॥६५॥
छादयन्ति प्रयत्नेन स्वदोषं पापकर्मिणः ॥ परेषां दुष्कृतं सम्यग्विवृण्वन्ति नराधमाः ॥६६॥
आत्मनो हस्तिमात्रणि पश्यन्नपि न पश्यति ॥ देवि सर्षपमात्राणि परच्छिद्राणि पश्यति ॥६७॥
धर्ममार्गप्रणेतारं तिरस्कुर्वन्ति पापिनः ॥ भविष्यन्ति कलौ प्राप्ते राजानो म्लेञ्छजातयः ॥६८॥
शूद्रशिक्षारताश्चैव तेषां शुश्रूषका द्विजाः ॥ ब्रह्मक्षत्रियविट्शूद्रा तथान्यान्याश्च जातयः ॥६९॥
अत्यन्तकामिनः सर्वे सङ्कीर्यन्ते परस्परम् ॥ न शिष्यो न गुरुः कश्चिन्न पुत्रो न पिता तथा ॥७०॥
न भार्या न पतिश्चैव भविता तत्र सङ्करे ॥ कलौ देवि भविष्यन्ति धनाढ्या अतियाचकाः ॥७१॥
रसविक्रयिणश्चापि भविष्यन्ति द्विजातयः ॥ चर्मकञ्चुकसंवीता मुनिवेषधरा द्विजाः ॥७२॥
शूद्रवृत्योपजीवन्ति द्विजा नरकभाजिनः ॥ अनावृष्ट्या जनाः सर्वे तथा क्षुद्भयकातराः ॥७३ ॥
कन्दपर्णफलाहारा भवेयुस्तापसा इव ॥ बहुपुत्रा भाग्यहीना दुःखशोकसमन्विताः ॥७४॥
स्त्रियश्च पोषणपरा वेश्यालावण्यशीलनात् ॥ पतिवाक्यमनादृत्य सदान्यगृहवासिनः ॥७५॥
दुःशीला दुष्टभोगेषु करिष्यन्ति सदा स्पृहाम् ॥ परुषानृतभाषिण्यो देहसंस्कारवर्जिताः ॥७६॥
वाचालाश्च भविष्यन्ति कलौ प्राप्ते तु योषितः ॥ नगरेषु च ग्रामेषु प्राकाराट्टलिकां जनाः ॥७७॥
चोरादिभयभीताश्च काष्ठयन्त्राणि कुर्वते ॥ विहाय गृहकर्माणि दूष्यन्ति च परांस्त्रियः ॥७८॥
स्वकार्यसिद्धिपर्यन्तं जनाः कुर्वन्ति मित्रताम् ॥ भिक्षवश्चापि मित्रादिस्नेहसम्बन्धयन्त्रिताः ॥७९॥
अन्नोपायनिमित्तेन भिक्षां कुर्वन्ति भिक्षवः ॥ उभाभ्यामपि हस्ताभ्यां कण्डूयन्ते शिरस्त्रियः ॥८०॥
खलपूर्णा राजसभा मृगपूर्णा च सस्यभूः ॥ चोरपूर्णानि वर्त्मानि भविष्यन्ति कलौ युगे ॥ ८१॥
पाखण्डालापनिरता न यक्ष्यन्ति यदा द्विजाः ॥ तदा चैव कलेर्वृद्धिरनुमेया विचक्षणैः ॥८२॥
सर्वधर्मेषु नष्टेषु भवेन्निःश्रीकृतं जगत् ॥ एवं कलेः स्वरूपं ते संक्षेपात् कथितं मया ॥८३॥

## कलिबाधाविमोचनम्

हरिभक्तिपरानेष न कलिर्बाधते क्वचित् ॥ तपः श्रेष्ठं कृतयुगे त्रेतायां ध्यानमेव हि ॥८४॥
द्वापरे ज्ञानमेवाहुर्दानमेव कलौ युगे ॥ यत्कृतं दशभिर्वर्षैस्त्रेतायां हायनेन तत् ॥८५॥
द्वापरे तच्च मासेन अहोरात्रेण तत्कलौ ॥ ध्यायन् कृते यजन् यज्ञैस्त्रेतायां द्वापरेऽर्चयन् ॥८६॥

यदाप्नोति तदाप्नोति कलौ सङ्कीर्त्य केशवम् ॥ अहोरात्रं हरेर्नाम कीर्तयन्ति च ये नराः ॥८७॥
कुर्वन्ति हरिपूजां च न कलिर्बाधते हि तान् ॥ हरिनामपरा ये च घोरे कलियुगे द्विजाः ॥८८॥
तानेव कृतकृत्यांश्च न कलिर्बाधते क्वचित् ॥ नमो नारायणायेति कीर्तयिष्यन्ति ये नराः ॥८९॥
निष्कामा वा सकामा वा न कलिर्बाधतेहितान् ॥ शिवपूजापरा ये च शिवनामपरायणाः ॥९०॥
त एव मम तुल्याश्च घोरे कलियुगे प्रिये ॥ समस्तजगदाधारपरमात्मस्वरूपिणम् ॥९१॥
घोरे कलियुगे प्राप्ते विष्णुं ध्यायन्न सीदति ॥ न्यूनातिरेकता सिद्धा कलौ वेदोक्तकर्मसु ॥९२॥
हरिस्मरणमेवात्र सम्पूर्णफलदायकम् ॥ हरे केशव गोविन्द वासुदेव जनार्दन ॥९३॥
इतीरयन्ति ये नित्यं न हि तान् बाधते कलिः ॥ शिव शङ्कर रुद्रेति नीलकण्ठ त्रिलोचन ॥९४॥
इतीरयन्ति ये नित्यं न हि तान् बाधते कलिः ॥ इति वर्णाश्रमाचारा युगधर्माः सनातनाः ॥९५॥
कथितास्ते समासेन धर्मकामार्थमोक्षदाः ॥

इतिश्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे युगधर्मनिरूपणंनाम नवाधिकशततमोऽध्यायः ॥१०९॥

## ॥ अन्त्यकालज्ञापनम् ॥

रुद्र उवाच ॥

कथितं ते समासेन धर्मकामार्थसाधनम् ॥ क्षेत्रेषु यत्कृतं कर्म निष्कामं च शुचिस्मिते १॥
तन्मोक्षाय भवेद्भद्रे तस्मात् कर्म समाचरेत् ॥ पुण्यक्षेत्रे कृतं कर्म सिध्यत्येव न संशयः ॥२॥
लक्षणैर्लक्षितात्मान इष्टानिष्टप्रयोगतः ॥ दृष्ट्वाऽनिष्टं शरीरस्य प्रक्रमेणोर्ध्वदेहिकम् ॥३॥
गोकर्णाख्यं मम क्षेत्रं प्रविशेद्वरवर्णिनि ॥ तत्र स्थित्वा किञ्चिदपि क्रियते कर्म भामिनि ॥४॥
तत्क्षणाज्ज्ञानमासाद्य मुक्तिं विन्दति शाश्वतीम् ॥

देव्युवाच ॥

अनिष्टमिति किं प्रोक्तं प्राणिनां पुरुषोत्तम ॥५॥
जनानामन्तकालस्तु ज्ञायते च कथं विभो ॥ कथं विज्ञायतेऽनिष्टं केन कालेन वा पुनः ॥६॥
एतदाचक्ष्व मे देव परं कौतूहलं हि मे ॥

रुद्र उवाच ॥

इष्टानिष्टानि कल्याणि मया सृष्टानि देहिनाम् ॥७॥
शुभाशुभफलायैव तानि तानि निबोध मे ॥ योगाभ्यासाद्विजानीयात् प्रकृतिं स्वात्मकां प्रिये ॥८॥
इन्द्रियाणां स्वभावं च चित्तस्य च निवर्तनम् ॥ अरिष्टानां च संयोगं निमित्तानि च भामिनि ॥९॥
परीक्ष्य प्रक्रमेत् कर्म प्राणायामविधानतः ॥ स्वतो युञ्जीत यत्नेन प्राणायामान् यथाबलम् ॥१०॥
तेषामभ्यासयोगेन योगो भवति योगिनाम् ॥ येन कालेन भवति प्राणं कोष्ठे शरीरिणाम् ॥११॥
तदा न रोधयेत् तद्धि समाधिं विदुषो विदुः ॥ प्राणोऽपानस्तथोदानः समानो व्यान एव च ॥१२॥
वायुः पञ्चविधो भद्रे शरीरे परिवर्तते ॥ उच्छ्वासो वमनं जृम्भं कासभिक्काक्षुधानि च ॥१३॥
नित्यमूर्ध्वं प्रवृत्तस्य प्राणवायोर्विचेष्टितम् ॥ निश्वासश्च निगारश्च शकृन्मूत्रविसर्जनम् ॥१४॥
अधोगतेरपानस्य चेष्टितं शुक्लनिर्गतिः ॥ व्यानस्तु सर्वगात्रस्थो नयत्याहारवस्तुषु ॥१५॥
बलजृम्भणचेष्टानामुदानं करणं भवेत् ॥ समानं जाठरो वह्निमुद्दीपयति सर्वदा ॥ १६॥
पञ्चानामपि वायूनामुपस्थानैः पृथग्विधैः ॥ परीक्ष्य तेषां भावानि स्फुरणानि च सुव्रते ॥१७॥
कर्णस्याभ्यन्तरे घोषो जठरे चाङ्गसन्धिषु ॥ कण्ठे च पर्वणान्ते च कर्णमूर्धनि च स्थितम् ॥१८॥
अन्येषु च प्रदेशेषु वायवो देहगोचराः ॥ प्रसन्ना जीवितं दद्युरप्रसन्नास्तनुक्षयम् ॥१९॥
नासिकापुटयोः प्राणः पर्यायेण प्रवर्तते ॥ सङ्क्रान्तिकालं जानीयात्तस्य सन्ततचारिणः ॥२०॥
दिवसेनैव तज्ज्ञेयं गुणा संवत्सरस्य च ॥ उत्तरं दक्षिणे विद्याद्दक्षिणं चोत्तरायणे ॥२१॥
मध्यमाङ्गन्तु जानीयाद्विषुकालं यथाक्रमम् ॥ अहोरात्राणि यावन्ति जायन्ते पञ्चविंशतिः ॥२२॥
एकान्ते चिन्तयेन्नित्यं सूर्यमार्गेण तद्बुधः ॥ नाडिकां सुदिनाद्येषु योऽरिष्टः स च सङ्गतः ॥२३॥
नातः सूक्ष्मतरं किञ्चिदायुर्ज्ञानं न विद्यते ॥ ह्रासवृद्धी समालोक्य कोष्ठवायोर्विविच्य च ॥२४॥
हानिरिन्द्रियशक्तीनां छायायाः परिवर्तनम् ॥ दृष्टिराद्यावशेषेण पुंसः सर्वस्य वर्तते ॥२६॥
पादाङ्गुष्ठे कराङ्गुष्ठे स्फुरणं च विनश्यति ॥ तस्य संवत्सरादूर्ध्वं जीवितं च विनश्यति ॥ २७॥
मणिबन्धनकं चैव स्फुरणं यस्य नश्यति ॥ षण्मासादधिकं तस्य जीवितं नहि विद्यते ॥२८॥
यदि तत्स्फुरणं नश्येदधस्तात् कूर्परोपरि ॥ त्रिमासाभ्यन्तरे मृत्युर्ध्रुवं तस्य भविष्यति ॥२९॥
मेढ्रपार्श्वे च कक्षे च नश्यति स्फुरणं यदि ॥ एकमासेन तस्यापि जीवितञ्च विनश्यति ॥३०॥
आदर्शे यः स्वस्य मुखं विपरीतं च पश्यति ॥ जठरान्तर्ध्वनिं श्रुत्वा दशाहादेव नश्यति ॥३१॥
खद्योतसदृशं ज्योतिर् नेत्रयोः पञ्चभिर्दिनैः ॥ न पश्येद्यदि दीपाग्रं नरो नश्यति जीवितात् ॥३२॥
छायापुरुषमालोक्य न जानीयाच्छुभाशुभम् ॥ यत्सूत्रं पूर्वमाख्यातं तस्य च्छेदो भविष्यति ॥३३॥

तदप्यनिष्टमेव स्यात् सदा तं च निरूपयेत् ॥ पुत्रे मित्रे कलत्रे च स्नेहविच्छित्तिमागतः ॥३४॥
तदप्यनिष्टमेव स्यात् प्रकृतेः परिवर्तनम् ॥ वामावर्तं सदा मूत्रमन्यथा परिवर्तनम् ॥३५॥
यस्य तस्य भवेन्मृत्युर्नात्र कार्या विचारणा ॥ प्राणः प्रदक्षिणावर्तः सर्वदा परिवर्तते ॥ ३६॥
स यदा वामतो याति मृत्युस्तस्य प्रकीर्तितः ॥ अपानो दक्षिणावर्तो यदा यस्य प्रजायते ॥३७॥
सोचिरेणैव कालेन यमलोकं प्रयाति वै ॥ मूत्रेणैव परीक्षा स्यादुक्तस्यार्थस्य वेदने ॥ ३८॥
मूत्रन्तु दक्षिणावर्तं वदेत्तस्य मृतिं नरः ॥ पङ्के वा सिकते वापि पादन्यासं परीक्षयेत् ॥३९॥
भेदः पदे भवद्यस्य तदनिष्टं भविष्यति ॥ अनामिका मध्यरेखा वामा यदि भविष्यति ॥४०॥
सोचिरेणैव कालेन मृत्योर्वशमुपेष्यति ॥ सर्वाण्यङ्गुलिपर्वाणि विक्रियन्ते यदा स्फुटम् ॥४१॥
तदप्यनिष्टं भवति नासिका च गुरुस्तथा ॥ वामाक्षि विद्र्वेद्यस्य न्यूनं वापि भविष्यति ॥४२॥
तदप्यनिष्टंजानीयाल्ललाटे यूकदर्शनम् ॥ मूर्ध्नि यस्य ललाटे तु यूकं यदि चरिष्यति ॥४३॥
तस्य मृत्युर्न दूरस्थस्तथा काकादिमर्दनम् ॥ नाभिमात्रे जले स्थित्वा स्वलिङ्गं परिभावयेत् ॥४४॥
लिङ्गं प्राग्वत् स्थितं यस्य तस्य मृत्युर्न दूरतः ॥ यस्य लिङ्गं भवेद्देवि चलं पर्णवदुच्चकैः ॥४५॥
नैव मृत्युर्भवेत्तस्य वत्सरत्रितयादधः ॥ नवोदितस्य चन्द्रस्य यो न पश्यति मण्डलम् ॥४६॥
अन्तः क्षीणं बहिः सूक्ष्मं रेखामयमवस्थितम् ॥ तस्य संवत्सरादर्वाक् मृत्युर्भवति भमिनि ॥ ४७॥
सूर्यं वा शशिनं वापि द्वयं पश्यति मानवः ॥ स्वप्ने वापि भवेन्मृत्युस्तस्य षण्मासतो ध्रुवम्
॥४८॥
अप्रदीप्तौ शशाङ्कार्कौ वह्निं वा दीप्तिवर्जितम् ॥ पश्यन्नेकादशे मासि यमलोकं स पश्यति ॥४९॥
यक्षरक्षःपिशाचानां विमानं नगराणि च ॥ पश्यति ग्रीष्मकाले यो दशमासं स जीवति ॥ ५०॥
काञ्चनं ताम्रकं रौप्यं रत्नानि विविधानि च ॥ रत्नं मूर्धनि वा पश्येदष्टमासं स जीवति ॥५१॥
रक्तः कपोतकः काकः कृकलासोऽथ वा क्वचित् ॥ पांसुवर्षं भवेत् वृष्टेः कारणं न भवेद्यदि
॥५२॥
षण्मासान्मृत्युमाप्नोति स नरः शुभलोचने ॥ नीलवर्णं यदा घोरं नरः पश्यति राक्षसम् ॥५३॥
पिशाचान् वा घोररूपान् त्रिमासं तस्य जीवितम् ॥ अग्नियुक्ते श्मशाने यः सन्ध्याकाले निशाचरान्
॥५४॥
पश्यति स्वयमेवैको द्वौ मासौ तस्य जीवितम् ॥ वस्तगन्धि भवेन्मूत्रं विना रोगैर्भवेत् क्वचित्
॥५५॥

प्रेतान् वा विविधान् पश्येन्निधानानि महान्ति च ॥ स्वप्ने सलिलमग्नस्य दुःखं वा दारुणं भवेत् ॥५६॥

हेतुना वा विना व्यक्तं ध्रुवं मरणमादिशेत् ॥ अप्रियानपि पश्येद्वा बन्धूनिव हितैषिणः ॥५७॥

बान्धवानिव पश्येद्वा चाप्रियानहितैषिणः ॥ एकमासावधेरर्वाक् तस्य नश्यति जीवितम् ॥५८॥

चन्द्रादित्यौ च यः पश्येद्रुधिरेणोक्षिताविव ॥ गमनं रुधिराद् व्यक्तं पक्षमेकं स जीवति ॥५९॥

दर्पणे सलिले वापि प्रतिबिम्बं पुरःस्थितम् ॥ यः पश्येद्विवृताकारमङ्गहीनमथापि वा ॥६०॥

दीपस्य वा प्रशान्तस्य यस्तु गन्धं न जिघ्रति ॥ द्वादशाहेन तस्यापि मृत्युर्भवति भामिनि ॥६१॥

ओष्ठौ प्रव्रजतः स्थानात् षड्रात्रं तस्य जीवितम् ॥ ह्रासं यस्य भवेज्जिह्वा मुखं वा कमलोद्भवम् ॥६२॥

आहारेषु महान्रागो जीविताशा च भूयसी ॥ गण्डौ वा नीलकौ रक्तौ त्रिरात्रं तस्य जीवितम् ॥६३॥

तेन प्लावितमात्मानं दुग्धाम्भोनिधिमध्यगम् ॥ तद्वीचिमालाभिहतं निश्चयं भावयेद्बुधः ॥६४॥

ततोस्य न भवेन्मृत्युश्चिरकालं स तिष्ठति ॥ शरीरं पुष्टमेव स्यात् सर्वदा बलवद्दृढम् ॥६५॥

अतोपि श्रेष्ठ एव स्यादुपास्यः सर्वदा बुधैः ॥ आस्ते यो निष्कलं भावं सर्वानिष्टविनाशनम् ॥६६॥

इत्थं यश्चरति विमुक्तबन्धं शुद्धसंवृतिं विषयपराङ्मुखोऽभिभुङ्क्ते ॥
तस्योच्चैर्गुणमहिमातिरिक्तरूपं हस्तस्थपदमिति पण्डिता वदन्ति ॥६७॥

इतिश्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे अन्त्यकालज्ञापनंनाम दशोत्तरशततमोऽध्यायः ॥११०॥

 अध्यायाः अकारादि <<BACK  ॥ अध्यायः १११ ॥  NEXT>>  श्लोक संख्या–७४

## ॥ सुरुच्याश्रम वर्णनम् ॥

### अन्त्यकाले ज्ञाते क्षेत्रगमनविधिः

॥ देव्युवाच ॥

काले ज्ञाते देवदेव योगिभिस्तत्त्वदर्शिभिः ॥ यत्कर्तव्यं श्रुतं तद्धि त्वत्तः सुरगणार्चित ॥१॥

ज्ञाते काले विमूढात्मा न जानात्यात्मनः क्षयम् ॥ अज्ञानतमसा जन्तुरावृतः किं करिष्यति ॥२॥

रुद्र उवाच ॥

शृणु तेषामपि हितं वक्ष्यामि वरवर्णिनि ॥ गुरोः सकाशाद्योगानां ज्ञानं सम्प्राप्य मानवाः ॥३॥
गुरु शुश्रूषया लभ्यं ज्ञानं तदुपदेशजम् ॥ अन्यथा न भवेल्लभ्यं गुरुशुश्रूषया विना ॥४॥
तस्मादात्महितं प्रेप्सुर् गुरुसेवां समाचरेत् ॥ सर्वेषामेव जन्तूनामयं साधारणो विधिः ॥५॥
गुरुप्रसादाज्ज्ञात्वैव गतागतमथात्मनः ॥ कालाभिज्ञस्ततो विप्रो मोक्षधर्मं विचिन्तयेत् ॥६॥
सन्यस्य सर्वकर्माणि मम क्षेत्रमियाद्बुधः ॥ यथोचितं धनं दत्वा पुत्रदाराविरोधि यत् ॥७॥

देव्युवाच ॥

किं तद्यथोचितं देयं तद्ब्रूहि परमेश्वर ॥ पुत्रदाराविरोधेन यद्देयं तदिहोच्यताम् ॥८॥

शिव उवाच ॥

न्यायागतस्य द्रव्यस्य तृतीयांशं यथोचितम् ॥ द्वौ भागौ पुत्रदारार्थं निक्षिपेद्वरवर्णिनि ॥९॥
तृतीयेन तु भागेन प्रचरेदौर्ध्वदेहिकम् ॥ स्वेनांशेन तु यच्छ्रेयस्तच्चरेदात्मनो हितम् ॥१०॥
अन्यथा निरयं याति पच्यते तत्र किङ्करैः ॥ तस्मात् स्वभागं दातव्यं परलोकाय भामिनि ॥११॥
ऐहिकामुष्मिकौ भद्रे न समौ हि कदाचन ॥ अत्यल्पमैहिकं विद्धि क्षणिकं स्वप्नवच्छुभे ॥१२॥
तस्मादामुष्मिकार्थाय दद्यात् सर्वस्वमप्युत ॥ ज्ञात्वैतानात्मनो भावान् मृत्युं ज्ञात्वा प्रयत्नतः ॥१३॥

आसन्नमृत्युः कुर्वीत सर्वत्यागं शुचिस्मिते ॥ त्यागादघानि नश्यन्ति ज्ञानाज्ञानकृतानि वै ॥१४॥
त्यागात् कर्मक्षयं याति क्षीणे कर्मणि शुध्यति ॥ शुद्धान्तःकरणो गच्छेत् पुण्यक्षेत्रमतन्द्रितः ॥१५॥
क्षेत्रं प्रियतरं देवि गोकर्णं मम सर्वदा ॥ तस्माद्गच्छेन्नरो धीमान् गोकर्णं क्षिप्रसिद्धिदम् ॥१६॥
क्रिमिकीटपतङ्गनां मत्क्षेत्रे मरणं भवेत् ॥ यज्वानोपि न यास्यन्ति तेषां गतिमनिन्दिते ॥१८॥
तस्मात् क्षेत्रं प्रधानं हि देवानामिह शाङ्करम् ॥ मत्क्षेत्रे मरणं देवि अपुण्यानामसम्भवम् ॥१९॥
ज्ञानं च तस्मिन् सुभगे स्नानं होमं तथार्चनम् ॥ एतानि क्रियते योऽत्र स देवो नात्र संशयः ॥२०॥
ये मरिष्यन्ति गोकर्णे ज्ञानिनोऽज्ञानिनोपि वा ॥ पशुपक्षिमृगा वापि स्थावराः कृमयोऽपि वा ॥२१॥
ते धन्याश्च कृतार्थाश्च ते सिद्धा नात्र संशयः ॥ स्वर्गापवर्गं देवत्वं निर्वाणमथ वापि वा ॥२२॥
न तेषां दुर्लभं देवि यद्यदिच्छन्ति चेतसा ॥

## सुरुचेः कथा–सुरुच्याश्रमं

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ॥२३॥

शृणुष्वैकमना भद्रे सहैभिः पार्षदैः सुरैः ॥ पुरा सौवीरदेशे तु सुरुचिर्नाम वै द्विजः ॥२४॥
आस्ते कलत्रपुत्राद्यैः सहितो मूढचेतनः ॥ लोभेन महता युक्तो धनं बहु समाप्तवान् ॥२५॥
वैश्यवृत्या वरारोहे स्वाश्रमाचारवर्जितः ॥ गृहागतेभ्यो विप्रेभ्यो धनं वा धान्यमेव वा ॥२६॥
भिक्षान्नं वा वरारोहे न दत्तं तेन पापिना ॥ पित्रोर्दिनं परित्यक्तं व्रतं नित्यक्रियादिकम् ॥२७॥
एवं बहुषु कालेषु गतेषु वरवर्णिनि ॥ सुरुचिर्धनलोभेन मन्दिरात् स्वाद्विनिर्ययौ ॥२८॥
देशाद्देशान्तरं गत्वा अर्जयित्वा धनं बहु ॥ क्रमाद्गोकर्णमगमत् पूर्वपुण्यवशात् प्रिये ॥२९॥
तस्मिन् काले जनास्तत्र ब्राह्मणाद्या वरानने ॥ माघकृष्णचतुर्दश्यां मत्पूजार्थं समागताः ॥३०॥
उषःकाले कोटितीर्थे स्नात्वा सम्पूज्य मां शुभे ॥ मौनव्रतधराः सर्वे शृण्वन्तो गुरुचोदिताम् ॥३१॥
मत्कथां च वरारोहे क्षेत्रमाहात्म्यमादितः ॥ यदा शुश्राव सुरुचिर्मत्कथां पापहारिणीम् ॥३२॥
धर्मकामार्थफलदां ज्ञानसिद्धिप्रदां नृणाम् ॥ मत्कथाश्रवणेनैव तत्क्षणाज्ज्ञानमाप्तवान् ॥३३॥
सुरुचिर्ब्राह्मणोऽप्याह पश्चात्तापसमन्वितः ॥ अज्ञानिनाऽतिलुब्धेन न कृतं पापबुद्धिना ॥३४॥
मया पुण्यं किञ्चिदपि तथा सन्ध्यादिकाः क्रियाः ॥ पित्रोः श्राद्धं च न कृतं तथा नातिथयोर्चिताः ॥३५॥
मया न दत्तं भिक्षान्नं यतीनां च तपस्विनाम् ॥ पापिनं पापकर्माणं त्राहि मां शरणागतम् ॥३६॥
पुराणज्ञ महाभाग सर्वज्ञानविशारद ॥ गुरो मोक्षोपदेशेन त्राहि मां भवसागरात् ॥३७॥
इत्युक्त्वा स्वधनं तस्य निक्षिप्य पुरतो द्विजः ॥ पपात पादयोस्तस्य ननाम च पुनः पुनः ॥३८॥
ततः पौराणिको भद्रे समुत्थाप्य द्विजं मुदा ॥ उवाच श्लक्ष्णया वाचा सुरुचिं ब्राह्मणं द्विजः ॥३९॥

पौराणिक उवाच ॥

सुरुचे शृणु मद्वाक्यं धन्यस्त्वं पुण्यगौरवात् ॥ पूर्वजन्मकृतं पुण्यं फलितं तव साम्प्रतम् ॥ ४०॥
त्वं हि पूर्वभवे वैश्यो मत्स्यानां विषये स्थितः ॥ सदा दुर्जनसंसक्तः स्वाश्रमाचारवर्जितः ॥४१॥
अन्यायेनार्जितं द्रव्यं त्वया लोभेन चेतसा ॥ एवं बहुदिनेऽतीते पम्पाक्षेत्रं गतस्ततः ॥ ४२ ॥
विरूपाक्षं महालिङ्गं दृष्ट्वा कृत्वा प्रदक्षिणम् ॥ नमस्कृत्वा तु तल्लिङ्गं तत्रैव स्थितवान्निशि ॥४३॥
तत्र सत्सङ्गतिं लब्ध्वा श्रुत्वा पुण्यकथां हरेः ॥ नीत्वा तद्रात्रिशेषं तु प्रातस्तस्माद्विनिर्गतः ॥४४॥
गृहं गन्तुं द्विजवर आदाय द्रव्यसञ्चयम् ॥ चौरैर्दृष्टो मध्यमार्गे तैर्हतो धनकाङ्क्षया ॥४५॥
तदा पुण्यविपाकेन जातो विप्रकुलेऽमले ॥ पूर्वकर्मविपाकेन लोभबुद्धिरभूत्तव ॥४६॥
क्षेत्रसन्दर्शनात् पुण्यात् सत्सङ्गाल्लिङ्गदर्शनात् ॥ पुराणश्रवणाच्चैव जातस्त्वं विप्रजन्मभाक् ॥४७॥

अत्र स्नात्वा कोटितीर्थे पूजयित्वा महाबलम् ॥ उपवासं कुरुष्वाद्य निशि जागरणं कुरु ॥४८॥
विप्रैरेतैः सह ब्रह्मन् श्वः प्रभातेऽरुणोदये ॥ कोटितीर्थे यथान्यायं स्नाहि शुद्धेन चेतसा ॥४९॥
ततो देवं च सम्पूज्य कृत्वा ब्राह्मणतर्पणम् ॥ पश्चात्त्वं पारणं कृत्वा शिवनामपरायणः ॥५०॥
ततो गत्वा गृहं विप्र स्वार्जितं द्रव्यसञ्चयम् ॥ कृत्वा विभागं विप्रेभ्यो दत्वा चैव पृथक् पृथक्
॥५१॥
पुत्रेषु पत्नीं निक्षिप्य स्वांशमादाय सत्वरः ॥ गोकर्णं पुनरागच्छ ततो वक्ष्याम्यहं तव ॥५२॥
ज्ञानोपदेशं विप्रेन्द्र नात्र कार्या विचारणा ॥ इत्युक्तः सुरुचिर्देवि ज्ञानिना तेन धीमता ॥५३॥
तथैव कृतवान् विप्रः पुनर्गत्वा स्वकं गृहम् ॥ पुत्रेभ्यः स्वधनं दत्वा पत्नीं संस्थाप्य वेश्मनि
॥५४॥
भूयो गोकर्णमासाद्य सुरुचिर्ब्राह्मणोत्तमः ॥ तत्र कृत्वा महातीर्थं लिङ्गं संस्थाप्य शाम्भवम् ॥५५॥
तपस्तेपे निराहारो मां यजन् भक्तिसंयुतः ॥ वर्षाणामयुतं देवि चचार सुरुचिस्तपः ॥५६॥
ततोऽहं दृश्यतां प्राप्तस्तपसा तस्य तोषितः ॥ वरं वरय भद्रन्ते यत्तेऽभिलषितं हृदि ॥५७॥
तत्तेहं सम्प्रदास्यामि यद्यपि स्यात् सुदुर्लभम् ॥

सुरुच्युवाच ॥

यदि तुष्टोसि देवेश वरार्हो यदि चाप्यहम् ॥५८॥
संसारसागरादस्माद्दुःखितं मां समुद्धर ॥ मोक्षदानात् सुरश्रेष्ठ आश्रमं मे सुरोत्तम ॥५९॥
तीर्थं लिङ्गं तथा ह्यस्मिन् त्रैलोक्ये चोत्तमं भवेत् ॥

शिव उवाच ॥

मासि भाद्रपदे शुक्ले पञ्चम्यां येत्र मानवाः ॥६०॥
गत्वा तीर्थवरे ह्यस्मिन् लिङ्गं सम्पूज्य भक्तितः ॥ जप्त्वा पञ्चाक्षरीं विद्यां कुर्वन्ति द्विजसत्तम
॥६१॥
तेषां त्रिजन्मचरितं पापं नश्यत्यसंशयम् ॥

शिव उवाच ॥

मत्सारूप्यं ततो दत्वा विप्राय वरवर्णिनि ॥६२॥
ततो विप्रेण सहितः कैलासं पुनरागमत् ॥ सुरुचिर्ब्राह्मणो देवि मल्लोकं प्राप्य दुर्लभम् ॥६३॥

स्थितवान् सुचिरं कालं मत्क्षेत्रस्य प्रभावतः ॥ तदन्ते मम सायुज्यं लब्धवान् पुण्यगौरवात् ॥६४॥

---

## गोकर्णे मरणस्य प्रशंसा

तस्माच्छ्रेष्ठतमं लोके गोकर्णं नात्र संशयः ॥ महापातकयुक्तोऽपि गोकर्णे मरणं लभेत् ॥६५॥
स रुद्रलोकं सम्प्राप्य रुद्रवन्मोदते चिरम् ॥ अग्निप्रवेशं ये तत्र कुर्वन्ति मयि मानसाः ॥६६॥
मामेव प्राप्नुवन्त्येव नात्र कार्या विचारणा ॥ प्रायोपवेशनं तत्र ये कुर्वन्ति द्विजोत्तमाः ॥६७॥
मय्येवार्पितचित्तास्ते कृष्णे वा पुरुषोत्तमे ॥ सर्वबन्धविनिर्मुक्ता विष्णुलोकं प्रयान्ति हि ॥६८॥
क्रीडन्ति तत्र वै भद्रे यावद्धरिहरौ शुभे ॥ कर्मक्षये हि जन्तूनां गोकर्णे मरणं भवेत् ॥६९॥
नान्येषां तद्भवेद्भद्रे नात्र कार्या विचारणा ॥ उत्क्रान्तिकाले गोकर्णं ये स्मरिष्यन्ति दूरतः ॥७०॥
तेपि निष्कल्मषा भूत्वा स्वर्गं गच्छन्ति शोभने ॥ कृमिकीटपतङ्गा वा मृगपक्षिसरीसृपाः ॥७१॥
मृतास्तस्मिन् गमिष्यन्ति रुद्रलोकं न संशयः ॥ तस्मात् परीक्ष्य यत्नेन कार्याभिज्ञः समाहितः ॥७२॥
ज्ञात्वा गच्छेत गोकर्णं शीघ्रं पुष्करलोचने ॥ गोकर्णे मृतिमिच्छन्ति देवमानुषपन्नगाः ॥७३॥
ऋषयश्च महाभागाः किं तस्मादधिकं ततः ॥
इतिश्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे सुरुच्याश्रमवर्णनंनाम एकादशोत्तरशततमोऽध्यायः ॥१११॥

 अध्यायाः अकारादि <<BACK  ॥ अध्यायः ११२ ॥  NEXT>>  श्लोक संख्या–५४

## ॥ क्षेत्रमाहात्म्य वर्णनम् ॥

## गोकर्णक्षेत्रमहिमा

रुद्र उवाच ॥

पवित्राणां पवित्रं तन्मङ्गलानां च मङ्गलम् ॥ दैवतं देवतानां च गोकर्णं वरवर्णिनि ॥१॥
यथा शिरः प्रधानं तु जन्तूनामङ्गकल्पने ॥ तथैव पुण्यक्षेत्राणां गोकर्णं शिर उच्यते ॥२॥
खण्डेषु भारतं खण्डं यथा श्रेष्ठं वरानने ॥ तथैव भूप्रदेशेषु गोकर्णं तद्विशिष्यते ॥३॥

कृतस्य कर्मणस्तस्मिन् शुभस्याशुभस्य वा ॥ तत्फलं मनुजैर्भद्रे अन्यलोकेषु भुज्यते ॥४॥
स्वर्गे वा नरके वापि कृतं कर्म फलिष्यति ॥ वर्षासु रमणीयासु कृतमेव च भुज्यते ॥५॥
देवत्वं देवलोकं वा इन्द्रत्वं वैष्णवं पदम् ॥ ब्रह्मत्वं मत्पदं चैव तत्पदं वरवर्णिनि ॥६॥
अधश्चोर्ध्वं च तिर्यक्त्वं नरकं मोक्षमेव वा ॥ यथा यथा हि कुर्वन्ति मनुजा ह्यत्र भामिनि ॥७॥
तथा तथा प्राप्नुवन्ति मनुजा नात्र संशयः ॥ शुभं कृत्वात्र कल्याणि स्वर्गं गच्छन्ति मानवाः ॥८॥
पापानामत्र कर्तारो निरयं प्राप्नुवन्त्यधः ॥ तस्माद्विशिष्यते भूमौ गोकर्णं कर्मभूमिषु ॥९॥
अस्मिन् वै जन्म कांक्षन्ते देवगन्धर्वराक्षसाः ॥ ऋषयश्च महात्मानो यक्षविद्याधरा अपि ॥१०॥
कर्मभूमौ जनिं प्राप्य मानुष्यं चोत्तमे कुले ॥ स्नानदानादिकं पुण्यं तपोयज्ञादिसत्क्रियाः ॥११॥
येत्र कुर्वन्ति विप्रेन्द्रास्तेषां बिभ्यति वै सुराः ॥ सुकर्मणा च स्थानानि प्राप्नुवन्तीह शोभने ॥१२॥
तस्माद्विघ्नांश्च कुर्वन्ति सत्कर्मसु सुराः प्रिये ॥ सत्ये तपसि दाने च यज्ञे देवार्चने तथा ॥१३॥
क्षेत्राभिगमने चैव मत्क्षेत्रेषु विशेषतः ॥ विघ्नान् कुर्वन्ति दिविजास्तदुपायं वदामि ते ॥१४॥
मद्भक्त्या शुभकर्माणि कुर्याद्धैर्येण मानवः ॥ मत्क्षेत्रेषु वरारोहे तेषां विघ्नो विनश्यति ॥१५॥
तस्मात् कर्माणि कुर्वीत मत्क्षेत्रे मामनुस्मरन् ॥ तेषां सिद्धिं प्रदास्यामि अचिरान्नात्र संशयः ॥१६॥
सुक्षेत्राणि बहून्यत्र कर्मभूमौ वरानने ॥ सन्ति तेषामपि श्रेष्ठं गोकर्णं नात्र संशयः ॥१७ ॥
देवानामपि सर्वेषां क्षेत्राणि च पृथक् पृथक् ॥ कर्मभूमौ ह्यसंख्यानि सन्ति पुष्करलोचने ॥१८॥
शालग्रामादिक्षेत्रेषु सुचिरात् सिद्धिरिष्यते ॥ स्वर्गं देवत्वमपि च धिष्ण्येशत्वमथापि वा ॥१९॥
गोकर्णे क्षिप्रमाप्नोति निर्वाणं वा शुचिस्मिते ॥ मनसा यद्यदिच्छेत तत्तत् क्षिप्रमवाप्यते ॥२०॥
गोकर्णादधिकं भद्रे क्षेत्रमन्यत्र विद्यते ॥ तस्मादत्रैव तिष्ठन्ति देवता ऋषयस्तथा ॥२१॥
मां पूजयन्ति विधिवत् विघ्नांश्छित्वा यथाबलम् ॥ मत्क्रीडानुगतास्तत्र मच्चित्ता मत्परायणाः
॥२२॥
मामेवैष्यन्ति चान्ते च पुनरावृत्तिवर्जिताः ॥ दानानि ये प्रयच्छन्ति गोकर्णे वरवर्णिनि ॥२३॥
तान् सर्वविघ्ननिर्मुक्तान् विद्धि रुद्रत्वमागतान् ॥ तत्रोपवासं विधिवत् ये कुर्वन्ति शुचिस्मिते
॥२४॥
मय्येवार्पितचित्ता वै कृष्णे वा पुरुषोत्तमे ॥ ते सर्वपापनिर्मुक्ताः स्वर्गे क्रीडन्ति देववत् ॥२५॥
महादानानि वै तत्र प्रयच्छन्ति मनीषिणः ॥ न तेषां शक्यते वक्तुं महिमा मद्विधैरपि ॥२६॥
देवि वर्षसहस्रैर्वा मम वन्द्या हि ते नराः ॥

देव्युवाच ॥

महादानानि देवेश तद्विधिं चैव सर्वशः ॥२७॥

ब्रूह्यशेषेण मे शम्भो श्रोतुमिच्छा प्रवर्तते ॥

रुद्र उवाच ॥

शृणु देवि प्रवक्ष्यामि दानमाहात्म्यमुत्तमम् ॥२८॥

गोदानं भूमिदानं च द्रव्यदानं च पुष्कलम् ॥ अन्नदानं विशेषेण कन्यादानं तथाधिकम् ॥२९॥

रत्नदानं चाश्वदानं गृहं सोपस्करान्वितम् ॥ ग्रामखेटपुराणां च दानं चाधिकदक्षिणाम् ॥३०॥

सत्रसंस्थापनं दानं देवतानां यथाविधि ॥ ब्रह्मसंस्थापनं दानं दीनस्य परिपालनम् ॥३१॥

विद्यादानं विशेषेण महादानानि भामिनि ॥ एतानि ये प्रयच्छन्ति गोकर्णे मम सन्निधौ ॥३२॥

तेषामभीष्टं दास्यामि यद्यपि स्यात् सुदुर्लभम् ॥

---

## देवानां असुराणां च भूमौ मनुष्यरूपेण चरणम्

स्वर्गलोकात् क्षितिं प्राप्य देवा मत्क्षेत्रवासिनः ॥३३॥

सुकृतानि चरिष्यन्ति द्विजरूपेण पार्वति ॥ मुक्तिकामा वरारोहे गोकर्णे मत्परायणाः ॥३४॥

सत्यदानतपोयुक्ता दयादाक्षिण्यगोचराः ॥ प्रसन्ना मृदुभाषाश्च देवद्विजपरायणाः ॥३५॥

धर्मोपदेशिनश्चैव पुराणार्थविचक्षणाः ॥ हितोपदेशिनश्चैव परेषां वरवर्णिनि ॥३६॥

स्वर्गलोकादिह प्राप्तान् तान् विद्धि दिविजान् प्रिये ॥ सिद्धिं प्राप्य पुनस्ते हि गच्छन्ति त्रिदिवं सुराः ॥३७॥

तस्मात् सेव्यं वरारोहे क्षेत्रं गोकर्णमेव हि ॥ सेव्योऽहं सर्वभूतानां सेव्यो विष्णुर्वरानने ॥३८॥

गोकर्णं च सदा लोके सेव्यमात्महितैषुभिः ॥

देव्युवाच ॥

नरकादागतान् देव कथं विद्यां सुरेश्वर ॥३९॥

आसुरं पक्षमापन्नान् ज्ञातुमिच्छामि शङ्कर ॥

शङ्कर उवाच ॥

निरयादागतान् देवि शृणुष्व गदतो मम ॥४०॥

आसुरा देवि तद्भूतास्तत्पक्षानुगताः सदा ॥ देवि देवद्विजातीनां रमन्ते निन्दया सदा ॥४१॥

आविष्कुर्वन्ति गुह्यानि परेषां पीडनोत्सुकाः ॥ धर्मशास्त्रोदितान् धर्मान् हेतुवादैः क्षिपन्ति च

।।४२।।

निर्घृणा गतलज्जाश्च विचरन्ति यथासुखम् ॥ अदाक्षिण्या ह्यदातारः असत्याभिरताः सदा ॥४३॥
श्रुतिस्मृत्युदितं धर्मं पुराणविहितं तथा ॥ गोब्राह्मणसुतीर्थानि निन्दन्ति न नमन्ति च ॥४४॥
हेतुवादैः परेषां च चित्तान्याकर्षयन्ति च ॥ अनिष्टस्थाननिरता निःशौचा निरपत्रपाः ॥४५॥
अप्रियाणां च वक्तारः प्रतिभाक्षेपकारकाः ॥ देवतातिथिभक्तानामदत्वा भुञ्जते सदा ॥४६॥
परापवादनिरताः परोपद्रवकारिणः ॥ परहिंसापरा नित्यं परदुःखेन हर्षिताः ॥४७॥
गुरूंश्चैवावमन्यन्ते अवलेपमदान्विताः ॥ आचार्यांश्चावमन्यन्ते नैषां निष्ठा च शासने ॥४८॥
भेदं कुर्वन्ति देवानां तामसाः पृथिवीतले ॥ विष्णुं ब्रह्मण्यदेवेशं लोकनाथं जगद्गुरुम् ॥४९॥
निन्दन्ति मां च पापिष्ठाः कूटयुक्तिप्रदर्शकाः ॥ इत्येवमादिभिर्लिङ्गैरासुराः पृथिवीतले ॥५०॥
मोहिष्यन्तः प्रजाः सर्वा विचरन्ति शुभानने ॥ पुनर्गच्छन्ति नरकं यावच्चन्द्रदिवाकरौ ॥५१॥
ततश्च मुक्ता जायन्ते कृमिकीटादियोनिषु ॥ ततः क्रमेण मानुष्यं कदाचित् प्राप्य दुःखिताः ॥५२॥
कुत्सितां योनिमासाद्य दरिद्रा व्याधिपीडिताः ॥ अन्धाश्च बधिराश्चैव कुष्टिता विकटास्तथा ॥५३॥
दृश्यन्ते वृत्तिहीनाश्च भ्रमन्तश्च दिशो दश ॥
पूर्वं नैव गतं सुतीर्थमरणं विप्रा न सन्तर्पिता दत्तं नैव हिरण्यमन्नमुदकं गावस्तिला मेदिनी ॥
हव्यं नैव हुतं कदाचिदपि तैर्नाराधितः शङ्करस्ते दुष्यन्ति कुलं कुचैलमनसो नित्यं नरा दुःखिताः
।।५४।।

इतिश्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे क्षेत्रमाहात्म्यवर्णनंनाम द्वादशोत्तरशततमोऽध्यायः ॥११२॥ ॥श्रीमहाबलेश्वराय नमः ॥

## उमामहेश्वरः,उमावनम्

श्रीः ॥ सूत उवाच ॥

इति भर्तृवचः श्रुत्वा पार्वती विनयान्विता ॥ अतिहृष्टमना देवी शिवमूचे शुचिस्मिता ॥१॥

पार्वत्युवाच ॥

देवदेव महादेव सर्वभूतमहेश्वर ॥२॥

गोकर्णक्षेत्रमाहात्म्यं श्रुतं तव मुखाद्विभो ॥ इदानीं द्रष्टुमिच्छामि गोकर्णं क्षेत्रमुत्तमम् ॥३॥

तस्माद्गच्छाव गोकर्णं दर्शयस्व च मे प्रभो ॥ सतीर्थं सवनं देव सबाह्याभ्यन्तरं शुभम् ॥४॥
तत्क्षेत्रं सुमहत्पुण्यं नराणां पापनाशनम् ॥ सर्वसिद्धिप्रदं दिव्यं भूकैलासं मनोहरम् ॥५॥
भूमौ तवेदं वसतिः गोकर्णं परमेश्वर ॥ तस्मात् तद्दृष्टुमिच्छामि त्वया सह सुरोत्तम ॥६॥
तच्छ्रुत्वा वचनं देव्याः शङ्करो भक्तवत्सलः ॥ तथेति देव्या सहितो वृषारूढो मुदान्वितः ॥७॥
प्रययौ प्रमथैः सार्धं गोकर्णं भरतर्षभ ॥ गत्वा क्षेत्रवरं शम्भुर्ऋषिसङ्घैः समावृतः ॥८॥
दर्शयामास तत्क्षेत्रं देव्यै तेभ्यश्च शङ्करः ॥ वनानि सरितश्चैव तीर्थान्यायतनानि च ॥९॥
गोकर्णस्थानि लिङ्गानि सार्वभौमं महाबलम् ॥ शतशृङ्गं गिरिवरं समुद्रं सरितां पतिम् ॥१०॥
दृष्ट्वा सर्वमशेषेण गोकर्णं विस्मयान्विता ॥ विश्वरूपधरा देवी प्रसन्नवदनाम्बुजा ॥११॥
विश्वरूपधरं शम्भुं देवेशं प्रत्यभाषत ॥१२॥

पार्वत्युवाच ॥

दृष्टं सर्वमशेषेण सबाह्याभ्यन्तरं शिव ॥ वस्तुमिच्छाम्यहं चात्र तव क्षेत्रे महेश्वर ॥१३॥
रमणीयं शिवं गुह्यं श्रेष्ठस्थानं विधीयताम् ॥ अनुग्रहो यदि मयि तवास्ति परमेश्वर ॥१४॥
तच्छ्रुत्वाह प्रियै देवो स्मितपूर्वं कुरूद्वह ॥ सार्धयोजनविस्तीर्णे क्षेत्रे ह्यस्मिन् वरानने ॥१५॥
शुभानि सर्वस्थानानि नात्र कार्या विचारणा ॥ यत्र तेऽनुमतं देवि तत्र स्थानमवाप्नुहि ॥१६॥
एवमुक्त्वा प्रियां शम्भुः पार्वत्या सहितस्तदा ॥ शतशृङ्गगिरेस्तस्य पार्श्वे दक्षिणपश्चिमे ॥१७॥
उवास प्रियया सार्धं पार्षदैः सह शङ्करः ॥ तस्मिन् पुण्यतमे राजन्नाश्रमे वृषभध्वजः ॥१८॥
पार्वत्या सह तत्रैव रममाणो यथासुखम् ॥ आस्ते स ह्यद्यापि विभुस्तद्वने भरतर्षभ ॥१९॥
उमावनमिति ख्यातमाश्रमं तदभून्महत् ॥ तत्र तौ दम्पती राजन् सह भूतैरधिष्ठितौ ॥२०॥
तदाश्रमं तु परितो वसन्ति प्रमथाः प्रभो ॥ तदाश्रमं पुण्यतमं गोकर्णे पार्थिवोत्तम ॥२१॥
न पश्यन्त्याश्रमं राजन्नसत्यनिरता नराः ॥ मालिन्या दक्षिणे भागे गिरेरुपरि संस्थितम् ॥२३॥
तदाश्रमं पालयन्ति प्रमथास्तद्बहिः स्थिताः ॥ नाना वर्णशिलास्तत्र दृश्यन्ते कुरुसत्तम ॥२४॥
तत्र प्रवेशनात् पुंसां विज्ञानं सम्भवेद्ध्रुवम् ॥ उमासहायो भगवान् तत्र देवः पिनाकधृक् ॥२५॥
समस्तभूतसहितो रमते शश्वतीः समाः ॥ तदाश्रमं पुण्यतमं देवसिद्धर्षिसेवितम् ॥२६॥
गन्धर्वैरप्सरोभिश्च किन्नरैश्च समावृतम् ॥ नानावृक्षैः परिवृतं नानागुल्मलतावृतम् ॥२७॥
अत्र सन्ति ह्यसंख्यानि तीर्थानि कुरुपुङ्गव ॥ शिला तु कुण्डिकाकारा समुद्रोपरि वर्तते ॥२८॥
क्रीडार्थं तत्समानीतं कैलासं शृङ्गमुत्तमम् ॥ दर्शनादेव तच्चाशु सर्वपापं व्यपोहति ॥२९॥

अग्निष्टोमस्य यज्ञस्य फलं चाविकलं भवेत् ॥ पृथिव्यां यानि तीर्थानि यानि स्वर्गे वसन्ति हि ॥३०॥

तानि सर्वाणि तत्रैव वसन्ति भरतर्षभ ॥ तद्वनस्याभितश्चैव आगतानि शिवाज्ञया ॥३१॥

शौचार्थं गिरिजादेव्यास्तद्वनस्य च दक्षिणे ॥ तेषां द्रवमभूत्तीर्थमुमाह्रदमिति प्रभो ॥३२॥

तत्र स्नात्वा नरो भक्त्या शिवाभ्यां स्थापितं शुभम् ॥ उमामहेश्वरं नाम लिङ्गं त्रैलोक्यविश्रुतम् ॥३३॥

कार्तिके शुक्लद्वादश्यां यः पूजयति भक्तितः ॥ पुत्रार्थी लभते पुत्रं धनार्थी लभते धनम् ॥३४॥

कन्यार्थी लभते कन्यां मोक्षार्थी मोक्षमाप्नुयात् ॥ सोऽश्वमेधस्य यज्ञस्य फलं प्राप्नोत्यसंशयः ॥३५॥

सप्तजन्मकृतात् पापात् स्नात्वा तत्र प्रमुच्यते ॥ तद्वनं भरतश्रेष्ठ ये पश्यन्ति नरा भुवि ॥३६॥

ते सर्वे पापनिर्मुक्ता रुद्रलोके वसन्ति हि ॥ तस्मिन् वने सुरतरुः सर्वकामफलप्रदः ॥३७॥

तत्र च्छायाकरो ह्यास्ते छायापादप उच्यते ॥ सदा पुष्पफलोपेतः सप्तहस्तोच्छ्रितश्च सः ॥३८॥

मृत्युं जयन्ति तं प्राप्य जन्तवो नात्र संशयः ॥ पत्रं पुष्पं फलं तस्य ये खादन्ति ध्रुवं नराः ॥३९॥

तेषां न मृत्युर्न जरा यावन्मन्वन्तरं नृप ॥ अष्टैश्वर्यादिसिद्धिं च लभते नात्र संशयः ॥४०॥

तं न पश्यन्ति राजेन्द्र विषयाकृष्टचेतसः ॥ पापिष्ठाश्च कृतघ्नाश्च न नृशंसा न नास्तिकाः ॥४१॥

नातप्ततपसो राजन् पुनरन्यद्ब्रवीमि ते ॥ तस्माल्लिङ्गादुत्तरतस्तीर्थं त्रैलोक्यविश्रुतम् ॥४२॥

कुण्डिका नाम भद्रन्ते तस्य शृङ्गस्य मूर्धनि ॥ आस्ते पुण्यतमं राजन् दृष्टमात्राघनाशनम् ॥४३॥

ब्रह्महत्यादिशमनं नात्र कार्या विचारणा ॥

---

## चन्द्रदेवाश्रमं मालिनीतीर्थं च

शतानीक उवाच ॥

मालिनी नाम तत्तीर्थं कथमासीच्छ्रुतं भुवि ॥४४॥

तस्य तीर्थस्य चोत्पत्तिं वद मे सूतनन्दन ॥४५॥

सूत उवाच ॥

श्रुणु राजन् प्रवक्ष्यामि मालिन्यास्तीर्थसम्भवम् ॥ क्रीडागिरेरधोभागे मालिनी नाम निम्नागा ॥४६॥

आस्ते पुण्योदका राजन्नृणां पुण्यविवर्धिनी ॥ स्वायम्भुवेन्तरे राजन् राजासीत् पृथिवीपतिः ॥४७॥

चन्द्रदेव इति ख्यातः साक्षाच्चन्द्र इवापरः ॥ मालिनी नाम तस्यासीद्भार्या परमशोभना ॥४८॥

तया सार्धं नृपवरः सिद्धिमिच्छन् परां विभो ॥ गोकर्णं क्षेत्रमासाद्य शतशृङ्गस्य दक्षिणे ॥४९॥
क्रीडाशैलादधोभागे कृत्वाश्रमपदं शुभम् ॥ शिवमाराधयन्नित्यं दिव्यं वर्षसहस्रकम् ॥५०॥
तपस्तेपे निराहारो ब्रह्मचर्यपरायणः ॥ ततः प्रसन्नो भगवानुमया सहितः शिवः ॥५१॥
प्रत्यक्षमगमत्तस्य पार्षदैः सह शङ्करः ॥ मेघगम्भीरया वाचा राजानं प्राह शङ्करः ॥५२॥

शङ्कर उवाच ॥

तुष्टोऽस्मि तव भद्रन्ते तपसाऽनेन सुव्रत ॥५३॥
वरं वरय भूपाल पत्न्या सह यथेप्सितम् ॥ इति शम्भोर्वचः श्रुत्वा चन्द्रदेवस्तदा नृप ॥५४॥
प्रणम्य दण्डवद्भूमौ स्तुत्वा स्तोत्रैर्हरं नृप ॥ हर्षगद्गदया वाचा शङ्करं वाक्यमब्रवीत् ॥५५॥
वरं ददासि चेन्मह्यं वरार्हो यदि चाप्यहम् ॥ त्वयि सायुज्यमिच्छामि तद्देहि भगवन् मम ॥५६॥
एवमुक्तो नृपतिना तथास्त्विति हरोऽब्रवीत् ॥ देवी तां प्राह गिरिजा मालिनीं कुरुपुङ्गव ॥५७॥

पार्वत्युवाच ॥

कांक्षितं तव तुष्टाऽस्मि वरं वरय मालिनि ॥५८॥
देव्या वचनमाकर्ण्य मालिनी हर्षसंयुता ॥ प्रणम्य साऽब्रवीद्देवी त्वत्सायुज्यं प्रदेहि मे ॥५९॥
तथास्त्विति तया चोक्ते त्यक्त्वा तौ तत्कलेवरम् ॥ वायुभूतौ विविशतुर्देवं देवीं कुरूद्वह ॥६०॥
चन्द्रदेवाश्रमं नाम ख्यातं मुक्तिप्रदं नृणाम् ॥ तयोस्तपःप्रभावेण देव्या सार्धं हरस्तदा ॥६१॥
कामार्तो नितरां राजन् तौ च क्रीडां प्रचक्रतुः ॥ सुचिरं राजशार्दूल यथाकामं यथासुखम् ॥६२॥
तयोः सम्भोगजनिता शुक्लभूता महानदी ॥ शुद्धस्फटिकसङ्काशा निर्मला पापहारिणी ॥६३॥
तयोः कलेवरं गृह्णन् बभ्राम भरतर्षभ ॥ मालाकारेव तच्छृङ्गं वेष्टयामास पाविनी ॥६४॥
मालिनी नाम विख्याता नदी सर्वरसान्विता ॥ तदम्भः पीतमात्रेण दिव्यदेहा भवन्ति वै ॥६५॥
देवतुल्याश्चरिष्यन्ति प्राणिनः सर्व एव हि ॥ द्वादशे द्वादशे वर्षे फाल्गुने मासि पार्थिव ॥६६॥
फल्गुन्यर्क्षे कुरुश्रेष्ठ तदा दर्शनमेष्यति ॥ न तां कृतघ्नाः पश्यन्ति न नृशंसा न नास्तिकाः ॥६७॥
नातप्ततपसो राजन्नात्र कार्या विचारणा ॥ तस्मिन् काले नरो यस्तु तत्र स्नाति नृपोत्तम ॥६८॥
सोऽमरत्वमवाप्नोति सत्यं सत्यं मयोदितम् ॥ उमावनस्य माहात्म्यं कथितं ते मयाधुना ॥६९॥
यस्य श्रवणमात्रेण नृणां भवति वाञ्छितम् ॥ स्वर्गापवर्गं राजेन्द किं तस्मादधिकं भुवि ॥७०॥
इतिश्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे उमामहेश्वरवर्णनंनाम त्रयोदशोत्तरशतमोऽध्यायः
॥११३॥

अध्यायाः	अकारादि	<<BACK	।। अध्यायः ११४ ।।	NEXT>>	श्लोक संख्या–४९

।। गोकर्णे ३३ प्रधानलिंगानि – प्रधानाश्रमाणि – गोकर्णयात्रायां नित्ययात्राक्रमः ।।

## गोकर्णयात्रा

सूत उवाच ।।

गोकर्णेद्यापि राजेन्द्र त्रयस्त्रिंशन्महान्ति च ।। लिङ्गानि नरशार्दूल वसन्त्यज्ञैरलक्षिताः ।।१।।

स्नात्वा तीर्थेषु तेष्वेव पूज्य लिङ्गं विधानतः ।। वसन्ति तेषु तेष्वेव आश्रमेषु महर्षयः ।।२।।

कोटीनां तत्र राजेन्द्र त्रयस्त्रिंशत् प्रधानतः ।। लिङ्गानि राजशार्दूल गोकर्णे सन्ति नित्यशः ।।३।।

त्रयस्त्रिंशत् प्रधानानि तेषां मध्ये नृपोत्तम ।। आश्रमाणि त्रयस्त्रिंशत् तस्मिन् पुण्यानि सत्तम ।।४।।

एकैकरात्रमेकस्मिन्नुषित्वा तत्र पूजयेत् ।। सर्वपापविनिर्मुक्तो रुद्रलोकमवाप्नुयात् ।।५।।

सप्तसप्ततिकोट्यस्तु गोकर्णे तीर्थमुच्यते ।। तीर्थानां समितिः पूर्वं कृता रुद्रेण धीमता ।।६।।

ब्रह्महत्याभिभूतेन कपालव्रतधारिणा ।। तत्र स्नानं पुरा कृत्वा मुक्तो वै ब्रह्महत्यया ।।७।।

हरोप्येवमभूद्राजन् किं तस्मादधिकं भवेत् ।। कोटीनां च त्रयस्त्रिंशल्लिङ्गानां नृपसत्तम ।।८।।

शतशृङ्गाभितो राजन्नधस्तादपि च प्रभो ।। सर्वं लिङ्गमयं क्षेत्रं बिससन्तानवत् ततम् ।।९।।

क्षिप्रं सिद्धिकरं नृणां तस्माच्छ्रेष्ठं तदेव हि ।। तीर्थस्नानपरो राजन्नियतो नियताशनः ।।१०।।

स्नात्वा पीत्वा च तत्तोयं पूजयित्वा महाबलम् ।।

---

### त्रयस्त्रिंशत्प्रधानलिङ्गानि

ब्रह्मेश्वरं च * कामेशं * संवर्तं च * कळंकळम् * ।।११।।

सनत्कुमारं * कौमारं * कौबेर्यं * सूर्यनायकम् * ।। मार्कण्डेयं * धर्मशिखं * शास्त्रं * वेदेश्वरं * नृप ।।१२।।

रसलिङ्गं * नागलिङ्गं * सावित्रं * वारुणं * तथा ।। कौशिकं * कामदहनं * नादेश्वर * मधोवने: ।।१३।।

भारद्वाजं * तथा भौमं * सौमित्रं * च गणेश्वरम् * ।। अगस्त्यं * नारदीयं * च सौपर्णं * च विहायसम् ?? ।। १४।।

माहेन्द्रं * मधुपर्कं ?? च नारायणं * अतः परम् ।। स्थानेश्वरं ?? पञ्चभूतं ?? महाबल * मिति प्रभो ।। १५।।

त्रयस्त्रिंशन्महालिङ्गाः कोटीनां नायका हि वै ॥ क्षिप्रं सिद्धिकरानाहुः सर्वांश्च नृपसत्तम ॥१६॥

एतेषु सिद्धिं सम्प्राप्ताः ससुरासुरमानवाः ॥ गन्धर्वाप्सरसश्चैव सर्वे च नृपसत्तम ॥१७॥

## त्रयस्त्रिंशत्प्रधानाश्रमाणि

सूत उवाच ॥

मार्कण्डेयाश्रमं *पुण्यं कुमाराश्रम मेव *च ॥ संवर्तकाश्रमं *पुण्यं वैनायक मतः *परम् ॥१८॥

सनत्कुमारं *भद्रन्ते सौमित्रं *ब्राह्मणं *तथा ॥ मैत्रावरुणं *आग्नेयं *याम्यं??आगस्त्य मेव *च ॥१९॥

अशोकस्याश्रमं *पुण्यं विश्वामित्रस्य *च प्रभो ॥ नागानामाश्रम *पुण्यं सप्तर्षीणां *च सत्तम ॥२०॥

आङ्गीरसं *चौशनसं *आत्रेयं *भार्गवं *तथा ॥ बिन्दु *सूर्याश्रमं *चैव अनन्तस्याश्रमं *प्रभो ॥२१॥

सावित्र *मथ सौम्यं *च पुण्यं सारस्वतं *नृप ॥ काळ्याश्रमं *च राजेन्द्र ऐन्द्रं *कौबेर *मेव च ॥
२२॥

धर्मस्य *चाश्रमं पुण्यं रौद्रं *पितृवनं *तथा ॥ विश्वेदेवाश्रमं *पुण्यं वैष्णवं *च नृपोत्तम ॥२३॥

एतेष्वाश्रममुख्येषु सर्वेषु मनुजर्षभ ॥ सिद्धाः सिद्धिं गतास्ते हि गमिष्यन्तीतरेऽपि च ॥२४॥

तत्रैव सिद्धिर्नान्यत्र भविष्यति नरर्षभ ॥

---

गोकर्णं शतशृङ्गं च ताम्रगौरीति निम्नगा ॥२५॥

तीर्थराजः समुद्रश्च पुण्यमेतद्धि पञ्चकम् ॥

## गोकर्णयात्रायां नित्ययात्राक्रमः

शतानीक उवाच ॥

सूत नो नित्ययात्रायाः क्रमं ब्रूहि महामते ॥२६॥

सर्वपापक्षयकरी नित्ययात्रा नृणां यतः ॥ कानि तीर्थानि सेव्यानि कान् देवान् तत्र पूजयेत् ॥२७॥

एतत् सर्वं विस्तरेण वद कारुण्यतो मुने ॥

सूत उवाच ॥

आदौ स्नात्वा कोटितीर्थे *समुद्रे स्नानमाचरेत् ॥२८॥

विघ्नेश्वरं *समभ्यर्च्य सम्पूज्य च महाबलम् *॥ स्नात्वा चै वादिगोकर्णे *तं देवं *परिपूजयेत् ॥२९॥

शास्त्रेश्वरं *समभ्यर्च्य गुहतीर्थे *निमज्य च ॥ गुहेश्वरं *समभ्यर्च्य ताम्रगौरीं *ततो व्रजेत् ॥३०॥

तत्र स्नात्वा विधानेन तां देवीं *परिपूजयेत् ॥ गौतमेशं *समभ्यर्च्य ब्रह्माणं *चेतसो यजेत् ॥३१॥

इन्द्रेश्वरं *समभ्यर्च्य कुबेरेशं *अथार्चयेत् ॥ मार्कण्डेयह्रदे *स्नात्वा मार्कण्डेयेश्वरं *नमेत् ॥३२॥
सूर्यतीर्थे *ततः स्नात्वा सूर्येशं *परिपूज्य च ॥ स्नात्वा पापविनाशिन्यां *धर्मेशं *परिपूजयेत् ॥३३॥

संवर्ततीर्थे *सुस्नात्वा संवर्तेशं *प्रपूजयेत् ॥ दत्तात्रेयस्य तीर्थे *तु स्नात्वा शम्भुं समर्चयेत् ॥३४॥
महाकाळीं *ततो नत्वा व्यङ्कटेशं *समर्चयेत् ॥ विश्वकर्मेश्वरं *नत्वाऽ येलापुत्रं *नमेत् ततः ॥३५॥
व्यासतीर्थे *ततः स्नात्वा शुकतीर्थे *समन्ततः ॥ उन्मज्जिन्यां *ततः स्नात्वा कपर्दिनं ??अथो नमेत् ॥३६॥
कामेश्वरं *ततो नत्वा देवौ हरिहरौ *यजेत् ॥ मण्टपत्रितयं *नत्वा सम्पूज्य च विनायकम् *॥३७॥
अगस्त्यतीर्थे *स्नात्वा तु वरदेशं *समर्चयेत् ॥ कृष्णदेवं *समभ्यर्च्य नरसिंहं *प्रपूजयेत् ॥३८॥
हनूमदीश्वरं *प्रोक्तं क्षेत्रपालं *ततो यजेत् ॥ दुर्गाकुण्डे *ततः स्नात्वा नन्दिनीं *तां समर्चयेत् ॥३९॥
नागतीर्थे *ततः स्नात्वा नागेशं *परिपूजयेत् ॥ रावणेशादिकान् *नत्वा वेदेशान् *परिपूज्य च ॥ ४०॥
गायत्रीतीथ *स्नात्वैव सावित्र्याश्च *ततः परम् ॥ सरस्वत्यां *ततः स्नात्वा तल्लिङ्गं *परिपूजयेत् ॥ ४१॥
ब्रह्मतीर्थे *ततः स्नात्वा ब्रह्मेशं *परिपूजयेत् ॥ विश्वामित्र्यां *ततः स्नात्वा तल्लिङ्गं *परिपूज्य च ॥ ४२॥
मणिभद्रं *ततो नत्वा ब्रह्मणो *दर्शनं चरेत् ॥ पितृस्थाल्यां *निमज्याथ पितृस्थालीश्वरं *यजेत् ॥ ४३॥
विधूतपापस्थाल्यां *तु स्नात्वा ऽमृतेश मर्चयेत् *॥ महाबलार्चनं *कुर्यान्नित्ययात्रेयमीर्यते ॥४४॥
अन्तर्गृहस्य यात्रेयं सर्वपापविनाशिनी ॥ पृथिव्यां यानि तीर्थानि सागरं प्रविशन्ति हि ॥४५॥
गङ्गादिसरितो यस्माद्गोकर्णे तद्विशिष्यते ॥ गोकर्णं सा महाकाशी विश्वनाथो महाबलः ॥ ४६॥
कोटितीर्थं तत्र गङ्गा समुद्रोऽत्र विशिष्यते ॥ गुञ्जामात्राधिकं काश्या गोकर्णमभिधीयते ॥४७॥
अत्र दत्तं हुतं जप्तं तदनन्ताय कल्पते ॥ रहितं कलिकालाभ्यां गोकर्णक्षेत्रमीर्यते ॥४८॥

सूत उवाच ॥

नित्ययात्राक्रमो राजन् कथितस्ते समासतः ॥ इतः परं महाराजन् किमन्यच्छ्रोतुमिच्छसि ॥४९॥
इतीश्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे मुख्याश्रमादिवर्णनंनाम चतुर्दशोत्तर शततमोऽध्यायः

॥११४॥

 अध्यायाः अकारादि <<BACK  ॥ अध्यायः ११५ ॥  NEXT>>  श्लोक संख्या–६०

॥ गोकर्णयात्रायां दक्षिणयात्राक्रमः ॥

## गोकर्णयात्रायां दक्षिणयात्राक्रमः

शतानीक उवाच ॥

अन्येषां सर्वतीर्थानां लिङ्गानां सूतनन्दन ॥ यात्राक्रमं विधानेन श्रोतुमिच्छा प्रवर्तते ॥१॥

तन्मे कथय मे सूत श्रद्धधानाय विस्तरात् ॥

सूत उवाच ॥

शृणु तीर्थानि सर्वाणि गोकर्णे यानि कौरव ॥२॥

तेषां स्नानक्रमं चैव निबोध कुरुनन्दन ॥ गोकर्णं *सर्वतीर्थानां मध्ये सम्परिवर्तते ॥३॥

यस्याभितः समस्तानि तीर्थान्यायतनानि च ॥ रुद्रोद्भवत्वाद्राजेन्द्र श्रेष्ठं तत्तीर्थमुच्यते ॥४॥

स आदिः सर्वतीर्थानां देवानां तु महाबलः *॥ तस्मादारभ्य तीर्थानि शृणु कौरवनन्दन ॥५॥

त्रिः प्रदक्षिणमावृत्य तीर्थं *तल्लिङ्ग मेव च *॥ ततः स्नानं प्रकुर्वीत प्राङ्मुखः प्रयतः पुमान् ॥६॥

दक्षिणाभिमुखो भूयः स्नानं तत्र समाचरेत् ॥ पूर्वाशाभिमुखो भूत्वा नमस्कृत्वा महेश्वरम् ॥७॥

यथाविधि कुरुश्रेष्ठ तर्पयित्वा पितामहान् ॥ तल्लिङ्गं *पूजयित्वा तु प्रदक्षिणमथाचरेत् ॥८॥

दानञ्चैव यथाशक्ति दातव्यं ब्राह्मणाय च ॥ ततः शास्त्रेश्वर *पूज्य गुहेश्वर मथोव्रजेत् ॥९॥

स्नानं कृत्वा तु तत्तीर्थे *ततस् तल्लिङ्गं *अर्चयेत् ॥ दानं दत्वा यथाशक्ति मन्त्ररत्नं समुच्चरेत् ॥१०॥

ततस्तु ताम्रगौर्यान्तु *स्नात्वा तां *अर्चयेद्बुधः ॥ ततो गणपतिं *पूज्य ऋग्वेदेशं *प्रपूजयेत् ॥११॥

यजुर्वेदेश्वरं *सामाथर्ववेदेश्वरं *यजेत् ॥ गायत्र्यां *स्नानमाधाय सावित्र्यां *स्नानमाचरेत् ॥१२॥

स्नात्वा तीर्थे सरस्वत्याः *तल्लिङ्गं *पूजयेत् पुमान् ॥ ततो गच्छेत राजेन्द्र ब्रह्मकुण्डं *अनुत्तमम् ॥
१३॥

तत्र स्नात्वा यज `देवं *शतशृङ्गनिवासिनम्॥ वैश्वामित्रे *ततः स्नात्वा तल्लिङ्गं *परिपूज्य च ॥१४॥

माणभद्रं *समभ्यर्च्य पितृस्थालीं *ततो व्रजेत् ॥ सङ्गमे ताम्रगौर्यास्तु समुद्रस्य च सत्तम ॥१५॥

स्नानं कुर्वीत विधिवत् प्राणायामपरायणः ॥ देवानृषीन् पितॄंश्चैव सन्तर्प्य च यथाविधि ॥१६॥
अमृतेशं *चार्चयित्वा पापस्थालीश्वरं *यजेत् ॥ तत्र रुद्रस्य गायत्रीं यथाशक्त्यानुवर्तयेत् ॥१७॥
शक्त्या च दक्षिणां दत्वा सागरेशं *ततो यजेत् ॥ गौतमेशं *समभ्यर्च्य पूजयेच चतुराननम् *॥ १८॥
इन्द्रेश्वरं *समभ्यर्च्य शक्त्या देया च दक्षिणा ॥ कुबेरतीर्थे *स्नात्वा तु ततस् तल्लिङ्गं *अर्चयेत् ॥१९॥

रावणेश्वरं *अभ्यर्च्य कुम्भकर्णेश्वरं *तथा ॥ विभीषणेश्वरं *चैव यथाविभवविस्तरम् ॥२०॥
संवर्तवाप्यां *स्नात्वा तु तल्लिङ्गं *पूजयेदपि ॥ ततः पापविनाशिन्यां *स्नात्वा चैव यथाविधि ॥
२१॥
पुण्येश्वरं *पूजयित्वा ब्राह्मणान् पूजयेदपि ॥ ततो गणेश्वरं *पूज्य साष्टाङ्गं प्रणिपत्य च ॥२२॥
सूर्यतीर्थे *ततः स्नात्वा सूर्येशं *परिपूज्य च ॥ मार्कण्डेयह्रदे *स्नात्वा तल्लिङ्गं *परिपूजयेत् ॥२३॥
पूजयित्वा ततो राजन् दुर्गां देवीं यथाविधि ॥ नन्दिनी *नाम सा देवी यमलोकस्य दक्षिणम् ॥२४॥

द्वारं रक्षति वै नित्यं क्षिप्रं सिद्धिकरी नृणाम् ॥ तामनुज्ञाप्य गच्छेत दुर्गाकुण्डं *अनुत्तमम् ॥२५॥
तस्यास्तु दक्षिणे भागे तीर्थं कामप्रदं नृणाम् ॥ तत्र स्नात्वा कुरुश्रेष्ठ तां दुर्गां *परिपूजयेत् ॥२६॥
ततो गत्वा नागतीर्थं *स्नात्वा तल्लिंगं *अर्चयेत् ॥ दत्तात्रेयस्य तीर्थे *तु स्नात्वा भक्तिसमन्वितः ॥
२७॥
व्यङ्कटेशं *समभ्यर्च्य भूतनाथं *समर्चयेत् ॥ विश्वकर्मेश्वरं *नत्वा एलापुत्रं *ततो यजेत् ॥२८॥
कपर्दनागं सम्पूज्य पूर्वदिक्परिपालकम् ॥ तत उन्मज्जने तीर्थे *स्नानं कृत्वा तु भक्तितः ॥२९॥
वैतरिण्यां *ततः स्नात्वा तां देवीं *परिपूजयेत् ॥ स्नात्वा व्यासस्य तीर्थे *तु स्थण्डिले देवमर्चयेत् ॥
३०॥
शुककुण्डे * निमज्याथ शक्त्या देया च दक्षिणा ॥ स्नात्वा तीर्थे हिडिम्बायाः *स्थण्डिले शङ्करं यजे
त् ॥३१॥
नारायणाश्रमं प्राप्य देवौ हरिहरौ *यजेत् ॥ मण्डपत्रितयं *राजन् पूजयित्वा यथाक्रमम् ॥३२॥
शक्त्या च दक्षिणां दत्वा मन्त्रमष्टाक्षरं जपेत् ॥ अशोकपञ्चके *स्नात्वा अशोकेशं *समर्चयेत् ॥३३॥

वाल्मीकेराश्रमं *गत्वा स्नात्वा पूज्य जगन्मयम् ॥ ततो ऽघनाशिनीं *प्राप्य स्नात्वा तत्र यथाविधि ॥

३४॥

स्थण्डिले देवमभ्यर्च्य दशदानादिकं चरेत् ॥ कामेश्वरं *ततो गत्वा स्नात्वा पूज्य तमीश्वरम् *॥३५॥

सम्पूज्य मोदकाद्यैस्तु चिन्तामणिविनायकम् *॥ गङ्गाधारं *समासाद्य तीर्थसेवी यथाक्रमम् ॥३६॥
स्नात्वा तत्र यथान्यायं गङ्गाधारे समाहितः ॥ सुमित्रमित्रं देवेशं *पूजयेत्तत्र शङ्करम् ॥३७॥
भीमकुण्डं *समासाद्य स्नानं कुर्वीत वाग्यतः ॥ मृण्मयं लिङ्गमादाय पूजयेत्तत्र शङ्करम् ॥३८॥
ततः क्रमेण गच्छेत वासिष्ठं तीर्थमुत्तमम् ॥ वसिष्ठकुण्डे *सुस्नात्वा वसिष्ठेशं *समर्च्य च ॥३९॥
अगस्त्यतीर्थे *स्नात्वा तु वरदेशं *समर्चयेत् ॥ मित्रावरुणयोस तत्र *देवं सम्पूजयेत्ततः ॥४०॥
ततो गच्छेत राजेन्द्र गारुडं तीर्थं *उत्तमम् ॥ सङ्गतं कोटितीर्थेन तीरे वै पूर्वदक्षिणे ॥४१॥
स्नात्वा तं *पूजयित्वैव गायत्रीं गारुडीं जपेत् ॥ ततः कृष्णं *समभ्यर्च्य नरसिंहं *ततो यजेत् ॥
४२॥
कोटितीर्थे *ततः स्नात्वा घण्टाकर्णं *समन्वितम् ॥ क्षेत्रपालं *ततो भक्त्या वटकाद्यैः समर्चयेत् ॥
४३॥
हनूमदीश्वरं *पूज्य शक्त्या दत्वा च दक्षिणाम् ॥ स्नात्वा दूर्वासतीर्थे *तु स्थण्डिले शङ्करं यजेत् ॥
४४॥
ततो गोगर्भ *मासाद्य पूजयित्वा यथाक्रमम् ॥ प्रविश्य पश्चिमद्वारे पूर्वद्वारे विनिर्गमेत् ॥४५॥
जपन् मन्त्रवरं तत्र पूजयेच्च पुनर्नृप ॥ ब्रह्मकुण्डीं *पूजयित्वा ह्यात्मानं प्रोक्षयेज्जलम् ॥४६॥
नवग्रहाश्रमे *स्नात्वा भृगुतीर्थे *निमज्य च ॥ जमदग्निमुनेस्तीर्थे *स्नात्वा देवं समर्चयेत् ॥४७॥
पुलस्त्य तीर्थे *स्नात्वा तु अत्रेस्तीर्थे *तथैव च ॥ तथाच ङ्गिरसस्तीर्थे *भारद्वाजे *ततः परम् ॥४८॥
तथा *क्रतोर्नारदस्य *तीर्थे स्नायाद्यथाविधि ॥ *विश्वावसोस्तुम्बरोश्च *चित्रसेनस्य *पार्थिव ॥४९॥
तथैव प्सरसां तीर्थे *स्नात्वा भक्तिसमन्वितः ॥ उमाह्रदे *तु संस्नात्वा यथाविभवविस्तरम् ॥५०॥
उमामहेश्वरं *पूज्य शक्त्या देया च दक्षिणा ॥ कुण्डिकां *च ततः पूज्य मन्त्रं पञ्चाक्षरं जपेत् ॥
५१॥
छायापादप *माश्रित्य पूजयेत्तत्र शङ्करम् ॥ ततस्तु मालिनीं *गत्वा स्नात्वा तत्र समाहितः ॥
तृणबिन्दोराश्रम *तु गत्वा स्नात्वा यथाविधि ॥ काश्यपस्याश्रमं *गत्वा तत्र स्नात्वा यथाविधि ॥
५२॥

ततः कपोततीर्थे *तु सुरसातीर्थे *एव च ॥ ततः केसरितीर्थे *च वैश्वदेवे *ततः परम् ॥५३॥
वसोर्धारं *ततो गत्वा स्नात्वा तत्र समाहितः ॥ शिंशुमारं *ततो गत्वा स्नात्वा तत्र यथाक्रमम् ॥५४॥

शिलालिङ्गं पूजयित्वा शक्त्या देया च दक्षिणा ॥ एकबिन्द्वादितीर्थे *तु क्रमात् स्नायाद्यथाविधि ॥
५५॥
स्नात्वा भीमगदातीर्थे *और्वतीर्थे *ततो व्रजेत् ॥ सोमतीर्थे *नरः स्नात्वा सूर्यतीर्थे *ततो व्रजेत् ॥
५६॥
तत्र स्नात्वा सुसम्पूज्य सोमतीर्थे *निमज्य वै ॥ स्नात्वा तु वारुणे तीर्थे?? तीर्थे पाण्डवसंश्रिते *॥
५७॥
रामतीर्थे *ततो गत्वा स्नात्वा चैव यथाक्रमम् ॥ हनूमल्लक्ष्मणयुतं सीतारामं *ततो यजेत् ॥ ५८॥
मन्त्रमष्टाक्षरं जप्त्वा शक्त्या देया च दक्षिणा ॥ ततः समुद्रे स्नात्वा तु पूजयेच्च महाबलम् *॥
५९॥
दक्षयात्रा क्रमो राजन् प्रोक्तः संक्षेपतो मया ॥ ६० ॥
इतिश्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे यात्राक्रमोनाम पञ्चदशोत्तरशततमोऽध्यायः ॥
११५॥

अध्यायाः अकारादि <<BACK ॥ अध्यायः ११६ ॥ NEXT>> श्लोक संख्या–४५

॥ गोकर्णयात्रायां उत्तरयात्राक्रमः ॥

## गोकर्णयात्रायां उत्तरयात्राक्रमः

सूत उवाच ॥
आदौ स्नात्वा कोटितीर्थे *पूजयित्वा महाबलम् *॥ ॥ ततो विनायकं *गत्वा केतकीवनवासिनम् ॥
१॥
तीर्थे वैनायके *स्नात्वा गणानान्त्वेति मन्त्रतः ॥ रक्तगन्धै रक्तपुष्पैर्गणनाथं ततो यजेत् ॥२॥
स्नात्वा तु शुद्धमनसा तीर्थे केतकिसंज्ञिते *॥ गिरिं ताम्रतळं *प्राप्य आलोकेत् पश्चिमामुखः ॥३॥

स्थित्वा तस्य तळे राजन् प्रणम्य च महेश्वरम् ॥ अष्टाक्षरं जपन् मन्त्रं सऋषिछन्ददैवतम् ॥४॥
उच्चैः शब्दं प्रकुर्वीत हरिरित्यथवा हरः ॥ तच्छ्रुत्वाऽऽकाशगा देवी ह्यभिषिक्ष्यत्यसंशयः ॥५॥
तदधस्तात्तु राजेन्द्र ताम्रगौर्याः समुद्भवः ॥ तत्र *स्नानं विधायैव वह्निकुण्डे *निमज्जयेत् ॥६॥
कळंकळेश्वरं *पूज्य रुद्रपादं *समर्चयेत् ॥ अरण्यतीर्थे *स्नात्वा तु स्नायात् कपिलसंज्ञिते *॥७॥
चक्रतीर्थे *निमज्जैव चक्रखण्डेश्वरं *यजेत् ॥ हर्यश्वतीर्थे *स्नात्वा वै श्रद्धयाऽनन्यमानसः ॥८॥
अधर्मतीर्थे *स्नात्वा तु शक्त्या दद्याच्च दक्षिणाम् ॥ स्नात्वा तीर्थे ह्यसूयायाः *स्नायान् मात्सर्यतीर्थके
* ॥९॥
चण्ड्यास्तीर्थे *ततः स्नात्वा स्नायात् क्रोधस्य तीर्थके *॥ द्वेषतीर्थे *ततः स्नात्वा ह्यक्षमातीर्थ *
आप्लुयात् ॥१०॥
ईर्ष्यास्तीर्थे *तथाप्लुत्य अलक्ष्मीतीर्थ *मज्जनम् ॥ घोरतीर्थे *निमज्याथ मोहनातीर्थ *मज्जनम् ॥११॥

एते अधर्मप्रभवाः सर्वे सिद्धिमुपागताः ॥ तेषु स्नात्वा विधानेन शङ्करं तत्र पूजयेत् ॥१२॥
क्षमादिधर्मपुत्राणां तीर्थेषु *स्नानमाचरेत् ॥ शालूकिनीं *समासाद्य तत्र स्नानं समाचरेत् ॥१३॥
देवान्नृषीन् पितृंश्चैव सन्तर्प्य विधिपूर्वकम् ॥ गङ्गादेवीं *समभ्यर्च्य दशदानादिकं चरेत् ॥१४॥
मेरोराश्रम मासाद्य *तत्तीर्थ स्नानमाचरेत् ॥ शङ्करं तत्र सम्पूज्य श्रद्धयाऽनन्यमानसः ॥१५॥
युगाश्रमं *समासाद्य स्नात्वा तीर्थेषु सर्वशः ॥ देवं तत्र समभ्यर्च्य विधिदृष्टेन कर्मणा ॥१६॥
दिगाश्रमं *ततो गत्वा स्नात्वा तीर्थेषु तत्र वै ॥ शङ्करं विष्णुसहितं पूजां कुर्वीत भक्तितः ॥१७॥
स्नात्वा तीर्थे गालवस्य *कहोळस्याश्रमं *व्रजेत् ॥ तत्र स्नात्वा भक्तियुतो कनकस्याश्रमं *व्रजेत् ॥
१८॥
तत्रापि स्नानमाधाय विष्णुं मनसि भावयन् ॥ कर्षस्य तीर्थे *स्नात्वा तु स्नात्वा रोमशतीर्थके *॥
१९॥
नहुषस्याश्रमं *प्राप्य स्नात्वा तीर्थे मनोहरे ॥ अम्बरीषस्य तीर्थे *तु स्नात्वा विष्णुं समर्चयेत् ॥२०॥

नळस्याश्रम मासाद्य *तत्र स्नायान्महामनाः ॥ तीर्थे निमिकृते *स्नात्वा नाभागस्य *तथा नृप ॥२१॥
इक्ष्वाकोराश्रमं *प्राप्य विष्णुध्यानपरायणः ॥ स्नानं कृत्वा विधानेन शक्त्या दानादि कारयेत् ॥२२॥
ययातितीर्थे *स्नात्वा तु बाणतीर्थे *ऽवगाहयेत् ॥ सिद्धाश्रमं *समासाद्य तत्र स्नात्वा विधानतः ॥

२३॥

सिद्धेश्वरं *समभ्यर्च्य दत्वा वित्तानुसारतः ॥ पञ्चाक्षरं जपेन्मन्त्रं शिवध्यानपरायणः ॥२४॥

व्याधाश्रमं *समासाद्य स्नात्वाऽभ्यर्च्य विधानतः ॥ महाकाळ्याश्रमं *गत्वा तत्तीर्थं *परिपूज्य च ॥

२५॥

महाकाळीं *ततो गत्वा तां नत्वाऽभ्यर्चयेत् सुधीः ॥ नादाश्रमं *समासाद्य तत्तीर्थे *स्नानमाचरेत् ॥

२६॥

नादेश्वरं *समभ्यर्च्य अधोभूमेरवस्थितम् ॥ ततः समुद्रे स्नात्वा तु दशदानादिकं चरेत् ॥२७॥

महाबलं *पूजयित्वा रुद्रमन्त्रादिना नृप ॥ स्नात्वा सर्वेषु तीर्थेषु यथाविभवमादरात् ॥२८॥

संवत्सरं वसेत्तत्र नियतो नियताशनः ॥ मौनव्रतपरो नित्यं ब्रह्मचारी जितेन्द्रियः ॥२९॥

अनेनैव शरीरेण मुक्तोऽसौ नात्र संशयः ॥ तत्र सिद्धिमवाप्नोति मासमुष्य यथाविधि ॥३०॥

सर्वबन्धविनिर्मुक्तः सर्वज्ञानसमन्वितः ॥ दिव्यचक्षुर्दिव्यदेहो रुद्रलोकं स गच्छति ॥३१॥

स एव विष्णुर्ब्रह्मा च स रुद्रो नात्र संशयः ॥ प्रायोपवेशनं कृत्वा यो म्रियेत्तत्र कौरव ॥३२॥

स रुद्रलोकमासाद्य रुद्रैकत्वमवाप्नुयात् ॥ कर्मक्षये हि भवति बुद्धिस्तत्क्षेत्रसेवने ॥३३॥

पापिष्ठास्तत्र जानन्ति गत्वा नार्चन्ति शङ्करम् ॥ तत्रस्थो यो महादेवमर्चयेद्वृषभध्वजम् ॥३४॥

सोऽपि देवत्वमाप्नोति पापिष्ठोपि न संशयः ॥ विष्णुं वा त्रिदशश्रेष्ठं सुरासुरनमस्कृतम् ॥३५॥

व्रतोपवासैर्विविधैः सोपि मुक्तो भविष्यति ॥ स्नापयित्वा शिवं तत्र विष्णुं वा विधिपूर्वकम् ॥३६॥

पञ्चगव्यादिना राजन् गन्धमाल्यादिना तथा ॥ अभ्यर्च्य देवदेवेशं शिवं विष्णुमथापि वा ॥३७॥

रुद्रं रुद्रव्रतैश्चैव विष्णुं विष्णुव्रतादिभिः ॥ अभ्यर्च्य मुक्तिमाप्नोति गोकर्णे सकृदप्युत ॥३८॥

तस्मात् पुण्यतमं नास्ति त्रिषु लोकेषु कौरव ॥ रहस्यमेतद्देवानामृषीणां भावितात्मनाम् ॥३९॥

नाकपृष्ठोऽपि न समो गोकर्णस्य न संशयः ॥ देवानां सिद्धिदो राजन्नृषीणामपि सत्तम ॥४०॥

तत्क्षेत्राच्च बही राजन् सदा तिष्ठन्ति पापिनः ॥ ते हि धर्मविघातार्थं नररूपेण राक्षसाः ॥४१॥

नास्तिका भिन्नमर्यादा निर्भया निरुपद्रवाः ॥ युगं पश्चिममासाद्य नात्र दृश्यन्ति देवताः ॥४२॥

ऋषयश्च महाभागा अदृश्या पापकर्मभिः ॥ बिले विशाले केचित्तु वियतिस्थाश्च केचन ॥४३॥

सर्वभूतैरदृश्यास्ते केचित्तत्रैव संस्थिताः ॥ तस्मिन्नेव वसन्ति स्म सिद्धिकामाः सुरासुराः ॥४४॥

सूत उवाच ॥

इति बहुविधतीर्थेष्वाप्लुतानां नराणामिह कृतदुरितानां सञ्चयो नाशमेति ॥

दिवि सुरमुनिवृन्दैरर्चिता ह्यप्सरोभिः सकलसुखरसाब्धिं प्राप्य मोदन्त्यजस्रम् ॥४५॥

इतिश्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे उत्तरयात्राक्रमोनाम षोडशोत्तरशततमोऽध्यायः ॥
११६ ॥

 अध्यायाः अकारादि <<BACK  ॥ अध्यायः ११७ ॥  NEXT>>  श्लोक संख्या–३८

## ॥ इतिहासकथनम् ॥

### क्षेत्रमाहात्म्यश्रवणफलम्

सूत उवाच ॥

एवं वः कथितं पुरातनमिदं गोकर्णखण्डं मया पुण्यं पापहरं पवित्रममलं ज्ञानप्रदं पुत्रदम् ॥
सर्वापच्छमनं सदाशिवमयं सर्वार्थसिद्धिप्रदं ये शृण्वन्ति पठन्ति वै मुनिगणास्ते यान्ति सौख्यं पदम्
॥१॥ श्रुत्वा पुरा शौनकनारदेरितं कृशानुपुत्रो भगवान् महामुनिः ॥
संवर्तको नाम ययौ सुपुण्यं ब्राह्मं पदं सर्वसुखास्पदं सदा ॥२॥
तथैव देवासुरसिद्धसङ्घ गन्धर्वयक्षा ह्युरगाः पिशाचाः ॥
नरेन्द्रमुख्या मुनिवर्यमानवाः खगा मृगाः पशवः स्थावराश्च ॥३॥
सत्कामभोगान् भुवि देवलोके सम्प्राप्य चान्ते शिवदेवमापुः ॥४॥
क्षेत्रप्रभावं च तथेशपुत्रः शम्भोः सकाशात् स्वहितं समग्रम् ॥
श्रुत्वा पुनः प्रीतमनाः समेत्य क्षेत्रं सुगोकर्णमनन्तपुण्यम् ॥५॥
तत्रैव तप्त्वा सुचिरं स भक्त्या सिद्धिं परां प्राप्य सुरैरलभ्याम् ॥
तथैव नद्यः सरितः समुद्राः स्वाभीष्टसिद्धिं परमामवापुः ॥६॥
सुपुत्रलाभं च सुपुत्रकामस्तथा धनार्थी धनलाभमुच्चैः ॥
सुक्षेत्रकामी च समृद्धभूमिं निर्वाणकामो लभते च मोक्षम् ॥७॥
श्रुत्वाख्यानमिदं पुण्यं गोकर्णक्षेत्रवैभवम् ॥ देवर्षेरग्निपुत्रस्य संवादं पुण्यवर्धनम् ॥८॥
तिर्यग्योनिगतौ चापि निर्वाणपदमापतुः ॥ नकुलीभषकश्चैव किं पुनर्मानवा बुधाः ॥९॥

### अळिजङ्घानङ्गतिलकदम्पत्योः कथा

शौनक उवाच ॥

नकुलीभषकश्चैव कथं दुर्योनिमापतुः ॥ कौ तौ पुरातनभवे कृतवन्तौ च किं पुरा ॥ १०॥
तत्सर्वं वद तत्वेन श्रोतुं कौतूहलं हि मे ॥

सूत उवाच ॥

शृणु शौनक वक्ष्यामि सहैभिर्मुनिपुङ्गवैः ॥११॥
वैवस्वतमनोः काले द्वापरे मुनिपुङ्गव ॥ मधुरायां द्विजवरो अत्रिगोत्रसमुद्भवः ॥१२॥
अळिजङ्घ इति ख्यातो ह्यास्ते वेदविवर्जितः ॥ तस्यासीज्जारिणी जाया सदा निष्ठुरभाषिणी ॥१३॥
नाम्ना चानङ्गतिलका पतिभक्तिविवर्जिता ॥ अळिजङ्घोऽपि दुर्मेधा नित्यं दुर्जनसङ्गतः ॥१४॥
पानासक्तो द्यूतकारी परस्त्रीगमने रतः ॥ वेदब्राह्मणविद्वेषी पितृभक्तिविवर्जितः ॥१५॥
पाषण्डव्रतमास्थाय स्वकर्मपरिवर्जितः ॥ असंख्यातानि पापानि कृतवान् स दिने देने ॥१६७॥
तथैव तस्य पत्नी च स्वधर्मपरिवर्जिता ॥ स्वजनैः कलहं नित्यं जारमार्गरता सदा ॥१७॥
चोरवृत्तिः कुमार्गस्था भर्तृभक्तिविवर्जिता ॥ सापि पापान्यनेकानि चकार च दिने दिने ॥१८॥
एवमब्धेषु गच्छत्सु केषुचित् द्विजदम्पती ॥ पूर्वकर्मवशादेव जग्मतुः क्षेत्रमुत्तमम् ॥१९॥
मुदा युक्तौ मुनिवर श्रीरङ्गं नाम पुण्यदम् ॥ तुलासंस्थे दिनकरे कार्तिके मासि पुण्यदे ॥२०॥
बहवस्तत्र चाजग्मुर्यात्रार्थं भृगुनन्दन ॥ यात्राव्याजेन तौ चापि तैः साकं द्विजसत्तम ॥२१॥
तत्र स्नात्वा चैव कार्यमुषःकाले समाहितौ ॥ तत्र स्थित्वा मासमेकं छद्मना धनकांक्षया ॥२२॥
रङ्गनाथं च सम्पूज्य श्रुत्वा हरिकथादिकान् ॥ मासान्ते देवताद्रव्यं मुषित्वा प्रययौ द्विजः ॥२३॥
पत्न्या सहैव शनकैर्मध्यमार्गं गते द्विजे ॥ चोरं मार्गयितुं जग्मू रङ्गक्षेत्राद् द्रुतं भटाः ॥२४॥
ददृशुर्मार्गमध्ये तं सदेवद्रव्यकं द्विजम् ॥ बध्वा राजान्तिकं दूता निन्युस्तं वै द्विजाधमम् ॥२५॥
राजानमूचुस्ते दूता चोरोऽयं ब्राह्मणाधमः ॥ दृष्ट्वा तौ दम्पती राजा तयोः शिक्षामकारयत् ॥२६॥
ततस्तेनैव दुःखेन पीडितौ द्विजदम्पती ॥ किञ्चित्कालान्तरे ब्रह्मन् तत्रैव मरणं गतौ ॥२७॥
ततो यमभटैर्बध्वा निन्युर्वैवस्वतं पुरम् ॥ यमस्तयोर्विचार्याथ कृतं कर्म शुभाशुभम् ॥२८॥
दूतानाज्ञापयामास पात्येतां नरके त्विमौ ॥ ततो यमाज्ञया दूताः पेचुस्तौ नरकाग्निषु ॥२९॥
ततः कर्मावशेषेण भुवं सम्प्राप्य शौनक ॥ स्थावरादिषु सञ्जातावसंख्यातासु योनिषु ॥३०॥
कृमिकीटमृगव्याळपतङ्गादिषु वै क्रमात् ॥ पश्चादनङ्गतिलका बभूव नकुली द्विज ॥३१॥
अळिजङ्घश्च भषको सञ्जातः पुण्यलेशतः ॥ गोकर्णे भृगुशार्दूल व्याजेनोर्जव्रतादिकात् ॥३२॥
जातिस्मरत्वं सम्प्राप्य गोकर्णे सुचिरं स्थितौ ॥ ततः कर्मवशादेव संवर्तस्याश्रमे शुभे ॥३३॥

गोकर्णक्षेत्रमाहात्म्यं नारदेन प्रकीर्तितम् ॥ संवर्तकाय विप्रेन्द्र सर्वं ताभ्यां श्रुतं तदा ॥३४॥
तस्माद्वियोनिजाद्दुःखाद्विमुक्तौ तौ बभूवतुः ॥ देवलोकात्ततो दूताः पापशासनशासनात् ॥३५॥
दिव्यं विमानमादाय तयोर्निकटमाययुः ॥ ताभ्यां तदा द्विजश्रेष्ठ दत्वा दिव्यं कलेवरम् ॥३६॥
विमानवरमारोप्य गोकर्णादनयन् दिवम् ॥ ततस्तौ त्रिदिवं प्राप्तौ यथाकामं भृगूद्वह ॥३७॥
देवैः साकं देवपुरे भुञ्जन् भोगान्यनेकशः ॥ उवास सुचिरं कालं पत्न्या साकं द्विजोत्तमः ॥३८॥
इतिश्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे इतिहासकथनंनाम सप्तदशोत्तरशततमोऽध्यायः ॥११७॥

 अध्यायाः अकारादि <<BACK  ॥ अध्यायः ११८ ॥  NEXT>>  श्लोक संख्या–४७

॥ क्षेत्रमाहात्म्यश्रवणफलकथनम् ॥

अळिजङ्घानङ्गतिलकदम्पत्योः कथा

सूत उवाच ॥

ततः सुकृतशेषेण पुनर्भूर्लोकमागतौ ॥ अङ्गदेशाधिपः सोऽभूत् कनकाङ्गद नामवान् ॥ १॥
तत्पत्नी चापि सञ्जाता गोराष्ट्राधिपतेः सुता ॥ नाम्ना कलावती विप्र तमेव कनकाङ्गदम् ॥२॥
पतिमाप च चार्वङ्गी मुदा परमया युता ॥ कनकाङ्गदस्तु भूपालः प्राप्य पत्नीं कलावतीम् ॥३॥
राज्यं चकार सुचिरं प्रजाधर्मेण पालयन् ॥ पुत्रानुत्पादयामास कलावत्यां भृगूद्वह ॥४॥
त्रीन् देवसदृशान् राजा मुमोद सुतरां तदा ॥ तेषां नामानि कृतवान् यथाविधि यथाक्रमम् ॥५॥
ज्येष्ठं रत्नध्वज मिति द्वितीयं कनकध्वजम् ॥ तृतीयं देववर्मे ति नामधेयानि चाकरोत् ॥६॥
विवृद्धिमगमन् सर्वे ते बालाः पितृसन्निधौ ॥ काले काले यथाशास्त्रं चूडाकर्मादि चाकरोत् ॥७॥
कृत्वा विवाहं सर्वेषां दत्वा राज्यं पृथक् पृथक् ॥ अश्वमेधादिभिर्यागैर्दक्षिणासहितैर्बहु ॥८॥
कृत्वा व्रतानि सर्वाणि दत्वा दानानि भूरिशः ॥ भुक्त्वा भोगान् यथाकामं पुत्रपौत्रादिभिर्युतः ॥९॥
पत्न्या सह ततो राजा विरक्तः सर्ववस्तुषु ॥ ततो वैराग्यमापन्नो राज्यभोगेषु भूमिपः ॥१०॥
तीर्थयात्राप्रसङ्गेन प्रययौ भार्यया सह ॥ पुत्रमित्रादिकं सर्वं राज्यं चापि महीपतिः ॥११॥
त्यक्त्वा तीर्थेषु संस्नाप्य गङ्गादिषु यथामति ॥ ततो गोकर्णमासाद्य भार्यया सहितो द्विज ॥१२॥

तत्र स्थितेषु तीर्थेषु स्नात्वा राजा यथाक्रमम् ॥ महाबलं च सम्पूज्य तत्र स्थित्वाऽचरत्तपः ॥१३॥

सुचिरं भृगुशार्दूल अन्ते निर्वाणमाप्तवान् ॥१४॥

सूत उवाच ॥

सकृच्छ्रुत्वा चाळिजङ्घो द्विजेन्द्रः सन्माहात्म्यं गोश्रुतेः स्त्रीसमेतः ॥

दुर्योनित्वान्मुक्तिमासाद्य भूयो गत्वा पुण्यं देवलोकं यथेष्टम् ॥१५॥

भोगान् भुक्त्वा तत्र देवैरलभ्यान् क्षीणे पुण्ये मर्त्यलोकं जगाम ॥

राजा भूत्वा ह्यङ्गदेशे गुणाढ्यो पत्न्या सार्धं भूतळे भूरि भोगान् ॥१६॥

भुक्त्वा पुत्रे राज्यभारं च दत्वा कृत्वा यागानश्वमेधादिकांश्च ॥

दत्वा दानं ब्राह्मणेभ्यश्च सर्वं तथा व्रतं विविधं चैव कृत्वा ॥१८॥

पश्चात् पुण्यक्षेत्रयात्रां च कुर्वन् पत्न्या सार्धं गोश्रुतिक्षेत्रवर्यम् ॥

गत्वा तत्र क्षेत्रयात्रां च कृत्वा तपस्तप्त्वा ह्यचिरात् सिद्धिमाप ॥१९॥

---

## क्षेत्रमाहात्म्यश्रवणफलम्

य इदं क्षेत्रमाहात्म्यं शृणोति पठति द्विज ॥ एकवारं द्विवारं वा त्रिवारमथवा नरः ॥२०॥

तस्य पुण्यफलं वक्तुं नालं वर्षशतैरपि ॥ यं यं कामयते कामं तं तमाप्नोत्यसंशयः ॥२१॥

सर्वतीर्थेषु यत्पुण्यं सर्वयज्ञेषु यत्फलम् ॥ सर्वव्रतेषु यत्पुण्यं तत्सर्वं लभते ध्रुवम् ॥२२॥

ज्ञातिस्मरत्वं लभते ब्रह्मज्ञानं सनातनम् ॥ यस्मिन् गृहे पूजयन्ति गोकर्णमहिमां नृप ॥२३॥

लिखित्वा पुस्तकं नित्यं तद्गृहे भृगुनन्दन ॥ भूतवेताळकूष्माण्डपिशाचा ब्रह्मराक्षसाः ॥२४॥

शाकिनी डाकिनी ज्येष्ठा निद्रा बालग्रहादिकाः ॥ दुष्टग्रहाश्च नश्यन्ति यक्षराक्षसपन्नगाः ॥२५॥

ये च सन्ध्याग्रहाः सर्वे चण्डालग्रहसंज्ञिताः ॥ निशाचरग्रहाः सर्वे नश्यन्ति च विदूरतः ॥२६॥

कुक्षिरोगं च हृद्रोगं शूलापस्मार एव च ॥ एकाहिकद्व्याहिकादि चातुर्थिकमहाज्वराः ॥२७॥

आधयो व्याधयः सर्वे तथा रोगाधिदैवताः ॥ शीघ्रं नश्यन्ति ते सर्वे ईतिबाधा विनश्यति ॥२८॥

राजानो वश्यतां यान्ति शत्रवो यान्ति मित्रताम् ॥ विषाण्यमृततां यान्ति सर्ववश्यं भवेद्ध्रुवम् ॥२९॥

राज्यकामो लभेद्राज्यं धनकामो लभेद्धनम् ॥ विद्याकामो लभेद्विद्यां बद्धो मुच्येत बन्धनात् ॥३०॥

आयुः कामो लभेदायुः स्त्रीकामः स्त्रियमाप्नुयात् ॥ पुत्रकामो लभेत् पुत्रं कीर्तिमन्तं बहुश्रुतम् ॥
३१॥

व्याळव्याघ्रभयं नास्ति चोराग्निनृपसम्भवम् ॥ पशुवृद्धिर्भवेत्तत्र धनधान्यं गृहे सदा ॥३२॥

ब्रह्मघ्नश्च पशुघ्नश्च भ्रूणहा गुरुतल्पगः ॥ मुच्यते सर्वपापेभ्यः कृतघ्नश्चैव शौनक ॥३३॥

वेदनिन्दाकरो विप्रो मातापित्रोर्विनिन्दकः ॥ असत्यनिरतश्चैव पतितो यज्ञनिन्दकः ॥३४॥

नारी वा शृणुयाद्भक्त्या पूजयित्वा तु पुस्तकम् ॥ भर्तृप्रियत्वं लभते न वैधव्यं च विन्दति ॥३५॥

सौभाग्यलाभं लभते पुत्रलाभं च विन्दति ॥ भूमिप्रदक्षिणेनैव यत्फलं लभते द्विज ॥३६॥

तत्फलं कोटिगुणितं सकृत् श्रवणमात्रतः ॥ यः पठेच्छृणुयान्नित्यं विशुद्धेनान्तरात्मना ॥३७॥

देहावसानपर्यन्तं तस्य पुण्यफलं शृणु ॥ गङ्गादिसर्वतीर्थेषु कोटिजन्मसु शौनक ॥३८॥

स्नानेन यत्फलं प्रोक्तं तत्फलं लभते नरः ॥ कोटिलिङ्गस्थापनजं पुण्यं भवति च ध्रुवम् ॥३९॥

सोमसूर्योपरागेषु कुरुक्षेत्रे कुरूद्वह ॥ कोटिभारं सुवर्णस्य कन्यादानं तथैव च ॥४०॥

यद्दानं कपिलानां च श्रोत्रियायाहिताग्नये ॥ दानेन यत्फलं प्रोक्तं तत्फलं लभते नरः ॥४१॥

कोट्यश्वमेधं गङ्गायां कृते यत्फलमश्नुते ॥ तत्फलं लभते मर्त्यो नात्र कार्या विचारणा ॥४२॥

निर्जले मरुभूम्यां तु कोटिकूपकृतं फलम् ॥ दुर्भिक्षे च प्रतिदिनं ब्राह्मणानां सुभोजनम् ॥४३॥

श्रद्धया परया कुर्यात् सहस्रपरिवत्सरम् ॥ तत्फलं कोटिगुणितं भवत्येव न संशयः ॥४४॥

इदं रहस्यमत्यन्तं नाभक्ताय वदेत् क्वचित् ॥ सत्यं सत्यं पुनः सत्यमुद्धृत्य भुजमुच्यते ॥४५॥

भक्तेष्टदाननिरतं सततं च गोश्रुतौ तिष्ठन्तमेव ऋषिदेवमनुष्यवन्द्यम् ॥

येन धृतं च करयोश्चषकं च पद्मं वन्दे महागणपतिं द्विभुजं त्रिनेत्रम् ॥४६॥

कैलासेश्वरपूजितोपि धनदेनाराधितोप्यन्वहं लङ्कानाथनिनीषितोपि नगरीं पारे महासागरम् ॥

मत्यानुग्रहकाम्ययैव सततं गोकर्णक्षेत्रे स्थितो देवः कश्चन पश्चिमाब्धिपदिगालोकी सदा पातु नः ॥

४७॥

इति श्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे क्षेत्रमाहात्म्य श्रवणफलकथनंनाम अष्टादशोत्तरश

तमोऽध्यायः ॥११८॥

॥ श्री गोकर्णमहाबलेश्वराय नमः ॥

अधर्माश्रम– असूया– मात्सर्य– क्रोध– द्वेष– अक्षमा– ईर्ष्या– अलक्ष्मी– घोर– मोहतीर्थवर्णनं तथा

क्षमा, सत्य, दम, कीर्ति, अहिंसा, आनन्द, बुद्धि, मान,

लक्ष्मी,लज्जा,श्रुति,स्मृति,मेधानां तीर्थानि ॥

॥ तृणाग्नि–कश्यप–कपोत–सुरसा–केसरी–वसु–नवग्रहाणां–भृगु,जमदग्नि,क्रतु,पुलस्त्य,अत्रि, अंगिरस,भारद्वाज,नारदानां– विश्वावसु,तुंबुरु,चित्रसेन,गंधर्व,अप्सरस,सिद्ध,मरुत्,साध्य,यक्ष,राक्षस, किन्नर,गुह्यक,किंपुरुष,विद्याधराणां– वाल्मीकेः– अन्येषामपि ऋषीणां,देवतानां,राजर्षीणां,मुनीनां– अघनाशिनीतीरस्थानि च आश्रमपदानि तीर्थानि च ॥

अंगि–अध–इति–कपि–किम्पु–कोटि–गंगा–गोक–जम–दत्त–नहु–पन्च–बाण–मणि–मोह–रुद्
–
विधृ–विश्वा–शता–संपु–सोम–हनु

अनुक्रमणिका (हनु–हिडि) <<BACK NEXT>> श्लोकाः

| | |
|---|---|
| हनुमदीश्वरवर्णने– हनुमज्जन्म, विकटासुरवधश्च ॥ | ८५–१ |
| हनुमदीश्वरवर्णने–रामायणकथा–सुग्रीवराज्याभिषेकान्तम् ॥ | ८६–१ |
| हनुमदीश्वरवर्णने–रामायणकथा– सेतुबन्धनान्तम् ॥ | ८७–१ |
| हनुमदीश्वरवर्णने–रामायणकथा–रामाभिषेकान्तम् ॥ | ८८–१ |
| हरिहरोत्पत्ति(शंकरनारायण)वर्णने–खरासुर निग्रहः ॥ | ४०–१ |
| हरिहरोत्पत्तिः(शंकरनारायण), | ४१–१६ |
| हिडिम्बाश्रम वर्णनम् , | ९८–१ |

अंगि–अध–इति–कपि–किम्पु–कोटि–गंगा–गोक–जम–दत्त–नहु–पन्च–बाण–मणि–मोह–रुद्
–
विधृ–विश्वा–शता–संपु–सोम–हनु

अनुक्रमणिका (सोम–स्त्री) <<BACK NEXT>> श्लोकाः

| | |
|---|---|
| सोमतीर्थवर्णनं–उपक्रमः– समुद्रमथने विषोत्पत्तिः ॥ | ४६–१ |
| सोमतीर्थवर्णने–अमृतोत्पत्तिः,देवैःपानं,दिविस्थापनम् ॥ | ४७–१ |
| सोमतीर्थवर्णने–अमृतहरणम् ॥ | ४८–१ |
| सोमतीर्थवर्णने–गरुडोत्पत्ति वर्णनम् ॥ | ४९–१ |
| सोमतीर्थवर्णनं– उपसंहारः–सोमतीर्थ,सोमेश्वरोत्पत्तिः ॥ | ५०–१ |
| सूर्यतीर्थ | ५१–१ |
| सूर्याश्रम | ५२–१ |
| सूर्यतीर्थ,सूर्येश्वर | ५२–१८ |
| स्त्रीधर्मानुवर्णनम् ॥ | १०८–१ |


अंगि– अध– इति– कपि– किम्पु– कोटि– गंगा– गोक– जम– दत्त– नहु– पन्च– बाण– मणि– मोह– रुद्

–

विधु– विश्वा– शता– संपु– सोम– हनु

अनुक्रमणिका (संपु–सुरु) <<BACK NEXT>> श्लोकाः


| | |
|---|---|
| संपुटेश्वरः(सज्जेश्वरः) | ५७–२५ |
| संवर्तकाश्रम,संवर्तकतीर्थ,संवर्तकेश्वरवर्णनम् ॥ | ५४–१ |
| स्वायम्भुव मनोरुत्पत्ति स्त्रीपुरुष सृष्टि कथनम् ॥ | ०५–१ |
| सिद्धि – सिद्ध वर्णनम् ॥ | ०९–१ |
| सिद्धाश्रम | ८१–१ |
| सिद्धेश्वर | ८१–३४ |
| सिद्धेश्वरस्थानवर्णनम् ॥ | ८०–६३ |
| सुमित्रेश्वर | ३९–१ |
| सुरसाश्रमम् ॥ | ८३–२० |
| सुरुच्याश्रम वर्णनम् ॥ | १११–१ |

अंगि– अध– इति– कपि– किम्पु– कोटि –गंगा– गोक– जम– दत्त– नहु– पन्च– बाण– मणि– मोह –रुद्
–
विधु– विश्वा– शता– संपु– सोम– हनु

अनुक्रमणिका (शता–सर) <<BACK NEXT>> श्लोकाः


शतानीकेन सूतंप्रति गोकर्णक्षेत्र वर्णन प्रारम्भः ॥ ०१–१
शाल्मलीमाहात्म्ये– शाल्मलीगंगायाः उत्पत्तिः ॥ ९६–१
शाल्मलीमाहात्म्ये– गङ्गावली नदी, गङ्गादेवीमहिमानुवर्णनम् ॥ ९७–१
शास्त्रेश्वरवर्णनम् ॥ ७७–१
शिवम्प्रति संहारत्वशक्ति कथनम् ॥ ०३–१
शिंशुमारतीर्थ वर्णनम् ॥ ५१–३५
शुकाश्रम ८०–३६
षडाननेन शिवं प्रति उत्कर्ष सृष्टिप्रश्नः ॥ ०२–१
सरस्वतीतीर्थं,सारस्वतेश्वरश्च ३०–१


अंगि– अध– इति– कपि– किम्पु– कोटि –गंगा– गोक– जम– दत्त– नहु– पन्च– बाण– मणि– मोह –रुद्
–
विधु– विश्वा– शता– संपु– सोम– हनु

अनुक्रमणिका (विश्वा–वैरा) <<BACK NEXT>> श्लोकाः


विश्वावसु,तुंबुरु,चित्रसेन,गंधर्व,अप्सरस,सिद्ध,मरुत्,साध्य,यक्ष,राक्षस,
किन्नर,गुह्यक,किंपुरुष,विद्याधराणां आश्रमाणि ८३–३३
वेदेश्वर ॥ ७७–१
व्याधाश्रम महिमानुवर्णनम् ॥ ८४–१
व्यासाश्रमवर्णने–पराशरोत्पत्ति कथनम् ॥ ७८–१

व्यासाश्रमवर्णने– व्यासोत्पत्ति कथनम् ॥ ७९–१
व्यासाश्रम ८०–१
वैतरणीनदी ४२–१८
वैतरणीदुर्गा,दुर्गातीर्थानां(वैतरणीह्रद)उत्पत्तिकथनम्॥ ४२–४७
वैराग्य,ज्ञान,मुक्त्याख्यमंटपत्रयवर्णनम् ॥ ४१–५८

अंगि– अध– इति– कपि– किम्पु– कोटि– गंगा– गोक– जम– दत्त– नहु– पन्च– बाण– मणि– मोह– रुद्
–
विधू– विश्वा– शता– संपु– सोम– हनु

अनुक्रमणिका (विधू–विश्वा) <<BACK NEXT>> श्लोकाः

विधूतपापस्थाली ॥ २८–१
विशालबिल माहात्म्यवर्णनम् ॥ ३३–४०
विश्वकर्मेश्वर ८२–१
विश्वामित्रेश्वरवर्णने–
विश्वामित्रकथा–विश्वामित्रोत्पत्तिः ॥ ३६–१
विश्वामित्रेश्वरवर्णने–विश्वामित्रकथा–
वसिष्ठाश्रमागमनं,सत्कारः ॥ ३७–१
विश्वामित्रेश्वरवर्णने–विश्वामित्रकथोपसंहारः,
विश्वामित्रेश्वर,विश्वामित्राश्रम,
विश्वामित्रतीर्थोत्पत्तिः,माहात्म्यं च ॥ ३८–१

अंगि– अध– इति– कपि– किम्पु– कोटि– गंगा– गोक– जम– दत्त– नहु– पन्च– बाण– मणि– मोह– रुद्
–

विधु– विश्वा– शता– संपु– सोम– हनु

अनुक्रमणिका (रुद्–वाल्मी) <<BACK NEXT>> श्लोकाः


रुद्रपाद महिमानुवर्णनम् ॥ ९२–१

रोमशाश्रमवर्णनम् ॥ ९५–८३

वरदेश्वरवर्णनम् ॥ ३४–२७

वर्णाश्रमाचार वर्णनम् ॥ १०५–१

वर्णाश्रमाचार वर्णनम् ॥ १०६–१

वर्णाश्रमाचारः वर्णनम् ॥ १०७–१

वसिष्ठाश्रम,वसिष्ठेश्वर,वसिष्ठकुंडोत्पत्तिवर्णनम् ॥ ३५–१

वस्वाश्रमं ८३–२५

वायुकैलासगमन ईश्वरगोकर्णागमन पुनःकैलासप्रवेशः ॥ ५८–१

वाल्मीकेराश्रमं ८३–३७


अंगि– अध– इति– कपि– किम्पु– कोटि– गंगा– गोक– जम– दत्त– नहु– पन्च– बाण– मणि– मोह– रुद् –

विधु– विश्वा– शता– संपु– सोम– हनु

अनुक्रमणिका (मोह–राव) <<BACK NEXT>> श्लोकाः


मोहतीर्थवर्णनं ९३–३४

ययात्याश्रमं १०१–४६

युग – काल – धर्म – कल्पादिवर्णनम् ॥ ०६–१

युगधर्म निरूपणम् ॥ १०९–१

युगाश्रम वर्णनम् ॥ ९४–४७

योगविचारः ॥ १०३–१

योगाचरणम् ॥ १०४–१

योगाश्रम,योगेश्वर(चक्रखण्डेश्वर),चक्रतीर्थमहिमानुवर्णनम् ॥ ५३–१
रामतीर्थ वर्णनम् ॥ ४४–४७
रावणेश्वरादिलिङ्ग ७१–१

अंगि– अध– इति– कपि– किम्पु– कोटि– गंगा– गोक– जम– दत्त– नहु– पन्च– बाण– मणि– मोह– रुद्
–
विधु– विश्वा– शता– संपु– सोम– हनु

अनुक्रमणिका (मणि–मृड) <<BACK NEXT>> श्लोकाः

मणिभद्र ८१–२४
महागणपति ५७–२१
महाबलेश्वर प्रतिष्ठापनम् ॥ ५६–१
मात्सर्यतीर्थ ९३–२६
मार्कंडेयाश्रमवर्णने–मार्काण्डेयोत्पत्तिः,
तस्य तपोवर्णनं च ॥ २१–१
मार्कंडेयाश्रमवर्णने– मार्कण्डेयशिवोपदेशकथनम् ॥ २२–१
मार्कण्डेयाश्रम,मार्कंडेयेश्वर,मार्कंडेय ह्रद, २३–१
मृगशृङ्गोत्पत्ति वर्णनम् ॥ ५५–१
मृडेश्वरः(मुरुडेश्वरः) ५७–३६

अंगि– अध– इति– कपि– किम्पु– कोटि– गंगा– गोक– जम– दत्त– नहु– पन्च– बाण– मणि– मोह– रुद्
–
विधु– विश्वा– शता– संपु– सोम– हनु

अनुक्रमणिका (बाण–मन्व) <<BACK NEXT>> श्लोकाः

| | |
|---|---|
| बाणाश्रम वर्णनम् ॥ | १०२–१ |
| बिन्दुतीर्थ (एकबिन्दु,दशबिन्दु,शतबिन्दु,सहस्रबिन्दु) वर्णनम् ॥ | ४३–१ |
| ब्रह्मसृष्टि विवेचन कथनम् ॥ | ०४–१ |
| ब्रह्मेश्वर,ब्रह्मतीर्थ,ब्रह्माश्रम, | ७३–१ |
| भद्रकाली | ९१–१ |
| भारद्वाजाश्रमं | ८३–२९ |
| भीमकुण्ड | ४५–१ |
| भुवर्लोकादि वर्णनम् ॥ | १४–१ |
| भूतनाथमहिमानुवर्णनम् ॥ | ८१–५१ |
| भृग्वाश्रमं | ८३–२९ |
| मन्वन्तर वर्णनम् ॥ | ०७–१ |


अंगि–अध–इति–कपि–किम्पु–कोटि–गंगा–गोक–जम–दत्त–नहु–पन्च–बाण–मणि–मोह–रुद्–

विधु–विश्वा–शता–संपु–सोम–हनु

अनुक्रमणिका (पन्च–प्लक्ष) <<BACK NEXT>> श्लोकाः


| | |
|---|---|
| पन्चलिंगमहिमानुवर्णनं च ॥ | ५७–४४ |
| पञ्चलिङ्ग माहात्म्य वर्णनम् ॥ | ६०–१ |
| पट्टविनायक (चिन्तामणि विनायक) | ३९–१६ |
| पर्वताश्रम ॥ | ९४–१ |
| पाण्डवतीर्थ | ४४–३६ |
| पातालादि वर्णनं , | १५–१ |
| पितृस्थाली,पितृस्थालीश्वर | २९–१ |
| पितृस्थालीमाहात्म्यवर्णनम् ॥ | २९–१९ |

पुलस्त्याश्रमं ८३–२९
प्लक्षद्वीपादि वर्णनम् ।। १३–१

अंगि– अध– इति– कपि– किम्पु– कोटि– गंगा– गोक– जम– दत्त– नहु– पन्च– बाण– मणि– मोह– रुद्
–
विधु– विश्वा– शता– संपु– सोम– हनु

अनुक्रमणिका (नहु–नृसि) <<BACK NEXT>> श्लोकाः

नहुषश्रमवर्णनं–उपक्रमः ।। ९८–७७
नहुषश्रमवर्णने–नहुषेन्द्रपदप्राप्तिः ।। ९९–१
नहुषाश्रम वर्णनं –उपसंहारः।। १००–१
नागतीर्थ,नागेश्वरमहिमानुवर्णनम् ।। ३१–१
नागशृङ्ग महिमानुवर्णनम् ।। ८९–१
नादेश्वरमहिमानुवर्णनम् ।। ६८–१४
नाभागाश्रमं १०१–४१
नारदाश्रमं ८३–२९
निमेराश्रमं १०१–३८
नृसिंहस्थान(प्रह्लादाश्रम)वर्णनम् ।। ७४–३९

अंगि– अध– इति– कपि– किम्पु– कोटि– गंगा– गोक– जम– दत्त– नहु– पन्च– बाण– मणि– मोह– रुद्
–
विधु– विश्वा– शता– संपु– सोम– हनु

अनुक्रमणिका (दत्त–नव) <<BACK NEXT>> श्लोकाः

दत्तात्रेयाश्रमवर्णने–अनसूयाचरित्रं ७६–१

| | |
|---|---|
| दत्तात्रेयाश्रम(षडक्षरेश्वर)वर्णनं च ॥ | ७६–७७ |
| दक्षयात्राक्रमः ॥ | ११५–१ |
| दिगाश्रम, | ९५–१ |
| दूर्वासाश्रम | ७६–६१ |
| दोरेश्वरः(धारेश्वरः)स्थापनं | ५७–४० |
| द्वेषतीर्थं | ९३–२८ |
| धर्माश्रम,धर्मतीर्थ,धर्मेश्वरवर्णनम् ॥ | ५२–३८ |
| नलाश्रमं | १०१–३६ |
| नवग्रहाश्रमं | ८३–२७ |

अंगि– अध– इति– कपि– किम्पु– कोटि– गंगा– गोक– जम– दत्त– नहु– पन्च– बाण– मणि– मोह– रुद्
–
विधू– विश्वा– शता– संपु– सोम– हनु

अनुक्रमणिका (जम–त्रिमू) <<BACK NEXT>> श्लोकाः

| | |
|---|---|
| जमदग्न्याश्रमं | ८३–२९ |
| जम्बुद्वीप वर्णनम् ॥ | १०–१ |
| जम्बुद्वीपादि द्वीपान्तर वर्णनम् ॥ | ११–१ |
| जामदग्न्येश्वर(आदिगोकर्णेश्वर)वर्णनम् ॥ | १९–५४ |
| तपोवन | ३३–२९ |
| ताम्रगौरीनदी | २६–१ |
| ताम्रगौरी ॥ | २६–४९ |
| ताम्रगौर्यामस्थिनिक्षेपणफलवर्णनम् ॥ | २७–१ |
| तृणाग्न्याश्रमं | ८३–१ |
| त्रिमूर्त्यभेदकथने मार्कण्डेयकथोपक्रमः ॥ | २०–१ |

x

| | |
|---|---|
| गालवाश्रम, | ९५–३४ |
| गुणेश्वरः(गुणवन्तेश्वरः) | ५७–३१ |
| गोकर्णोत्पत्ति वर्णनम् ॥ | ०८–१ |
| गोकर्णक्षेत्रनिमज्जनवर्णने– कालकेय पीडा वर्णनम् ॥ | १५–२७ |
| गोकर्णक्षेत्रनिमज्जनवर्णने–सागरेश्वरोत्पत्तिवर्णनम् ॥ | १६–१ |
| गोकर्णक्षेत्रनिमज्जनवर्णने–भगीरथोत्पत्तिकथनम् ॥ | १७–१ |


अंगि– अध– इति– कपि– किम्पु– कोटि– गंगा– गोक– जम– दत्त– नहु– पन्च– बाण– मणि– मोह– रुद्
–
विधु– विश्वा– शता– संपु– सोम– हनु

अनुक्रमणिका (कोटि–क्षेत्र) <<BACK NEXT>> श्लोकाः


| | |
|---|---|
| कोटितीर्थमाहात्म्ये– नरकयातन वर्णनम् ॥ | ६३–१ |
| कोटितीर्थमाहात्म्ये– गर्भवासादि कथनम् ॥ | ६४–१ |
| कोटितीर्थमाहात्म्ये– पुण्यलोकविस्तारः,उपसंहारः ॥ | ६५–१ |
| ऋत्वाश्रमं | ८३–२९ |
| क्रोधतीर्थ | ९३–२७ |
| क्षमा,सत्य,दम,कीर्ति,अहिंसा,आनन्द,बुद्धि,मान, लक्ष्मी,लज्जा,श्रुति,स्मृति,मेधानां तीर्थानि ॥ | ९३–४९ |
| क्षेत्रविधिः त्रयस्त्रिंशत्तीर्थनामानि स्नानविधि वर्णनम् ॥ | ६६–१ |
| क्षेत्रमाहात्म्य वर्णनम् ॥ | ११२–१ |
| क्षेत्रमाहात्म्य श्रवणफल कथनम्॥ | ११८–१ |


अंगि– अध– इति– कपि– किम्पु– कोटि– गंगा– गोक– जम– दत्त– नहु– पन्च– बाण– मणि– मोह– रुद्

–
विधु–विश्वा–शता–संपु–सोम–हनु

अनुक्रमणिका (किम्पु–कोटि) <<BACK NEXT>> श्लोकाः

किम्पुरुषादि वर्णनम् ॥ १२–१
कुमारेश्वर(गुहेश्वर), गुहतीर्थवर्णनम् ॥ २४–१
कुबेरेश्वर,वैश्रवणतीर्थमहिमानुवर्णनम् ॥ ७१–४३
कृष्णाश्रम महिमानुवर्णनम् ॥ ७५–१
केतकीविनायक, विनायकतीर्थ, विनायकाश्रमवर्णनम् ॥ ७२–१
केतकीतीर्थ,केतक्याश्रम,केतकीश्वरवर्णनम् ॥ ७३–५४
केसर्याश्रमं ८३–२२
कोटितीर्थ ३३–३१
कोटितीर्थ माहात्म्यं –उपक्रमः ॥ ६१–१
कोटितीर्थमाहात्म्ये– नरकवर्णनम् ॥ ६२–१

अंगि–अध–इति–कपि–किम्पु–कोटि–गंगा–गोक–जम–दत्त–नहु–पन्च–बाण–मणि–मोह–रुद्
–
विधु–विश्वा–शता–संपु–सोम–हनु

अनुक्रमणिका (कपि–काली) <<BACK NEXT>> श्लोकाः

कपिलतीर्थ वर्णनम् ॥ ६७–१
कपोताश्रमं ८३–१८
कर्षाश्रम, ९५–७८
कश्यपाश्रमं ८३–१५
कहोळाश्रम, ९५–३६
कलकलेश्वर ५७–१

| | |
|---|---|
| कामाघनाशिनी | ७०–१ |
| कामेश्वरमहिमानुवर्णनम् ॥ | ७०–२९ |
| कालभैरव, | ७४–१ |
| कालीहृद(आलद केरे )वर्णनम् ॥ | ९१–१ |

अंगि– अध– इति– कपि– किम्पु– कोटि– गंगा– गोक– जम– दत्त– नहु– पन्च– बाण– मणि– मोह– रुद्
–
विधु– विश्वा– शता– संपु– सोम– हनु

अनुक्रमणिका (इति–कन) <<BACK NEXT>> श्लोकाः

| | |
|---|---|
| इतिहास कथनम् ॥ | ११७–१ |
| इन्द्रेश्वर महिमानुवर्णनम् ॥ | ८२–६८ |
| ईर्ष्यातीर्थ | ९३–३१ |
| उत्तरयात्रा क्रमः ॥ | ११६–१ |
| उन्मज्जनतीर्थ(जोगळे केरे), | ४१–१ |
| उमामहेश्वर,उमावन, | ११३–१ |
| ऋषीणां,देवतानां,राजर्षीणां,मुनीनां– | ८३–५३ |
| एलावनं | ४२–१ |
| और्वतीर्थवर्णनम् ॥ | ४५–१७ |
| कनकाश्रम, | ९५–३९ |

अंगि– अध– इति– कपि– किम्पु– कोटि– गंगा– गोक– जम– दत्त– नहु– पन्च– बाण– मणि– मोह– रुद्
–
विधु– विश्वा– शता– संपु– सोम– हनु

अनुक्रमणिका (अध–इक्ष्व) <<BACK NEXT>> श्लोकाः

| | |
|---|---|
| अधर्माश्रम– | ९३–१ |
| अनन्ततीर्थ,अनन्तदृषत्(मणिनाग) | ५१–१२ |
| अन्त्यकाल ज्ञापनम् ॥ | ११०–१ |
| अमृतेश्वर | २८–१ |
| अरण्यतीर्थ | ६८–१ |
| अलक्ष्म्याश्रमं | ९३–३२ |
| अशोक पञ्चक महिमानुवर्णनम् ॥ | ६९–१ |
| असूयाश्रमं | ९३–२४ |
| आरामविनायक(हित्ल गणपति) महिमा ॥ | २३–५० |
| इक्ष्वाक्वाश्रमं | १०१–४४ |

अंगि– अध– इति– कपि– किम्पु– कोटि– गंगा– गोक– जम– दत्त– नहु– पन्च– बाण– मणि– मोह– रुद्– विधू– विश्वा– शता– संपु– सोम– हनु

अनुक्रमणिका (अंगि–अत्र्य) <<BACK NEXT>> श्लोकाः

| | |
|---|---|
| अंगिरसाश्रमं | ८३–२९ |
| अंबरीषाश्रमं | १०१–१ |
| अक्षमातीर्थं | ९३–२९ |
| अगस्त्यतीर्थवर्णने–अगस्त्यतपोवर्णनं,गरुडेन शतशृङ्गनयनम् ॥ | ३२–१ |
| अगस्त्यतीर्थवर्णने– ब्रह्मतीर्थ(कमण्डलु तीर्थ) | ३३–१ |
| अगस्त्यतीर्थ, | ३४–२७ |
| अग्निकुण्डं, ताम्रतलपर्वतं च ॥ | २५–१ |

अघनाशिनीतीरस्थानि च आश्रमपदानि तीर्थानि च ॥ ८३-५७
अत्र्याश्रमं ८३-२९

१-११-२१-३१-४१-५१-६१-७१-८१-९१-१०१-१११ <<BACK NEXT>>

अनुक्रमणिका( अध्यायाः १११-११८) श्लोकाः

१११. अन्त्यकाले ज्ञाते कर्तव्यम् -सुरुच्याश्रमकथा ॥ ७४
११२. गोकर्णक्षेत्रमहिमा ॥ ५४
११३. उमामहेश्वर,उमावन,चन्द्रदेवाश्रम,मालिनीनदीनां कथाः ॥ ७०
११४. गोकर्णयात्राक्रमः -१, नित्ययात्राक्रमः॥ ४९
११५. गोकर्णयात्राक्रमः -२, दक्षिणयात्राक्रमः ॥ ६०
११६. गोकर्णयात्राक्रमः -३, उत्तरयात्राक्रमः ॥ ४५
११७. क्षेत्रमाहात्म्यश्रवणफलम्-१ ॥ ३९
११८. क्षेत्रमाहात्म्यश्रवणफलम्-२ ॥ ४७

१-११-२१-३१-४१-५१-६१-७१-८१-९१-१०१-१११ <<BACK NEXT>>

अनुक्रमणिका( अध्यायाः १००-११०) श्लोकाः

१०१. अंबरीषादितीर्थानां कथाः ॥ ४८
१०२. ययातितीर्थ-बाणतीर्थयोः कथा ॥ ५३
१०३. योगविचारः-१,ध्यानयोगः ॥ ६३
१०४. योगविचारः-२, भक्तियोगः ॥ ४७
१०५. योगविचारः-३, कर्मयोगः-वर्णाश्रमाचारवर्णनम्॥ ९२
१०६. योगविचारः-४, कर्मयोगः-गृहस्थाश्रमाचारवर्णनम् ॥ ४६
१०७. योगविचारः-५, कर्मयोगः-नित्याह्निकादिविधिः ॥ ८८
१०८. योगविचारः-६, कर्मयोगः-स्त्रीधर्माः ॥ ८६

१०९. योगविचारः–७, कर्मयोगः–युगधर्मनिरूपणम्॥ ९६

११०. अन्त्यकालज्ञापकनिमित्तानि ॥ ६७

१–११–२१–३१–४१–५१–६१–७१–८१–९१–१०१–१११ <<BACK NEXT>>

अनुक्रमणिका( अध्यायाः ९१–१००) श्लोकाः

९१. दुर्गाचरितं– भद्रकाली–कालीह्रदयोः कथा च ॥ ९४

९२. सुहोत्रकथा–रुद्रपादमहिमा ॥ ७१

९३. अधर्मादितीर्थानां कथाः ॥ ७५

९४. पर्वताश्रम–युगाश्रमयोः कथा ॥ ९३

९५. दिगादितीर्थानां कथाः॥ ८५

९६. शाल्मलीगंगायाः कथा–१ ॥ ७७

९७. शाल्मलीगंगायाः कथा–२ ॥ ४५

९८. हिडिम्बाश्रमकथा ॥ ८३

९९. नहुषकथा–१, नहुषस्य इन्द्रपदप्राप्त्यन्तम् ॥ ४८

१००. नहुषकथा–२, नहुषाश्रमवर्णनान्तम् ॥ ७४

१–११–२१–३१–४१–५१–६१–७१–८१–९१–१०१–१११ <<BACK NEXT>>

अनुक्रमणिका( अध्यायाः ८१–९०) श्लोकाः

८१. मणिभद्र–सिद्धेश्वर–भूतनाथानां कथा ॥ ६०

८२. विश्वकर्मेश्वर–गौतमेश्वर–इन्द्रेश्वराणां कथा ॥ १०४

८३. तृणाग्न्याद्याश्रमाणां कथाः ॥ ६१

८४. व्याधाश्रमकथा ॥ ४९

८५. हनुमदीश्वरकथा–१ ॥ ४६

८६. हनुमदीश्वरकथा–२,रामायणकथा–१ ॥ ७५

८७. रामायणकथा–२ सेतुबन्धनान्तम् ॥ ६८
८८. रामायणकथा–३ रामाभिषेकान्तम् ॥ १११
८९. नागशृङ्गकथा ॥ ५०
९०. दुर्गाशृङ्ग–नन्दिनी–दुर्गाकुण्डानां कथा ॥ ८६

१–११–२१–३१–४१–५१–६१–७१–८१–९१–१०१–१११ <<BACK NEXT>>

अनुक्रमणिका( अध्यायाः ७१–८०) श्लोकाः

७१. रावणेश्वरादीनां–कुबेरेश्वरस्य च कथा ॥ ६५
७२. केतकीविनायककथा॥ १२१
७३. केतकीश्वर–ब्रह्मेश्वरयोः कथा ॥ ७३
७४. कालभैरव–नृसिंहयोः कथा ॥ ७४
७५. कृष्णाश्रमकथा ॥ ९२
७६. दुर्गसतीर्थ–दत्तात्रेयतीर्थयोः कथा ॥ ९२
७७. वेदेश्वर–शास्त्रेश्वरयोः कथा ॥ ६०
७८. व्यासतीर्थकथा–१, पराशरेण राक्षोघ्नयज्ञविरामान्तम् ॥ ८८
७९. व्यासतीर्थकथा–२, व्यासेन कुरुकुलसन्तानवर्धनान्तम्॥ ८५
८०. व्यासतीर्थकथा–३, शुकतीर्थकथा च ॥ ६५

१–११–२१–३१–४१–५१–६१–७१–८१–९१–१०१–१११ <<BACK NEXT>>

अनुक्रमणिका( अध्यायाः ६१–७०) श्लोकाः

६१. विष्णुवर्मकथा–१, सनकेन विष्णुवर्मणः पूर्वजन्मचरितकथनम् ॥ ६६
६२ विष्णुवर्मकथा–२, विष्णुवर्माणं प्रति सनकेन नरकवर्णनम् ॥ ९२
६३. विष्णुवर्मकथा–३, विष्णुवर्माणं प्रति सनकेन नरकयातनवर्णनम ॥१२५
६४. विष्णुवर्मकथा–४, विष्णुवर्माणं प्रति सनकेन संसारदुःखवर्णनम् ॥८३

६५. विष्णुवर्मकथा–५, कोटितीर्थमहिम्ना विष्णुवर्मणः सद्गत्यन्तम् ॥ ११२
६६. गोकर्णयात्राविधिः ॥ ४०
६७. कपिलतीर्थकथा ॥ ४९
६८. अरण्यतीर्थ–नादेश्वयोः कथा ॥ ५७
६९. अशोकपञ्चककथा ॥ ५०
७०. अघनाशिनीनदी–कामेश्वरयोः कथा ॥ ६८

१–११–२१–३१–४१–५१–६१–७१–८१–९१–१०१–१११ <<BACK NEXT>>

अनुक्रमणिका( अध्यायाः ५१–६०) श्लोकाः

५१. सूर्यतीर्थ–अनन्ततीर्थ–शिंशुमारतीर्थानां कथाः ॥ ७३
५२. सूर्येश्वर–धर्मेश्वरयोः कथा ॥ ६३
५३. योगेश्वर–चक्रखंडेश्वरयोः कथा ॥ ५५
५४.संवर्तकाश्रम,संवर्तकतीर्थ,संवर्तकेश्वरवर्णनम् ॥ ३८
५५. श्रीमहाबलेश्वर(आत्मलिङ्ग)वर्णनोपक्रमः ॥ ७१
५६. श्रीमहाबलेश्वरप्रतिष्ठापनम् ॥ ९०
५७.कलकलेश्वर–वैवाहिकगिरि–महागणपति–पंचलिंगानां कथा ॥ ५३
५८. परमेश्वरेण गोकर्णे आत्मलिंगपूजनम् ॥ ११०
५९. श्रीमहाबलेश्वरस्य महिमा ॥ ८४
६०.हर्यश्वाश्रममपर्णदाश्रमयोः कथा ॥ ८८

१–११–२१–३१–४१–५१–६१–७१–८१–९१–१०१–१११ <<BACK NEXT>>

अनुक्रमणिका( अध्यायाः ४१–५०) श्लोकाः

४१. शंकरनारायणकथा–२,मण्टपत्रयवर्णनान्तम्॥ ७७
४२. एलापुत्रः–वैतरणीवनदुर्गा ॥ ६१

| | |
|---|---|
| ४३.बिन्दुतीर्थ (एकबिन्दु,दशबिन्दु,शतबिन्दु,सहस्रबिन्दु) वर्णनम् ॥ | ६२ |
| ४४. गदातीर्थ–पाण्डवतीर्थ–रामतीर्थकथा ॥ | ७४ |
| ४५. भीमकुण्ड–और्वतीर्थयोः कथा ॥ | ५६ |
| ४६. सोमतीर्थकथा–१, शिवेन विषपानान्तम्॥ | ६६ |
| ४७. सोमतीर्थकथा–२, देवानां अमृतप्राप्त्यन्तम् ॥ | ५४ |
| ४८. सोमतीर्थकथा–३, अमृताहरणाय गरुडेन प्रस्थानम् ॥ | ६० |
| ४९. सोमतीर्थकथा–४, गरुडोत्पत्त्यन्तम् ॥ | ७८ |
| ५०. सोमतीर्थकथा–५, सोमस्य शापविमुक्त्यन्तम् ॥ | ९६ |


१–११–२१–३१–४१–५१–६१–७१–८१–९१–१०१–१११ <<BACK NEXT>>

अनुक्रमणिका( अध्यायाः ३१–४०) श्लोकाः


| | |
|---|---|
| ३१. नागेश्वरकथा॥ | ४७ |
| ३२. शतशृङ्गगमनकथा ॥ | ७४ |
| ३३.कमण्डलुतीर्थ,गरुडतीर्थ, कोटितीर्थ,तपोवन,विशालबिलानां कथाः | ५२ |
| ३४. गोगर्भ–वरदेश्वर–अगस्त्यतीर्थानां कथाः ॥ | ४९ |
| ३५. वसिष्ठेश्वरकथा ॥ | ५१ |
| ३६. विश्वामित्रेश्वरकथा–१, विश्वामित्रजननान्तम् ॥ | ६५ |
| ३७. विश्वामित्रेश्वरकथा–२, विश्वामित्रस्य वसिष्ठेन सत्कारान्तम् ॥ | ५१ |
| ३८. विश्वामित्रेश्वरकथा–३, विश्वमित्रेन ब्राह्मण्यप्राप्त्यन्तम् ॥ | ८० |
| ३९. सुमित्रेश्वर–पट्टविनायक–गङ्गाधाराणां कथा ॥ | ४७ |
| ४०. शंकरनारायणकथा–१, खरासुरवधान्तम् ॥ | ५४ |


१–११–२१–३१–४१–५१–६१–७१–८१–९१–१०१–१११ <<BACK NEXT>>

अनुक्रमणिका( अध्यायाः २१–३०) श्लोकाः

२१.मार्कण्डेयकथा–१, मार्कण्डेयेन तपश्चरणान्तम् ॥ ६७

२२.मार्कण्डेयकथा–२, मार्कण्डेयस्य शिवोपदेशः ॥ ५६

२३.मार्कण्डेयकथा–३, मार्कण्डेयवरप्रदानान्तम्॥ ७१

२४.कुमारेश्वरः(गुहेश्वरः) गुहतीर्थं च ॥ ६५

२५.अग्निकुण्डं, ताम्रतलपर्वतं च ॥ ४८

२६. ताम्रगौरीकथा ॥ ५४

२७.ताम्रगौर्यामस्थिनिक्षेपणफलवर्णनम् ॥ ९०

२८.अमृतेश्वर, विधूतपापस्थाली वर्णनम् ॥ ६०

२९. पितृस्थालीवर्णनम् ॥ १०४

३०. गायत्रीसावित्रीसरस्वतीतीर्थवर्णनम् ॥ ९१

१-११-२१-३१-४१-५१-६१-७१-८१-९१-१०१-१११ <<BACK NEXT>>

अनुक्रमणिका( अध्यायाः ११–२०) श्लोकाः

११.भूलोके जम्बुद्वीपे भरतवर्षवर्णनम् ॥ ३२

१२. जम्बुद्वीपे किम्पुरुषादिवर्षवर्णनम् ॥ ४६

१३.भूलोके इतरेषां द्वीपानां सागराणां च वर्णनम् ॥ ८८

१४.ब्रह्माण्डे ऊर्ध्वलोकानां वर्णनम् ॥ ३०

१५.अधोलोकानां वर्णनं– सागरकथा–१, कालकेयपीडा ॥ ६०

१६. सागरकथा–२, सागरेश्वरोत्पत्त्यन्तम्॥ ५४

१७. सागरकथा –३, भगीरथजननान्तम्॥ ७३

१८. सागरकथा–४, समुद्रपूरणान्तम्॥ ५१

१९. परशुरामेण गोकर्णक्षेत्रस्य पुनरुद्धारः ॥ ७३

२०.स्वपुत्रं प्रति शिवेन त्रिमूर्त्यभेदकथनम् ॥ ५७

१ - ११ - २१ - ३१ - ४१ - ५१ - ६१ - ७१ - ८१ - ९१ - १०१ - १११ <<BACK NEXT>>


| अनुक्रमणिका( अध्यायाः १–१० ) | श्लोकाः |
|---|---|
| १.शतानीकेन पृष्टेन सूतेन गोकर्णक्षेत्रवर्णनप्रारम्भः ।। | ६२ |
| २.षडाननेन पृष्टेन शिवेन स्वरूपकथनम् ।। | २७ |
| ३.शिवस्य स्वरूपम्–सृष्टिक्रमः ।। | ५० |
| ४.ब्रह्मसृष्टि विवेचनम् ।। | ८५ |
| ५.स्वायंभुवमनोरुत्पत्तिः–तेन स्वप्रजाद्वारा सृष्टिः ।। | ४७ |
| ६.युगादिकालव्यवस्था ।। | ६० |
| ७.मन्वन्तर वर्णनम् ।। | १०८ |
| ८.गोकर्णोत्पत्तिः, रुद्रयोनिः(गोकर्णतीर्थं) ।। | ६६ |
| ९.रुद्रभूमिः–सिद्धयः–सिद्धाः ।। | ८२ |
| १०.जम्बुद्वीप वर्णनम् ।। | ६५ |

Back Cover